ISSN 2249-538X

# वाक्यार्थभारती

## नवशृङ्खला

अङ्कः – ८ वर्षम् २०१७–१८

**प्रधानसम्पादकः**

आचार्यः ए.पि. सच्चिदानन्दः

**सम्पादकाः**

डा. चन्द्रकान्तः

डा. एस्. वेङ्कटेशताताचार्यः

विद्वान् श्यामसुन्दरः ए.

डा. प्रमोदभट्टः

राष्ट्रियसंस्कृतसंस्थानम्

भारतशासनमानवसंसाधनविकासमन्त्रालयाधीनः मानितविश्वविद्यालयः

राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा 'ए' श्रेण्या प्रत्यायितम्

राजीवगान्धीपरिसरः

शृङ्गेरी – ५७७ १३९

Title : Vākyārthabhāratī

Chief Editor : **Prof. A.P. Sachidananda**

Editorial Board : Dr. Chandrakant

Dr. S. Venkatesha Tatacharya

Vidwan Shyamasundara A

Dr. Pramod Bhat

Publisher : Rashtriya Sanskrit Sansthan

(Deemed University under MHRD, Govt of India)
Accredited with A Grade by NAAC
RAJIV GANDHI CAMPUS
SRINGERI – 577 139
Website : www.sringericampus.ac.in

Copy Right : Publisher

e-mail : principal_rgc@hotmail.com

Year : 2017-18

ISSN : 2249-538X

Designed by : Rajiv Gandhi Campus, Sringeri

Printed at : Sri Siri Enterprises, Sringeri

प्रो. पी.एन्. शास्त्री
कुलपति
राष्ट्रिय संस्कृत संस्थान (मानित विश्वविद्यालय)
(मानव संसाधन विकास मंत्रालय, भारत सरकार के अधीन)
('ए' ग्रेड के साथ राष्ट्रीय मूल्यांकन एवं प्रत्यायन परिषद् द्वारा मान्यता प्राप्त)

Prof. P.N. Shastry
Vice-Chancellor
RASHTRIYA SANSKRIT SANSTHAN
Deemed to be University
(Under MHRD, Govt. of India)
(Accredited by NAAC with 'A' Grade)

RSkS/VC/Msg/2018-19|71

Date 14.08.2018



# जीयाद्वाक्यार्थभारती


**"शास्त्रं सुचिन्तितमथो परिचिन्तनीयम्"** इति सुभाषितोक्तदिशा शास्त्रान्तरङ्गावगतिः निरन्तरं चिन्तनेनाभ्यासेन तपसा च सिध्यतीति निश्चप्रचम्। अपि च **"स्वाध्यायोऽध्येतव्य"** इति विधिः निरन्तराध्ययनमेवोपदिशति । यदि महता प्रयासेन गुरोः निर्मलानुकम्पया च शास्त्रं समधिगतं भवति तर्हि पुरुषार्थचतुष्टये चरमः परमश्च पुरुषार्थः ब्रह्मज्ञानरूपः मोक्षोऽपि समधिगतो भविष्यतीत्यत्र नास्ति संशीतिः। तस्मादेव शास्त्राध्ययनाध्यापनसंरक्षणादिकलापेषु निरन्तरं दत्तावधानोऽस्माकं राष्ट्रियसंस्कृतसंस्थानस्य जीवातुभूतः उभयेषां जगद्गुरूणां मातुः श्रीशारदायाश्चासीमानुकम्पया प्रवर्धितः शृङ्गेरीस्थराजीवगान्धी-परिसरः छात्राणां बुध्दिवैशद्याय शास्त्रविषयकान् नानाविधकार्यक्रमानायोजयतीति मे मानसि मोदमुत्पादयति। सुसन्दर्भेऽस्मिन् जगद्गुरूणां श्री श्री भारतीतीर्थमहास्वामिनां, तत्करकमलसञ्जातानां श्री श्री विधुशेखरभारतीस्वामिनाञ्च चरणनलिनयोः जगदम्बायाः श्री शारदाम्बायाः चरणारविन्दयोश्च प्रणतिततिं विनिवेदयामि। प्रतिवर्षमपि विशिष्टव्याख्यानमालायाः वाक्यार्थपरिषदश्च व्याख्यानसंग्रहरूपं **वाक्यार्थभारती**नामकं ग्रन्थरत्नं परिसरेण प्राकाश्यं नीयत इत्यभिनन्दनीयो विषयः। अस्मिन् हायनेऽपि प्रकाश्यमानेयं वाक्यार्थभारती चिरं जीयात् इत्याशासे।

इत्थम्
प.ना.शास्त्री
(प्रो. परमेश्वरनारायणशास्त्री)
कुलपतिः

56-57, Institutional Area, Janakpuri, New Delhi-110058 Ph.: (O) 28523949 (Fax) 28521948
EPABX : 28524993, 28521994, 28524995 E.Mail : rskspvc@yahoo.com

**प्रो. एस्. सुब्रह्मण्य शर्मा**
कुलसचिव (प्र.)
**राष्ट्रिय संस्कृत संस्थान**
मानित विश्वविद्यालय
(मानव संसाधन विकास मंत्रालय, भारत सरकार के अधीन)
**('ए' ग्रेड के साथ राष्ट्रीय मूल्यांकन एवं प्रत्यायन परिषद् द्वारा मान्यता प्राप्त)**

**Prof. S. Subrahmanya Sarma**
Registrar (I/c)
**RASHTRIYA SANSKRIT SANSTHAN**
Deemed to be University
(Under MHRD, Govt. of India)
**(Accredited by NAAC with 'A' Grade)**



## शुभसन्देशः

सुविदितमेवेदमशेषविदुषां यत् निखिललोककाम्यसुखदुःखाभावयोः उपायान् सुनिपुणमुपदिशन्ति महर्षिभिः प्रवर्तितानि शास्त्राण्येवेति । अतः शास्त्रोक्तोपायैरभिलषितं फलमवाप्तुं शास्त्राण्यधिगन्तव्यानि । तदधिगमश्च यथा अध्ययनाध्यापनाभ्यां, तथा गोष्ठीषु विषयोपस्थापनश्रवणाभ्यामपि भवति । अतः छात्राणां शास्त्रार्थाधिगतये विद्याविकासाय च अस्माकं संस्थानस्य राजीवगान्धीपरिसरः बाह्यानां विश्वराष्ट्रस्तरीयविदुषां वक्तृत्वे "शारदाविशिष्टव्याख्यानम्" इति गोष्ठीं परिसरीयाणां छात्रप्रियाणां बोधनपटूनामध्यापकानां वक्तृत्वे च "वाक्यार्थपरिषद्" इति गोष्ठीं च समायोज्य तत्रोपस्थापितविषयाणां संग्रहरूपां **"वाक्यार्थभारती"** नाम्नीं शोधपत्रिकां च प्रतिवर्षं प्रकाशयतीति ज्ञात्वा नितरां प्रसीदामि ।

एतत्कार्यप्रवर्तकान् परिसरप्राचार्यान् आचार्यान् ए.पि.सच्चिदानन्दवर्यान्, शारदाविशिष्टव्याख्यानमालासंयोजकौ डा.चन्द्रकान्त-डा.श्यामसुन्दरौ, वाक्यार्थपरिषदः संयोजकौ डा. एस् वेङ्कटेशताताचार्य-डा.प्रमोदभट्टौ च नितरामभिनन्दामि । एवमेव श्रीशारदाम्बायाः श्रीजगद्गुरुचरणानां च अनुग्रहेण परिसरोऽयं विद्वद्भूयिष्ठो गोष्ठीसमायोजनविद्याविकासपटिष्ठः समेधतान्तमामित्याशासे।

भावत्कः


30/07/2018

प्रो.एस्.सुब्रह्मण्य शर्मा

56-57, Institutional Area, Janakpuri, New Delhi-110058 Ph.: (O) 28520979 (Fax) 28520976
EPABX : 28524993, 28521994, 28524995 E.Mail : sanskrit.registrar@gmail.com / ps2reg.sansthan@gmail.com

आचार्यः ए.पि. सच्चिदानन्दः
प्राचार्यः
राष्ट्रियसंस्कृतसंस्थानम् (मा.वि)
राजीवगान्धीपरिसरः, शृङ्गेरी - 577139
कर्णाटकराज्यम्

Prof. A. P. Sachidananda
Principal
Rashtriya Sanskrit Sansthan (DU)
Rajiv Gandhi Campus, Sringeri
Karnataka - 577 139



## समेधतां शास्त्रसपर्या

"यामृषयो मन्त्रकृतो मनीषिणः । अन्वैच्छन्देवास्तपसा श्रमेण" इति भगवती श्रुतिरस्मान् उद्बोधयति यत् सकलमानवसंकुलस्य कल्याणाय कर्त्तव्याकर्त्तव्यात्मकं धर्मं जिज्ञासमानानां सर्वेषां च कृते मूलं निखिलाः वेदाः । तेषां वेदानामर्थं निर्दुष्टतया ज्ञातुमहैतुकं वात्सल्यमस्मासु आवहन्तो महर्षयो वेदाङ्गानि चान्यानि शास्त्राणि महता तपसा स्वाध्यायेन च प्रणिन्युरिति लोकविदितं परमं सत्यमस्ति । तान्येव शास्त्राणि नराणामस्माकं शेवधयः इत्यत्र नास्ति संशीतिः । तस्मात् सर्वेषां जीवनस्य चरममुद्देश्यं शास्त्राणामध्ययनं तद्विहितस्यानुसरणं तथैव श्रद्धया तेषां परिरक्षणं च ।

शास्त्राणां परिरक्षणं कर्त्तव्यमिति मन्यमानो भारतसर्वकारः राष्ट्रियसंस्कृतसंस्थानं प्रतिष्ठापयामास । संस्थानं नानाविधकार्याणि सम्पादयद् विद्योतते । तत्सङ्कल्पं मनसि निधाय राजीवगान्धीपरिसरेणापि सर्वेषामभ्युदयनिःश्रेयससिद्धये परमकारुणिकैः महर्षिभिः प्रवर्तितानां श्रुतिसारप्रसारणपराणां शास्त्राणां समुपासनदृष्ट्या छात्राणां सुखबोधाय बुद्धिविवर्धनाय च परिसरप्राध्यापकैः वाक्यार्थपरिषन्माध्यमेन तदा तदा छात्राध्यापकवृन्दे शास्त्रार्थविचाराः प्रस्तुताः, शारदाविशिष्टव्याख्यानमालायां राष्ट्रस्य प्रथितयशस्कैर्विद्वद्वरेण्यैरत्र समागत्य सुमहद्गहनशास्त्रार्थविचाराः समुपन्यस्ताः, विदुषां छात्राणां च पूर्वपक्षाणां समुचितसमाधानान्यपि प्रदाय लेखबद्धतया वाक्यार्थसारं प्रादायीति नूनं हर्षसन्दोहो नः । सम्प्रति परिसरप्राध्यापकानां तथैव समागतानां विद्वन्मतल्लिकानां च

वाक्यार्थान् सङ्कलय्य पुस्तकाकारेण मुद्रयित्वा सफलीकुर्वन्तो विद्वांसः डा० चन्द्रकान्तवर्यः, डा० वेङ्कटेशताताचार्यः, डा० श्यामसुन्दरवर्यः, डा० प्रमोदभट्टश्च, ते नूनमभिनन्दनीयाः । कार्येऽस्मिन् सर्वदाऽस्मान् प्रवर्तयन्ति नानाशास्त्रनदीष्णाः प्रशासनकुशलाः अस्मत्कुलपतयः आचार्यपरमेश्वरनारायणशास्त्रिवर्याः, तेभ्यः प्रणामपुरस्सरं कार्तज्ञ्यं बिभर्मि । तथैवास्मत्कुलसचिवेभ्यः विद्वद्भ्यः आचार्येभ्यः एस्. सुब्रह्मण्यशर्मवर्येभ्यः प्रणामाञ्जलिं समर्पयामः ।

एतादृशवाक्यप्रसूनमालानामाविष्करणे स्वीयैः परिपूर्णानुग्रहैः शिष्यवात्सल्येनास्माकं सर्वतोमुखाभिवृद्धिं कामयन्ते जगद्गुरवः श्रीश्रीभारतीतीर्थमहास्वामिनः, तत्करकमलसञ्जाताः जगद्गुरवः श्रीश्रीविधुशेखरभारतीमहास्वामिनश्च । अतस्तेषाम् उभयेषां चरणनलिनेषु सभक्तिश्रद्धं साष्टाङ्गप्रणामान् विनिवेदयामः । वाग्देव्याः जगन्मातुः श्रीशारदाम्बायाः पादपद्मयोः प्रणामान् वितन्महे ।

इत्थं विद्वज्जनविधेयः

ए. पी. सच्चिदानन्दः

आचार्यः ए. पि. सच्चिदानन्दः

# सम्पादकीयम्

इह खल्वनवद्यविद्याविद्योतिनि प्रपञ्चे आर्षविद्यायाः शास्त्रविद्यायाश्च महत्वं सर्वैरपि ज्ञानज्योतिर्विद्योतितान्तः करणैः शास्त्रज्ञैः सन्ततं प्रकीर्त्यते । "शास्त्रं शब्दविज्ञानादसन्निकृष्टेऽर्थे विज्ञानम्" इति अध्वरमीमांसायाः भाष्यस्य वाक्यमेव प्रमाणान्तरागोचरसमुचितार्थप्रतिपादनं यः करोति स एव शब्दः शास्त्रमिति स्मारयति । यदा अर्थविज्ञानं जायते तदा लोकः आत्मोद्धारं प्राप्नोति । अर्थविज्ञानेन पुरुषार्थचतुष्टयपरिज्ञानं जायते येन च पुरुषस्य जीवनं सार्थकं सम्भवति । अतः शास्त्राध्ययनं समेषामपि पुरुषार्थाभिलाषिणां परमं कर्तव्यमित्यत्र नास्ति संशयः । शास्त्रे स्वाधीनतामवाप्तुं निरन्तरं यत्नः विचारः विमर्शः वाक्यार्थश्च विधेयो वर्तते । भगवत्पादैः शङ्कराचार्यैः साधनपञ्चके **"वाक्यार्थश्च विचार्यतां श्रुतिशिरःपक्षः समाश्रीयताम्"** । **दुस्तर्कात्सुविरम्यतां श्रुतिमतस्तर्कोऽनुसन्धीयताम्"** इति शास्त्रविषयकं ब्रह्मविषयकञ्च ज्ञानं प्राप्तुमपेक्षितः समुत्कृष्टः मार्गः प्रादर्शि । एतस्मिन् शास्त्रज्ञानसम्पादनमार्गे प्रवृत्तः राष्ट्रियसंस्कृतसंस्थानान्तर्गतः दक्षिणाम्नायश्रीशारदापीठाधीश्वराणां जगद्गुरूणां श्रीश्रीभारतीतीर्थमहास्वामिनां, तत्करकमलसञ्जातानां श्रीश्रीविधुशेखरभारती-महास्वामिनाञ्च सदनुग्रहेण वर्धमानः शृङ्गेरीस्थः राजीवगान्धीपरिसरः छात्राणाम् अध्यापकानाञ्च हितकांक्षया तत्तच्छास्त्रेषु कृतभूरिपरिश्रमाणां राष्ट्रस्तरे विश्वस्तरे च प्रथितयशस्कानां विदुषां विशिष्टविषयेषु व्याख्यानमालां, परिसरप्राध्यापकेषु वाक्यार्थप्रवृत्तिवर्धनार्थं वाक्यार्थपरिषदं च समाकल्पयत् । तस्यां शारदाविशिष्टव्याख्यानमालायां वाक्यार्थपरिषदधिवेशनेषु च प्रस्तुतैः व्याख्यानैः समलङ्कृतः **वाक्यार्थभारतीनामकः** ग्रन्थविशेषः प्रत्येकं संवत्सरेऽपि परिसरपक्षतः प्रकाशनं प्राप्य शास्त्रज्ञलोक-मानसमधिरोहतीति परिसरस्यास्य वैशिष्ट्यमपि वर्धयतीति ज्ञापयितुमानन्दो जायते ।

अस्मिन् वर्षेऽपि आचार्याणां **पीयूषकान्तदीक्षितवर्याणां** करकमलाभ्यां न्यायशास्त्रीयविशिष्टव्याख्यानेन सह शारदाविशिष्टव्याख्यानमाला वाक्यार्थपरिषच्च हेमलम्बश्रावणशुक्लाष्टम्यां ३१/७/१७ दिनाङ्के इन्दुवासरे पूर्वाह्णे समुद्घाटिते अभूताम् । तदनन्तरं कार्तिकशुक्लचतुर्थ्यां २४/१०/१७ दिनाङ्के आचार्याणां **विष्णुनम्बूतिरिवर्याणां** व्याख्यानं व्याकरणशास्त्रे, मार्गशीर्षशुक्लद्वितीयायां २०/११/१७ दिनाङ्के आचार्याणां **रामकुमारशर्मवर्याणां** व्याख्यानं साहित्यशास्त्रे, पौषशुक्लद्वितीयायां २०/१२/१७ दिनाङ्के विदुषां **गोपालकृष्णहेगडेवर्याणां** व्याख्यानं ज्योतिषशास्त्रे, माघकृष्णनवम्यां ९/२/१८ दिनाङ्के आचार्याणां **वै. एस्. रमेशवर्याणां**

व्याख्यानं शिक्षाशास्त्रे, फाल्गुनकृष्णचतुर्दश्यां १६/०३/१८ दिनाङ्के आचार्याणां **वेणीमाधवशास्त्रिवर्याणां** व्याख्यानम् अद्वैतवेदान्तशास्त्रे च समजायन्त ।

एवमेव वाक्यार्थपरिषदधिवेशनेषु परिसरस्य प्राध्यापकास्सर्वेऽपि स्वाधिगतशास्त्रेषु छात्रबोधगम्यान् वाक्यार्थान् व्यधासिषुः । अस्मिन् हायने श्रावणमासात् माघमासपर्यन्तं प्रतिमासं एकमधिवेशनमाहत्य सप्ताधिवेशनानि वाक्यार्थपरिषदः समपद्यन्त । प्राचार्या आचार्याः सच्चिदानन्दवर्याः, आचार्याः महाबलेश्वर पि. भट्टवर्याः, आचार्याः सुब्राय वि भट्टवर्याः, आचार्याः का इ मधुसूदनवर्याः, डा. सि एस् एस् नरसिंहमूर्तिवर्याः, डा. चन्द्रकान्तवर्याः, डा. राघवेन्द्रभट्टवर्याश्च एकैकशः एतेष्वधिवेशनेषु पर्यवेक्षकपदमलङ्कृत्य वाक्यार्थपरिषदः अधिवेशनानि सफलानि समपादयन् । एतादृशोत्तमकार्यसम्पादने राष्ट्रियसंस्कृतसंस्थानस्य मानितविश्वविद्यालयस्य कुलपतीनामाचार्याणां **परमेश्वरनारायणशास्त्रिवर्याणां** सन्मार्गदर्शनं सुधारूपं स्मरन्तः प्रणामान् निवेदयामः। संस्थानस्य कुलसचिवा **आचार्याः सुब्रह्मण्यशर्मवर्या** अपि शुभसन्देशमयच्छन् । तेभ्योऽपि कार्तज्ञ्यकुसुमानि समर्पयामः । परिसरस्य प्राचार्याः **आचार्या ए.पि. सच्चिदानन्दवर्याः** प्रतिपदमपि परिसरस्य पुरोगत्यै सत्कर्मणि प्रेरयन्तः विराजन्ते । तेभ्यः प्रणामान् निवेदयन्तः धन्यवादकुसुमानि समर्पयामः ।

एवं परिसरस्य प्राध्यापकाः सर्वेऽपि निर्दिष्टे समये वाक्यार्थान् प्रस्तुत्य लेखनमपि दत्त्वा समुपाकार्षुरिति समेभ्योऽपि कार्तज्ञ्यं ज्ञापयामः । कार्यालयाधिकारिणः, सकलविधसहयोगं प्रादुरिति तेभ्योऽपि धन्यवादाः समर्प्यन्ते । परिसरस्य वाग्वर्धिनीपरिषदः पदाधिकारिणः छात्रान् साधुवादैः सन्तोषयामः । परिसरेऽस्मिन् यत्किमपि सुभद्रं कार्यं सिध्यति चेत् तत्र जगद्गुरूणामसीमानुकम्पा, अनुग्रहश्च कारणमिति सर्वैरपि विदितमेव । जगदम्बायाः क्षेत्राधिष्ठात्र्याः शारदाम्बायाः चरणकमलयोः प्रणामान् समर्पयामः । जगद्गुरूणां श्रीश्रीभारतीतीर्थमहास्वामिनां तत्करकमलसञ्जातानां श्रीश्रीविधुशेखरभारतीस्वामिनाञ्च चरणकमलेषु नतिसन्ततिमाम्रेडयामः। पुस्तकमिदं शास्त्राधिजिगांसूनां विद्वद्वरेण्यानाञ्च मनस्तोषकञ्च जायतामिति आशास्महे ।

**सम्पादकाः**

| | |
|---|---|
| डा. चन्द्रकान्तः | डा. वेङ्कटेशताताचार्यः |
| डा. श्यामसुन्दरः ए. | डा. प्रमोदभट्टः |

# संयोजकाः

## शारदाविशिष्टव्याख्यानमाला



डा. चन्द्रकान्तः



विद्वान् श्यामसुन्दरः ए.

## वाक्यार्थपरिषत्



डा. एस्. वेङ्कटेशताताचार्यः



डा. प्रमोदभट्टः

# विषयानुक्रमणिका


| अद्वैतवेदान्तविभागः | | | |
|---|---|---|---|
| १. | आधुनिकदृष्टान्तेषु अद्वैततत्त्वांशाः | डा. वेणीमाधवशास्त्री जोशी | १ |
| २. | प्राणाधिकरणम् | प्रो. महाबलेश्वर पि. भट्टः | ४ |
| ३. | ब्रह्मणः वृत्तिव्याप्यत्वम् | डा. गणेश ईश्वर भट्टः | ७ |
| ४. | दृश्यत्वहेतुनिरूपणम् | डा. श्रीकरः जि.एन् | १२ |
| ५. | प्रकृत्यधिकरणम् | विद्वान् निरञ्जन भट्टः | १६ |
| **मीमांसाविभागः** | | | |
| ६. | अनुपलब्धिः | प्रो. सुब्राय वि भट्टः | २१ |
| ७. | आतिथ्याबर्हिर्न्यायः | डा. सूर्यनारायणभट्टः | २५ |
| ८. | अभ्युदयेष्टिविचारः | डा. एस्. वेङ्कटेशताताचार्यः | २८ |
| **नव्यव्याकरणविभागः** | | | |
| ९. | पाणिनीये तदन्तविधितदादिविध्यादय उपायाः | प्रो विष्णुनम्पूतिरिः, पय्यन्नूर् | ३७ |
| १०. | षष्ठी स्थानेयोगा(१–१–४९) | डा.सिहेच्.एस्.एस्.नरसिंहमूर्तिः | ४१ |
| ११. | उपमानानि सामान्यवचनैः | डा.चन्द्रशेखरभट्टः | ४५ |
| १२. | एत्येधत्यूठ्सु | डा. सि हेच् के पद्मनाभम् | ४८ |
| १३. | नामिसूत्रार्थविचारः | डा. प्रमोद भट्टः | ५२ |
| १४. | नवेति विभाषा – सूत्रार्थविचारः | विद्वान् अरुणभट्टः | ५५ |
| **नव्यन्यायविभागः** | | | |
| १५. | न्यायशास्त्रस्य माहात्म्यम् | आचार्यः पीयूषकान्तदीक्षितः | ५९ |
| १६. | उपाधिप्रकरणसारः | प्रो. का. इ. मधुसूदनः | ६२ |
| १७. | न्यायदर्शने अपवर्गविमर्शः | डा. नवीनहोळ्ळः | ६८ |
| १८. | धेनुपदशक्तिविचारः | विद्वान् श्यामसुन्दरः | ७२ |
| १९. | आत्मनः अदृष्टसाधनत्वविचारणम् | डा. नवीनः आर् | ७५ |

| | | | |
|---|---|---|---|
| **साहित्यविभागः** | | | |
| २०. | ध्वनिकाव्यानुमितिसिद्धान्तः | डा. रामकुमारशर्मा | ७८ |
| २१. | साधर्म्यमुपमा भेदे इत्युपमालक्षणविचारः | डा. राघवेन्द्रभट्टः | ८६ |
| २२. | सहृदयः | डा. चन्द्रकला आर्. कोण्डी | ९० |
| २३. | वीररसविवेचनम् | डा. कोम्पेल्लि विनयकुमारः | ९६ |
| २४. | रसविषये आनन्दवर्धन-अभिनवगुप्तयोः मतभेदविचारः | डा. श्रीनिवासमूर्तिः | १०४ |
| २५. | रससूत्रव्याख्याविचारः | विद्वान् श्रीकर वि. | १०८ |
| **फलितज्यौतिषविभागः** | | | |
| २६. | चतुर्भिर्व्यवहारोऽत्र सौरचान्द्रार्क्षसावनैः | डा. गोपालकृष्ण हेगडे | ११२ |
| २७. | विंशोत्तरीदशाक्रमः | डा. मुरलीकृष्णः टि. | १२३ |
| २८. | अहर्गणविचारः | डा. प्रसादभट्टः | १२८ |
| २९. | सुनफादियोगविमर्शः | डा. प्रदीपशर्मा | १३० |
| ३०. | अयनांशाः | डा. रमानन्दभट्टः | १३६ |
| ३१. | वास्तुशास्त्रोक्त भूपरीक्षणविधिः | डा. सुधांशुकुमारनन्दः | १४६ |
| **शिक्षाशास्त्रविभागः** | | | |
| ३२. | योऽनूचानः स नो महान् | आचार्यः वै.एस् रमेशः | १५२ |
| ३३. | शिक्षणसूत्रशास्त्रसूत्राणां विमर्शः | डा. चन्द्रकान्तः | १५६ |
| ३४. | संश्लिष्टभावना (मनोग्रन्थिः)(Complex) | डा. रामचन्द्रुलबालाजी | १५९ |
| ३५. | अन्तःक्रिया | डा. हरिप्रसादः के. | १६४ |
| ३६. | दर्शनम् | डा. गणेश ति.पण्डितः | १६८ |
| ३७. | विविधस्तरेषु पाठयोजनानिर्माणसिद्धान्ता: | डा. वेङ्कटरमणभट्टः | १७३ |
| ३८. | अभ्यासवशगं मन: | डा.नारायण वैद्य | १७६ |
| ३९. | रचनाशिक्षणम् | डा. पि. अरविन्दकुमार सोमदत्त: | १८० |

# आधुनिकदृष्टान्तेषु अद्वैततत्त्वांशाः

**डा. वेणीमाधवशास्त्री जोशी**
निवृत्ताचार्यः, कर्णाटकमहाविद्यालयः,
धारवाडपुरम्

श्रीशङ्करभगवत्पादाचार्याणामद्वैतवेदान्त इत्येव यद्यपि दिगन्तविश्रुतोऽस्ति । तथाप्युपनिषदामेव तत्त्वसिद्धान्तास्तैर्विशदीकृता इत्येव तु निश्चप्रचं वचः । सिद्धान्तबिन्दवस्तु तत्त्वतः कठिनतरा भवन्त्यवगन्तुम्, अत एव दृष्टान्तैस्ते सुलभतया यथा विदितवृत्तान्ता भवेयुस्तथा चिकीर्षन्ति भाष्यकाराष्टीकाकारा वा । उपनिषत्स्वपि रुचिरतरदृष्टान्तानाश्रित्यैव सिद्धान्ततत्त्वांशास्तावद् विव्रीयन्ते । श्रीशङ्करभगवत्पादा अपि, भाष्यवाक्येषु विविधदृष्टान्तैः शिष्याणां पाठकानां सुखबोधार्थं तत्त्वांशानुपन्यसिसिषन्ति । तेषां प्रसन्नगम्भीरशैल्यामेते दृष्टान्ता अपि मनोज्ञतरा, हृदयङ्गमाश्च भवन्तीत्यत्र न सन्देहस्पन्दोऽपि । सम्प्रति आधुनिकदृष्टान्तास्तु आधुनिकजनानां कृते सुलभतरमेव तत्त्वबिन्दून् विवरीतुं शक्नुवन्तीति भावयामः ।

ब्रह्म सत्यं जगन्मिथ्या जीवो ब्रह्मैव नापरः इति तु भगवत्पादानामद्वैतवेदान्तस्य सारसङ्ग्रहः इत्येव प्रतीतोऽस्ति । सामान्येन तत्त्वांशेषु जीवः, जगत्, ईश्वरः, साधनमार्गः मोक्षश्चेति पञ्चांशास्तावत् प्राग्रहरांशा इत्येव परिगण्यन्ते । प्रथमं तावत् ईश्वरः सर्वसाक्षी , सर्वेषां जीविनां हृद्देशे तिष्ठतीति तु वेविद्यत एव । ब्रह्मचैतन्यमेव मायाशबलितः सन्नीश्वर इति देध्रियते । साक्षी तावत् केवलं प्रकाशते, प्रकाशदाने पक्षपातो नास्तीत्युच्यते । विद्यारण्यश्रीचरणाः अपि नाटकदीपदृष्टान्तेन विवर्णयिषन्ति । तथा हि-

**नृत्यशालास्थितो दीपः प्रभुं सभ्यांश्च नर्तकीम् ।**
**भासयेदविशेषेण तदभावेऽपि दीप्यते ॥**

अत्र रङ्गस्थितो दीपः नर्तकीम्, राजानं, सेवकं, सभ्यान् सर्वानपि भासयति, पक्षपातं विना । प्रभुः इत्यधिकप्रकाशं, सेवक इति न्यूनप्रकाशं नैव दित्सति दीपः । तथैव नगरेषु चतुष्पथस्थानेषून्नतोन्नतदीपाः संस्थाप्यन्ते येषामधः मन्त्रिणां यानानि यान्ति, सेवकः पद्यां प्रचलति, प्राकृतजनस्य लघुयानानि प्रयान्ति , यः कोऽपि वा गच्छतु दीपस्य प्रकाशप्रदाने पक्षपातो नास्ति । मध्येनिशं यदि कोऽपि यातायातं न करोति, तदापि स च प्रकाशो न्यूनाधिको नैव भवति । एवमेव साक्षी देहे द्रष्टा भवति , सुषुप्तिकाले सकले विलीनेऽपि स च साक्षी स्वयंप्रकाशस्तथैव स्फुरन्नवतिष्ठते । एवमुन्नतदीपदृष्टान्तेन साक्षिस्वरूपं तावत्सुलभतया वेविद्यत इति भावयामः ।

जीवेश्वरयोर्भेदोऽपि तावत् सुलभतयोदाहरणेनैकेनावगन्तुं शक्नुमः । तत्त्वतो विचार्यमाणे निरवच्छिन्नब्रह्मचैतन्यमेव मायाशबलितमीश्वरशब्देनाभिलप्यत इत्ययं सिद्धान्तस्तु पूर्वमेवोक्तः । तदेव ब्रह्मचैतन्यं जीवस्वरूपमपि प्राप्नोति [1], मलिनसत्त्वप्रधानविद्योपाधिमाश्रित्य, सम्प्रति चैतन्यमुभयोः समानांशः । भेदस्तूपाधिभेदेनेति तु विशेषः । अत्र तावद् आधुनिकोदाहरणं द्रष्टुं शक्नुमः । एकस्तावत् दण्डाधिकारी वर्तते । तस्य च पश्चात्भागे द्वौ रक्षिणावास्ताम् । तथैव तत्रैकश्चोरो गृहीतो यस्य च पश्चात् द्वौ रक्षिणौ स्थितौ । उभयत्रापि यद्यपि रक्षिणौ विद्येते , परं भेदस्तु दण्डाधिकारिणः पश्चात् स्थितौ रक्षिणौ तु दण्डाधिकारिणश्चाधीनौ विद्येते । परं चोरस्य सकाशे स्थितौ तौ तु चोरं स्वाधीने स्थापयतः । तन्नाम चोरः तयोरधीने तिष्ठति । एवमेव ईश्वरस्यापि माया वर्तते , परं सा ईश्वराधीना दृश्यते, अत्र च अविद्याधीनो जीवो दृश्यते । एवमयमेव भेदो जीवेश्वरयोरिति दिक् ।

परंब्रह्मैव जगदधिष्ठानमिति श्रूयते । चैतन्ये जगदिदमध्यस्तमिति निगद्यते । यत्र यदध्यासस्तत्कृतेन दोषेण गुणेन वा अणुमात्रेणापि न सम्बध्यते इति भाष्योक्तप्रकारेण, जगतो दोषेणाधिष्ठानं ब्रह्मचैतन्यं नैव विक्रियते । उदाहरणार्थं, सिनीमायाः श्वेतपटो दृश्यते, तत्र शस्त्रास्त्रयुद्धं दृश्यते, परं स च श्वेतपटः (screen) नैव छिद्यते , एवमेव अग्निदाहदृश्येन वा, समुद्रदृश्येन वा प्रभञ्जनदृश्येन वा स च श्वेतपटो नैव विकृतो दृश्यते । तथैव ब्रह्मचैतन्यमविकृतं तिष्ठति[2] ।

एवमेव जगतश्चानिर्वचनीयत्वं तावत् सत्त्वेनापि वक्तुं न शक्यते । नाप्यसत्त्वेनापि सच्चेन्न बाध्येत, असच्चेन्न प्रतीयेत, जगदिदं बाध्यते ब्रह्मज्ञानेन, प्रतीयते चानुभवेन । अतश्चानिर्वचनीयत्वमेव मित्थ्यात्वमिति निगद्यते । तच्च मित्थ्यात्वं तावत् केवलमात्मज्ञानिनैवानुभूयते न संसारिणा । "यत्र तु सर्वमात्मैवाभूत् तत्र केन कं पश्येत् केन कं श्रुणुयात् केन कं विजानीयात् यत्र तु द्वैतमिव भवति तदितर इतरं पश्यति... इत्याद्युपनिषद्वाक्येन जगतश्च मित्थ्यात्वं तावदात्मसाक्षात्कारादनन्तरमित्येव सूच्यते[3] । तादृशमनिर्वचनीयत्वं तावच्चलनचित्रदृष्टान्तेनाप्यवबोधयितुं पार्यते ।

---

[1] अनेन जीवेनात्मनानुप्रविशन् नामरूपे व्याकरवाणि ।(ब्र.उपनिषद्)

[2] नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः।

न चैनं क्लेदयन्त्यापो न शोषयति मारुतः ॥ (भगवद्गीता)

[3] सर्वव्यवहाराणां प्राग्ब्रह्मात्मताविज्ञानात् सत्यत्वोपपत्तेः स्वप्नव्यवहारस्येव प्राक्प्रबोधात् । शां. भां – २-९

सिनिमाचित्रे तावत्कोऽपि लड्डुकानि खादन्नास्ते । स च खादतीति तु प्रत्यक्षमेव चित्रे द्रष्टुं शक्नुमः । परं तच्च सत्यमेवास्तीति वदामश्चेत्, न , यतो हि तानि लड्डुकानि वयमपि जिघृक्षामश्चेत् नैव शक्नुमः । अतः सत्यमिति वक्तुं नैव प्रभवामः । असदिति वदामश्चेत् प्रत्यक्षमेव दृश्यते कथमसद्भवितुमर्हति । अतः सदसद्भ्यामनिर्वचनीयत्वं मिथ्यात्वं तावदनेनोदाहरणेनावगच्छामः ।

एवमेव रज्जुसर्पन्यायेन, स्वप्नदृष्टान्तेन च जगन्मित्थ्यात्वं सिषाधयिषन्ति । साधनमार्गेऽपि कर्मणां परम्परया मोक्षसाधनत्वमिति तत्त्वमनुसृत्य चित्तशुद्धिमवाप्तुं प्रथममस्माभिः कर्मानुष्ठानं कर्तव्यमित्येवोपदिश्यते । चित्तशुद्धिमवाप्य साधनमार्गं प्रविश्य निरन्तरयोगाभ्यासादिना उपासनाप्रक्रियया च अन्तःकरणस्य परिपक्वतामासाद्य गुरूपदेशेन ब्रह्मसाक्षात्कारो जायत इति क्रमो वर्तते । तदा च दशमस्त्वमसीति दृष्टान्तेन ब्रह्मसाक्षात्कारो भवतीत्युपदिश्यते । सर्वमिदं वक्तुं सुकरं, कर्तुं दुष्करमित्येवावगन्तव्यम् ।

एवञ्च आधुनिकोदाहरणैः वेदान्ततत्त्वांशाः विशदीक्रियन्ते चेत् नवयुगपाठकानां जिज्ञासूनां कृते महोपकारो भवति इति तु निश्चप्रचं वचः । सुलभतरदृष्टान्तैः तत्त्वावबोधनसरणिस्तावत् उपनिषदामेव परम्परा इति तु विज्ञातविषय एव । ते तावत् तत्कालीनदृष्टान्ताः सन्ति , परमिदानीमाधुनिकदृष्टान्ता इतोप्यन्वेष्टव्याः येषामुपन्यासेन तत्त्वांशास्तु सुलभगम्याः भवन्ति । सर्वथा वेदान्ततत्त्वांशास्तु यथा चाधुनिकजिज्ञासुभिर्विदिता भवेयुः तथा प्रयतनीयमस्माभिरिति शिवम् ।

# प्राणाधिकरणम्

**प्रो. महाबलेश्वर पि. भट्टः**
वेदान्तविभागाध्यक्षः,
रा.सं.सं. राजीवगान्धीपरिसरः, शृङ्गेरी

ईश्वरो गुरुरात्मेति मूर्तिभेदविभागिने ।
व्योमवद् व्याप्तदेहाय दक्षिणामूर्तये नमः ॥

अथ चतुर्लक्षण्यां वैय्यासिक्यां शारीरकमीमांसायां प्रथमाध्याये प्रथमपादे क्रमप्राप्तं नवमं प्राणाधिकरणं निरुच्यते । 'अत एव प्राण' इत्येकसूत्रि इदमधिकरणम् । पूर्वाधिकरणे आकाशशब्दो ब्रह्मवचन इत्युपपादितम् । सम्प्रति प्राणशब्दः वायुविकारवचन आहोस्वित् ब्रह्मवचन इति विचार्यते ।

उद्गीथप्रकरणे छान्दोग्योपनिषदि श्रूयते 'प्रस्तोतर्या देवता प्रस्तावमन्वायत्ता' इत्युपक्रम्य 'कतमा सा देवता इति प्राण इति होवाच सर्वाणि ह वा इमानि भूतानि प्राणमेवाभिसंविशन्ति प्राणमभ्युज्जिहते सैषा देवता प्रस्तावमन्वायत्ता' इति वाक्यं विषयः । अत्र प्राणशब्दार्थः कः ? भौतिकः वायुविकारः पञ्चवृत्तिः प्राणो वा उत परं ब्रह्म वा इति विचिकित्सा । उभयत्र लोके वेदे च प्रयोगप्राचुर्यं संशयबीजम् । प्राणशब्दो वायुविकारे प्रसिद्धतरः । 'प्राणस्य प्राणम्' प्राणबन्धनं हि सोम्य मन' इत्यादौ ब्रह्मणि प्राकरणिके विषये प्राणशब्दः उपनिषत्सु प्रसिद्धः । तस्मात् प्राणशब्देन कतरो ग्राह्यः प्रस्तावदेवतात्वेनेति विशये प्राप्ते – पूर्वपक्षः – अत्र प्रस्तावदेवता वायुविकारः प्राणापानादिवृत्तिमान् प्राण एव प्राणशब्देन स्वीकर्तव्यः। न ब्रह्म । लोकवेदयोः प्राणशब्दस्य वायुविकारे प्रसिद्धत्वात् । यद्यपि वाक्यशेषे भूतसंवेशनोद्गमनं ब्रह्मलिङ्गं दृश्यते तथापि लिङ्गापेक्षया श्रुतेः प्रबलत्वात् पूर्वतन्त्रे बलाबलाधिकरणे तथैव निर्णीतत्वात् प्राणश्रुतेः प्राबल्यं सिध्यति । प्राणशब्दोऽपि उभयत्र वायुविकारे ब्रह्मणि च मुख्यो न भवितुमर्हति । वायुविकारे प्रसिद्धतरत्वात् प्राणशब्दः वायुविकारमुख्यप्राणवचन एव । अपि च भूतानां संवेशोद्गमनं मुख्यप्राणेऽपि योजयितुं शक्यते तथैव श्रूयते 'यदा वै पुरुषः स्वपिति प्राणं तर्हि वागप्येति प्राणं चक्षुः प्राणं श्रोत्रं प्राणं मन स यदा प्रबुध्यते प्राणादेवाधिजायन्ते इति । प्रत्यहं स्वापकाले प्राणवृत्तौ अपरिलुप्यमानायां चक्षुरादीन्द्रियवृत्तयः सविषयाः लुप्यन्ते । पुनः प्रबोधसमये उद्भवन्ति । इदं भूतानां संवेशोद्गमनं प्राणलिङ्गमपि भवति । इन्द्रियाणि भूतानां सारभूतानीति भूतानामपि लयः सिध्यति ।

किञ्चान्यत् उत्तरत्र 'कतमा सा देवता उद्गीथमन्वायत्ता आदित्य इति होवाच कतमा सा देवता प्रतिहारमन्वायत्ता अन्नमिति होवाच' इत्युभयत्र ब्रह्मभिन्नयोः अन्नादित्ययोः निर्देशात् अब्रह्मसाहचर्यात् प्रस्तावदेवताऽपि ब्रह्मभिन्नः प्राण एवेऽति निश्चयो न्याय्यः । एवञ्च सन्निधिलिङ्गबलोपेता प्रबला प्राणश्रुतिः अन्यथयितुं न प्रभवति । तस्मात् प्रस्तावदेवता प्राणः वायुविकार एव न ब्रह्मेति ।

अत्रोच्यते राद्धान्तः प्रस्तावदेवता प्राणशब्दः ब्रह्मवचन एव । तथा च सूत्रम् – 'अत एव प्राण:' । पूर्वसूत्रात् 'तल्लिङ्गात्' इत्यनुवर्तते 'तत्'पदं ब्रह्मपरम् । ब्रह्मलिङ्गात् प्राणशब्दमपि ब्रह्मैव न भौतिको वायुविकारः प्राणः ।

यस्मात् कारणात् आकाशपदं ब्रह्मपरं तस्मात् कारणात् प्राणपदमपि ब्रह्मपरमेव । न भौतिकवायुविकारपरम् इति अतिदेशसूत्रार्थः । अनन्यथासिद्धब्रह्मलिङ्गेन सर्वभूतकारणत्वरूपेण आकाशश्रुतिः ब्रह्मपरतया व्याख्याता एवमत्रापि अनन्यथासिद्धब्रह्मलिङ्गेन 'सर्वाणि ह वा इमानि भूतानि प्राणमेवाभिसंविशन्ति प्राणमभ्युज्जिहते' इत्येवंरूपश्रुतिबोधितसर्वभूतकारणत्वरूपेण प्राणश्रुतिः स्वार्थात् प्रच्याव्यान्यथा नीयते ब्रह्मपरतया । यद्यपि बलाबलाधिकरणन्यायेन लिङ्गापेक्षया श्रुतिः प्रबला अथापि अनन्यथासिद्धं लिङ्गं तात्पर्यादिबलोपेतं श्रुतिबाधनायालं भवति । आरम्भस्तरे प्राणशब्दश्रवणेन वायुविकारात्मकप्राणशब्दार्थः मनसि जायते, ततः पश्चात् प्रबलेन लिङ्गेन ब्रह्मपरतया व्याख्यानमर्हति । किञ्च 'प्राणस्य प्राणम्', 'प्राणबन्धनं हि सोम्य मनः ' इत्यादिवाक्यसन्दर्भे प्राणशब्दः प्रकरणानुसारं ब्रह्मपरो विद्यत एव ।

सुषुप्तौ इन्द्रियाणामेव प्राणाश्रयं संवेशनोद्गमनं श्रूयते । तत्र तथा भवतु । अत्र तु सेन्द्रियाणां सविषयाणां जीवाविष्टानां संवेशनोद्गमनं श्रूयते तत्तु प्राणाश्रयं न भवितुमर्हति 'सर्वाणि ह वा इमानि भूतानि' इति श्रुतेः । भूतशब्दः कार्यमात्रगोचरो भवतु अथवा पञ्चमहाभूतविषयो वा भवतु सर्वथा ब्रह्मैव कारणं भवति नान्यत् जन्माद्यधिकरणन्यायसिद्धत्वात् । न तु कौषीतक्युपनिषदि सविषयाणामिन्द्रियाणां प्राणे लयः प्राणाच्चोत्पत्तिः श्रूयते 'यदा सुप्तः न कञ्चन स्वप्नं पश्यति अथास्मिन् प्राणे एवैकधा भवति तदैनं वाक् सर्वैर्नामभिः सहाप्येति' इति चेत् तत्र प्राणशब्दार्थः प्रकारणानुरोधेन ब्रह्मैव इत्यर्थः ।

यत्तूक्तं उत्तरत्र उद्गीथप्रतिहारदेवतयोः अन्नादित्ययोः ब्रह्मभिन्नत्वं स्वीक्रियते एवं सान्निध्यात् प्राणशब्दोऽपि ब्रह्मभिन्नार्थको भवतु इति – अत्रोच्यते वाक्यलिङ्गापेक्षया सन्निधिः दुर्बलः 'श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां पारदौर्बल्यमर्थविप्रकर्षात्' इति

पूर्वमीमांसासूत्रप्रामाण्यात् वाक्यलिङ्गाभ्यां ब्रह्मनिश्चये सन्निधिः बाधितो भवति । अतः प्राणशब्दः ब्रह्मपर एवेति सिद्धान्तः । अतो ब्रह्मदृष्ट्या प्रस्तावोपासना फलति ।

केचन वृत्तिकृतां मतमनुरुन्धानाः 'प्राणस्य प्राणम्' 'प्राणं बन्धनं हि सोम्य मनः' इति वाक्यमस्याधिकरणस्य विषयत्वेन स्वीकुर्वन्ति, तन्न साधु । सन्दिग्धं हि वाक्यं विचारपदवीं गाहते नासन्दिग्धम् । अत्र प्राणस्य प्राणमिति विभक्तिभेदेन षष्ठ्यर्थप्रथमार्थयोः भेदस्य सत्त्वात् नास्ति संशयलेशस्यापि अवकाशः । यथा पितुः पिता इत्यत्र षष्ठ्यर्थः अन्यः, प्रथमार्थः अन्यः । तस्मात् प्रस्तावदेवतावाक्ये संशयप्रजोजनादीनां दर्शितत्वात् तदेव वाक्यं अस्याधिकरणस्य विषय इति भाष्यकाराणां मतं श्रेयसे भूयसे च भवति इति शम् ।

ISSN 2249-538X

# ब्रह्मणः वृत्तिव्याप्यत्वम्

**डा. गणेश ईश्वर भट्टः**
वेदान्तविभागः
रा.सं.सं. राजीवगान्धीपरिसरः, शृङ्गेरी

**शास्त्रप्रमाणमद्वैतमप्रमेयं चिदात्मकम् ।**
**ब्रह्मतत्त्वं विजयते जगदात्मतया स्वयम् ॥**

सर्वेऽपि वेदान्ता अद्वितीयब्रह्मप्रतिपादनार्थं प्रवृत्ता इत्यद्वैतिनां सिद्धान्तः । ब्रह्म च निरस्तसमस्तविशेषं चैतन्यमात्रम् अत एव सर्वप्रमाणागोचरम् इत्यतः अप्रमेयम् इत्युच्यते । एवं सति अप्रमेये ब्रह्मणि वेदान्तानां प्रमाणत्वं कथम्? न हि अप्रमये वस्तुनि प्रमाणस्य किञ्चित् कृत्यमस्ति इति आशङ्का जायते । तदा वृत्तिव्याप्यत्वफलव्याप्यत्वयोः विवेचनेन समाधानं दीयते । फलव्यप्यत्वाभावेऽपि ब्रह्मणः वृत्तिव्याप्यत्वेन वेदान्ताः तत्र प्रमाणतां भजन्ते । एतज्ज्ञातुम् आदौ का नाम वृत्तिः इति जानीमः ।

योगशास्त्रे तावत् **प्रमाणविपर्ययविकल्पनिद्रास्मृतयः**[१] इति अन्तःकरणपरिणामभूतानां प्रमाणादीनां वृत्तित्वमुक्तम् । वेदान्ते तु क्वचित् एतेषां वृत्तित्वाभ्युपगमेऽपि अस्मिन् प्रकरणे वृत्तिर्नाम अन्तःकरणस्य विषयाकारः विषयप्रकाशकः ज्ञानत्वजातिविशिष्टः परिणामः । इयं **कामः सङ्कल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत् सर्वं मन एव**[२] इत्यत्र धीशब्देन अभिहिता । वृत्तिव्याप्यत्वं नाम वृत्तिरूपज्ञानक्रियायां कर्मभूतम् अर्थात् वृत्तिविषयः । तथा हि घटाद्यनात्मविषयाणां स्वतो जडत्वात्, तेषां प्रकाशनाय तत्र प्रमाणव्यापारः अपेक्षितः। अतस्तेषां स्वतः स्फुरणाभावेऽपि, यदा तेषु प्रमाणं प्रवर्तते, तदा विषयाकारान्तःकरणवृत्त्या तद्गतमावरणं निवर्तते । इदम् आवरणनिवर्तकवृत्तिविषयत्वं वृत्तिव्याप्यत्वम् इत्युच्यते । आवरणे निवृत्तेऽपि विषयो न प्रकाशते, जडत्वात् । तदा वृत्त्यभिव्यक्तचैतन्यं चिदाभासशब्दवाच्यं तं घटं प्रकाशयति । यथा दीपप्रभामण्डलं अन्धकारस्थितघटादिविषयगतम् अन्धकारं निवर्तयति, स्वप्रभया विषयं चापि भासयति, तद्वत् । इदं फलव्याप्यत्वम् । फलं नाम आवरणनाशोपहितं चैतन्यम् । तद्व्याप्यत्वं नाम तद्भास्यत्वम् । । उक्तं च पञ्चदश्याम्-

**बुद्धितत्स्थचिदाभासौ द्वावेतौ व्याप्नुतो घटम् ।**
**तत्राज्ञानं धिया नश्येदाभासेन घटः स्फुरेत्**[३] **॥ इति ।**

घटादीनां जडानाम् एवंविधत्वेऽपि ब्रह्मणस्तु स्वप्रकाशत्वात् तस्य चिदाभासभास्यत्वरूपं फलव्याप्यत्वं नास्ति, चैतन्यरूपत्वात् । किन्तु अज्ञानरूपावरणनिवृत्त्यर्थं वृत्तिव्याप्यत्वमात्रम् अत्र अपेक्षितम् । तत्त्वमस्यादिवेदान्तवाक्यजन्या या चरमवृत्तिः ब्रह्मज्ञानशब्दवाच्या तया चैतन्यावारकतया स्थितस्य अज्ञानरूपस्य आवरणस्य तत्प्रयुक्तस्य प्रपञ्चभेदस्य च निवृत्तौ चैतन्यरूपं ब्रह्म स्वयमेव प्रकाशते । तदप्युक्तम्-

**फलव्याप्यत्वमेवास्य शास्त्रकृद्भिर्निराकृतम् ॥**
**ब्रह्मण्यज्ञाननाशाय वृत्तिव्याप्तिरपेक्षिता ।**
**स्वयम्प्रकाशरूपत्वान्नाभास उपयुज्यते**[४] ॥ इति ।

अतः ब्रह्मणः वेदान्तप्रमाणकत्वम् अप्रमेयत्वं चेत्युभयम् अविरुद्धम् । समन्वयाधिकरणभाष्ये आक्षेपसमाधानरूपेण एवमगादि **अविषयत्वे ब्रह्मणः शास्त्रयोनित्वानुपपत्तिरिति चेन्न, अविद्याकल्पितभेदनिवृत्तिपरत्वात् शास्त्रस्य । न हि शास्त्रमिदन्तया विषयभूतं ब्रह्म प्रतिपिपादयिषति । किं तर्हि? प्रत्यगात्मत्वेन अविषयतया प्रतिपादयत् अविद्याकल्पितं वेद्यवेदितृवेदनादिभेदमपनयति**[५] इति । एवं च वृत्त्यभिव्यक्तस्फुरणाविषयत्वेन मुख्यकर्मत्वस्य अभावेऽपि वृत्तिकृतभेदनिवृत्त्याश्रयत्वेन गौणं कर्मत्वं ब्रह्मणः अस्ति । अत एव प्रपञ्चो मिथ्या दृश्यत्वात् इत्यस्मिन् अनुमाने दृश्यत्वं नाम इदं वृत्तिव्याप्यत्वं विवक्षितम् । निर्विशेषब्रह्मभिन्नस्य सर्वस्यापि प्रपञ्चस्य एवंविधत्वेन मिथ्यात्वं तत्र सिद्ध्यति ।

अत्र प्रश्नः- ब्रह्मणः अपि वृत्तिव्याप्यत्वं प्रागुक्तम् । एवं सति सत्यस्य अपि ब्रह्मणः वृत्तिव्याप्यत्वम् अस्तीति प्रागुक्तानुमाने हेतोः व्यभिचार इति । उच्यते- शुद्धमेव ब्रह्म सत्यम् न तु उपहितमपि । वृत्तिज्ञानविषयीभूतं ब्रह्म न शुद्धम् । तथा च श्रुतिः **यत्तदद्रेश्यम्**[६] इति अद्रेश्यम् अदृश्यम् इत्यर्थः । पुनस्तत्र प्रश्नः- वेदान्तजन्याखण्डवृत्तेः उपहितविषयत्वे तदानीम् अन्येषाम् उपाधीनाम् अभावात् वृत्तिरेव उपाधिः इति वक्तव्यम् । वृत्तेः विषयः वृत्त्युपहितं ब्रह्म इत्युक्तौ वृत्तेः स्वविषयत्वापत्तिः । न चेयम् इष्टापत्तिः, शाब्दबोधे शब्दानुपस्थापिताभाननियमेन शब्दानुपस्थितायाः वृत्तेः शाब्दबोधविषयत्वासम्भवात् । यदि कथञ्चित् विषयत्वम् उपपाद्यते, यथा संसर्गस्य अवाच्यस्यापि भानम्, तद्वत् वृत्तेरपि भानं युज्यत इत्युच्यते, तथापि दोषान्तरम् आपद्यते, इयं वृत्तिः अज्ञानतत्प्रयुक्तानां निवर्तिका न स्यात् इति । यतः या वृत्तिः अज्ञानतत्कार्याविषया सैव अज्ञानतत्कार्यनिवर्तिका । अत एव अहमज्ञः इति ज्ञानम् एतदुभयं न निवर्तयति, अज्ञानविषयकत्वात् । अत एव च अयं घटः इति ज्ञानम् एतदुभयं

न निवर्तयति, अज्ञनकार्यविषयत्वात् । प्रकृते च वृत्तेः अपि अज्ञानकार्यत्वेन तदुपहितब्रह्मविषयिणी वृत्तिः अज्ञानं न निवर्तयेत् इति ।

उच्यते- वृत्तेः शाब्दबोधे विषयत्वं नोपेयते उपाधित्वादेव । यः कार्यानन्वयित्वे सति व्यावर्तकत्वे सति वर्तमानः सः उपाधिः । यथा बहूनां स्फटिकानां मध्ये कश्चिदेकः स्फटिकः जपाकुसुमसन्निधानात् लोहितो दृश्यते । तदा केनचित् लोहितं स्फटिकमानय इत्युक्ते सति अन्यः तं स्फटिकम् आनयति । आनयनक्रियायां जपाकुसुमस्य अन्वयस्तु नास्ति । किन्तु सः आनयनकाले विद्यमानः सन् स्फटिकान्तरेभ्यः इमं स्फटिकं व्यावर्तयति । अत्र अलोहितस्यापि स्फटिकस्य लौहित्यसम्पादकत्वेन जपाकुसुमम् उपधिः । एवमेव प्रकृते, ब्रह्मणः केवलस्य शाब्दबोधविषयत्वाभावेऽपि वृत्तिः तस्य शाब्दबोधविषयत्वं सम्पादयति । शाब्दबोधक्रियायां स्वयम् अनन्विता सती अविषयाद् ब्रह्मणः उपहितं ब्रह्म व्यावर्तयति अर्थात् अनुपहितब्रह्मव्यावृत्तां विषयताम् उपहितब्रह्मणः सम्पादयति । एवं च वृत्त्युपरागः वृत्तिकाले सत्तामात्रेण उपयुज्यते न प्रतिभास्यतया ।

अत्र अपरम् उदाहरणं यथा- उदासीनं सत् विषयप्रकाशत्वेन प्रसिद्धं साक्षिचैतन्यम् । तच्च अज्ञानोपहितम् । अज्ञानं च तत्र विषयप्रकाशनक्रियायां नान्वेति, जडत्वात् । चैतन्यमेव प्रकाशकम् । अतः अज्ञनं न साक्षिकोटौ प्रविशति, किन्तु साक्ष्यकोटौ । एवमेव वृत्तिः बोधकाले न भास्यकोटौ प्रविशति । अतः वृत्तेः उपाधित्वम्, वृत्त्युपहितस्य वृत्तिविषयत्वम्, वृत्तेः स्वविषयत्वाभावः इत्येतत् सर्वम् उपपन्नम् ।

यत्तु वृत्त्युपहितब्रह्मविषिण्याः वृत्तेः अज्ञानत्तकार्यानिवर्तकत्वम् उक्तम्, तददूषणम् । यतः वृत्त्युपहितस्य विषयत्वेऽपि ज्ञानाज्ञानयोः समानविषयकत्वम् अक्षतमेव । अज्ञानं तन्निवर्तकं वृत्तिज्ञानं चेति द्वयमपि उपाध्यविषयकम् । अज्ञानमपि स्वोपधानदशायां ब्रह्मातिरिक्ताविषयं सत् स्वोपहितं ब्रह्म विषयीकरोति । अतः उपाध्यविषयकत्वे सति उपहितान्याविषयकत्वम् उभयोः समानम् इति वृत्तिज्ञानस्य अज्ञानतत्कार्यनिवर्तकत्वम् उपपन्नम् ।

इदानीम् अयं प्रश्नः- वृत्तिज्ञानरूपं यद् ब्रह्मज्ञानम् अज्ञानतत्कार्यनिवर्तकम्, तत् निवर्तते न वा इति वक्तव्यम् । यदि न निवर्तते, तर्हि ब्रह्मण इव ब्रह्मभिन्नस्य वृत्तिज्ञानस्य सत्त्वेन अद्वैतहानिः । निवृत्तिः वक्तुं न शक्यते च, निवर्तकान्तरस्य अभावात् इति । उच्यते- यथा वृत्तिज्ञानम् स्वान्याज्ञानकार्यं नाशयति, तथा स्वात्मानमपि निवर्तयति, स्वस्यापि अज्ञानकार्यत्वात् । उक्तं च कल्पतरौ **शुद्धं ब्रह्मेति विषयीकुर्वणा वृत्तिः स्वस्वेतरनिवृत्तिहेतुः उदयते स्वस्यापि उपाधित्वाविशेषात्**[७] इति । एवमपि वृत्तौ प्रतिबिम्बितं

यत केवलचैतन्यम, तन्न नश्यति । किन्त यथा दर्पणाभावे दर्पणे जातस्य मखप्रतिबिम्बः बिम्बभतमखात्मनैव तिष्ठति, एवमेव उपाधिभूतवृत्तिनाशे तत्र प्रतिबिम्बितं चैतन्यं बिम्बभतचैतन्यमात्रेण अवतिष्ठते ।

तर्हि शुद्धं स्वप्रकाशम् इति वाक्यजन्यबोधे शुद्धं प्रकाशते न वा । यदि न प्रकाशते तर्हि वाक्यं व्यर्थं स्यात । शुद्धस्य स्वप्रकाशत्वं च न सिद्ध्येत् इति । उच्यते- शुद्धस्य वृत्तिविषयत्वाभावादेव शुद्धं स्वप्रकाशम् इत्यस्य एवं वाक्यार्थो भवति अशुद्धम् अस्वप्रकाशत्वव्यापकम् इति । व्यापकनिवृत्त्या व्याप्यनिवृत्तिः इति न्यायेन शुद्धे ब्रह्मणि अशुद्धत्वस्य व्यापकस्य अभावात व्याप्यस्य अस्वप्रकाशत्वस्यापि निवृत्तिः । अतः पर्यवसितार्थमादाय वाक्यं सार्थकम । एवमेव शुद्धं न दृश्यम, शुद्धं न मिथ्या इति वाक्ययोरपि अशुद्धत्वं अदृश्यत्वव्यापकम, अशुद्धत्वं मिथ्यात्वव्यापकम् इत्यर्थः ।

एतत् सर्वं भामतीमतम् अनुसृत्य उक्तम् । विवरणमते तु शुद्धमेव ब्रह्म वृत्तिविषयः । तथा हि अविद्यानिवर्तिकायाः वेदान्तजन्यायाः अखण्डाकारवृत्तेः प्रमात्वं तावद्वक्तव्यमेव । किन्तु तस्या वृत्त्युपहितब्रह्मविषयकत्वम् उक्त्वा मिथ्यात्वम् अपि इष्टमेव इति यद्युच्यते, तर्हि ज्ञानस्य मिथ्यात्वं नाम बाधितार्थविषयकत्वम् इति बाधितार्थविषयकत्वेन वृत्तेः प्रमात्वम् न स्यात् । अतः अबाधितं शुद्धमेव ब्रह्म वृत्तिविषयः । न च शुद्धस्य वृत्तिविषयत्वे तस्य **केवलो निर्गुणश्च**[x] इत्यादिश्रुत्युक्तं शुद्धत्वमेव न स्यात् इति वाच्यम् । केवलो निर्गुणश्च इत्यादिश्रुत्या ब्रह्मणि पारमार्थिकः कोऽपि धर्मः नास्तीति बोध्यते, न त काल्पनिकः अपि । वृत्तिविषयत्वरूपकाल्पनिकधर्मस्य ब्रह्मणि अभ्युपगमेऽपि पारमार्थिकः निर्गुणत्वस्वाभावः न विरुध्यते । अपि च यः वृत्तिविषयः वृत्त्युपहितं ब्रह्म, तस्य मिथ्यात्वेन अधिष्ठानसापेक्षत्वात् उपहितस्य शुद्धमेव अधिष्ठानम् इति वक्तव्यम् । उपहितस्य सत्याधिष्ठानत्वाभावे शून्यवादापत्तिः । अतः शुद्धेऽपि ब्रह्मणि उपहिततादात्म्यरूपः मिथ्याधर्मः अङ्गीकर्तव्य एव । तदा यथा तेन मिथ्याधर्मेण सम्बन्धोपगमेऽपि शुद्धस्य शुद्धत्वहानिर्न भवति, एवमेव मिथ्याभूतेन वृत्तिविषयत्वधर्मेणापि शुद्धस्य शुद्धत्वं न हीयते । तथा च भाष्यम्- **यत्र यदध्यासः, तत्कृतेन गुणेन दोषेण वा अणुमात्रेणापि स न सम्बध्यते**[१] इति । तथा च शुद्धस्यापि वृत्तिविषयत्वेन शुद्धे च मिथ्यात्वाभावात् वृत्तिविषयत्वं दृश्यत्वम् इति कथ्यमाने हेतोः व्यभिचारः दुर्वारः । अपि च शशविषाणं तुच्छम् इत्यादिशब्दजन्यवृत्तिविषयत्वं तुच्छस्यापि वर्तते । वृत्तिविषयत्वं दृश्यत्वम् इति यद्युच्यते, तर्हि शशविषाणे मिथ्याभिन्ने असत्पदार्थे दृश्यत्वस्य हेतोः सत्त्वात् व्यभिचारः । तस्मादपि दृश्यत्वं न वृत्तिविषयत्वम्, किन्तु शब्दाजन्यवृत्तिविषयत्वं

दृश्यत्वम् । घटपटादिमिथ्यापदार्थानाम् एव शब्दाजन्यप्रत्यक्षानुमानादिवृत्तिविषयत्वमस्ति, न शुद्धब्रह्मणः । एतत् तुच्छस्यापि नास्ति, शशविषाणं तुच्छम् इत्यादिशाब्दव्यवहारस्य सत्त्वात् । अत एव असतामपि शाब्दवृत्तिविषयत्वमाह भगवान् पतञ्जलिः **शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः**[१०] इति । तथा च तुच्छं शब्दजन्यवृत्तिविषयः । शुद्धब्रह्मणः अपि तत्त्वमस्यादिशब्दजन्यवृत्तिविषयत्वमस्ति इति तुच्छस्य शुद्धब्रह्मणश्चेति उभयोरपि शब्दजन्यवृत्तिविषयत्वेन शब्दाजन्यवृत्तिविषयत्वाभावात् इदानीं दृश्यत्वहेतोः न व्यभिचारः । एवं वृत्तिव्याप्यत्वं विहाय प्रकारान्तरेण दृश्यत्वनिरूपणात् ब्रह्मणः वृत्तिव्याप्यत्वेऽपि न कोऽपि दोषः ।

**सङ्केतसूची-**


१. योगसूत्रम् १-५
२. बृहदारण्यकोपनिषत् १-५-३
३. पञ्चदशी ७-९१
४. पञ्चदशी ७-९०
५. ब्रह्मसूत्रशाङ्करभाष्यम् १-१-४
६. मुण्डकोपनिषत् १-१-५
७. भामतीकल्पतरुः पृष्ठम्
८. श्वेताश्वतरोपनिषत् ६-११
९. अध्यासभाष्यम्
१०. योगसूत्रम् १-८

# दृश्यत्वहेतुनिरूपणम्

**डा. श्रीकरः जि. एन्**
वेदान्तविभागः
रा.सं.सं. राजीवगान्धीपरिसरः, श्रृङ्गेरी

ब्रह्मैव पारमार्थिकं सत् प्रपञ्चस्तु व्यावहारिकः वेदान्तवाक्यजन्यब्रह्मज्ञानबाध्यत्वात् शुक्तिज्ञानबाध्यप्रातिभासिकरजतमिव मिथ्या इति मन्यन्ते अद्वैतवादिनः वेदान्तिनः । अद्वैतसिद्धेः द्वैतमिथ्यात्वसिद्धिपूर्वकत्वात् मधुसूदनसरस्वत्याचार्यैः अद्वैतसिद्धौ प्राचां प्रयोगानुसारेण विमतं मिथ्या दृश्यत्वात् जडत्वात् परिच्छिन्नत्वादिति हेतुत्रयेण प्रपञ्चस्य मिथ्यात्वं साध्यते । सिषाधयिषितं मिथ्यात्वं च पूर्वाचार्याणां मतान्यनुसृत्या पञ्चधा निरूपितम् – सदसत्त्वानधिकरणत्वम्, प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगित्वम्, ज्ञाननिवर्त्यत्वम्, स्वाश्रयनिष्ठात्यन्ताभाव-प्रतियोगित्वम्, सद्विविक्तत्वं चेति ।

पूर्वोक्तानुमाने मिथ्यात्वसाधनाय उपन्यस्तस्य दृश्यत्वहेतोः निर्वचनवेलायां पूर्वपक्षिणा खण्डनबुद्ध्या षोढा विकल्पाः कृताः । ते यथा – वृत्तिव्याप्यत्वम्, फलव्याप्यत्वम्, उभयसाधारणम्, कदाचित् कथञ्चित् चिद्विषयत्वम्, स्वव्यवहारे स्वातिरिक्तसंविदन्तरापेक्षानियतित्वम्, अस्वप्रकाशत्वं वा इति ।

तत्र वृत्तिव्याप्यत्वमिति प्रथमविकल्पः । तैजसस्य अन्तःकरणस्य इन्द्रियादिना विषयाकारपरिणतिः वृत्तिरित्युच्यते । प्रमातुः विषयसम्बन्धार्था अन्तःकरणपरिणामरूपा वृत्तिः जायते । घटादिज्ञानाय प्रमातुः विषयसम्बन्धः आवश्यकः । स च सम्बन्धः इन्द्रियसन्निकर्षादिना जायमाना या वृत्तिः तद्रूपः । वृत्तिव्याप्यत्वमित्यत्र व्याप्यत्वं नाम न प्राप्यत्वं किन्तु दृक् क्रियायाः कर्मत्वं विषयत्वमित्यर्थः । तथा च वृत्तेः विषयत्वमेव वृत्तिव्याप्यत्वम् ।

फलव्याप्यत्वमिति द्वितीयविकल्पः । फलव्याप्यत्वं नाम फलविषयत्वम् । चिदुपरागार्था वृत्तिः आवरणभङ्गार्था वृत्तिरिति च पक्षद्वयं प्रसिद्धम् । चिदुपरागार्था वृत्तिरिति मते प्रमाणजन्यविषयाकारान्तःकरणवृत्तौ प्रतिबिम्बितं चैतन्यं फलम् । विषयाकाराकारितचित्तवृत्तौ प्रतिफलितचैतन्येन घटादिकं प्रकाशते । अतः घटादौ तादृशचैतन्यप्रकाश्यत्वस्वरूपं फलव्याप्यत्वमस्ति । आवरणभङ्गार्था वृत्तिरिति मते भग्नावरणा चित् फलम् । प्रमाणजन्यान्तःकरणवृत्त्या अज्ञानावरणनाशः आवरणभङ्गः,

तादृशनाशोपहिता चित् फलम् । तथा च आवरणनाशोपहितचित्तादात्म्यमेव फलविषयत्वम् ।

वृत्तिव्याप्यत्वफलव्याप्यत्वसाधारणमिति तृतीयविकल्पः । अर्थात् वृत्तिव्याप्यत्वफलव्याप्यत्वोभयानुगतं दृश्यत्वमिति ।

कदाचित् कथञ्चित् चिद्विषयत्वमिति चतुर्थो विकल्पः । ज्ञानविषयत्वमेव चिद्विषयत्वम् । ज्ञानं च ब्रह्मैव , 'सत्यं ज्ञानमनन्तं ब्रह्म' इत्यादिश्रुतेः । ज्ञानविषयत्वञ्च दृश्यत्वम् । मिथ्यात्वानुमाने पक्षभूतानाम् अतीतादिविषयाणाम् इदानीं चिद्विषयत्वाभावात् तत्र दृश्यत्वहेतोरभावे भागासिद्धिः स्यात्, तन्निवारणाय कदाचित् चिद्विषयत्वमित्युक्तम् । साक्षात् चिद्विषयत्वं साक्षिभास्ये सुखादावेव वर्तते न घटादाविति तत्र भागासिद्धिवारणाय कथञ्चित् चिद्विषयत्वमित्युक्तम् । तथा च वृत्तिद्वारा घटादीनामपि चिद्विषयत्वात् न दोषः ।

पञ्चमो विकल्पः स्वव्यवहारे स्वातिरिक्तसंविदन्तरापेक्षानियतित्वमिति । अर्थात् स्वव्यवहारे मिथ्यावस्तुनः घटादेः स्वप्रकाशार्थं स्वातिरिक्तं ज्ञानमपेक्षते । स्वातिरिक्तेति विशेषणेन संविदः स्वव्यवहारे स्वातिरिक्तसंविदपेक्षाभावेन न तत्र व्यभिचारः । नियतिरिति पदेन व्याप्यत्वमित्यर्थः विवक्षितः ।

अस्वप्रकाशत्वमिति षष्ठो विकल्पः । परप्रकाश्यत्वं दृश्यत्वमिति विवक्षितार्थः । स्वप्रकाशत्वं नाम अवेद्यत्वे सति अपरोक्षव्यवहारविषयत्वयोग्यत्वात्यन्ताभावानधिकरणत्वम्, तदभावः परप्रकाश्यत्वमिति ।

इमान् षडपि विकल्पान् प्रत्येकशः खण्डयति पूर्वपक्षी – वृत्तिव्याप्यत्वं दृश्यत्वमिति प्रथमविकल्पस्वीकारे आत्मनि व्यभिचारः । साध्याभाववद् वृत्तित्वं हि हेतोः व्यभिचारः । अत्र साध्यं मिथ्यात्वं, साध्याभावः मिथ्यात्वाभावः, तदधिकरणम् आत्मा, तत्र तत्त्वमस्यादिवेदान्तवाक्यजन्याखण्डाकारवृत्तिविषयत्वसत्त्वात् दृश्यत्वहेतुरस्ति साध्यं मिथ्यात्वं नास्ति । अतो व्यभिचारः ।

एवं च आत्मनि व्यभिचारादेव मण्डूकप्लुतिन्यायेन वृत्तिव्याप्यत्वफलव्याप्यत्वान्यतरत्वमिति उभयसाधारणरूपः तृतीयोऽपि विकल्पः न सम्भवति ।

फलव्याप्यत्वं दृश्यत्वमिति द्वितीयकल्पस्वीकारे दृष्टान्ते शुक्तिरूप्यादौ साधनवैकल्यापत्तिः । तद्यथा शुक्तिरूप्यस्य साक्षिभास्यत्वेन वृत्तिव्याप्यत्वाभावात् फलव्याप्यत्वमपि नास्ति । तथा च हेतोरभावात् साधनवैकल्यम् ।

कदाचित् कथञ्चित् चिद्विषयत्वमिति चतुर्थकल्पोऽपि न सम्भवति, ब्रह्मणि व्यभिचारत् । ब्रह्म पूर्वं न ज्ञातम् इदानीं वेदान्तवाक्येन ज्ञातमित्यनुभवानुरोधेन तत्र कथञ्चित् कदाचित् चिद्विषयत्वस्य सत्वात् व्यभिचारः ।

स्वव्यवहारे स्वातिरिक्तसंविदन्तरापेक्षानियतित्वं दृश्यत्वमिति पञ्चमपक्षोऽपि न सम्भवति, ब्रह्मण्येव व्यभिचारात् । तथा च स्वं ब्रह्म स्वव्यवहारः नित्यत्वादिव्यवहारः तत्र संविदन्तरस्य नित्यत्वादिविशेषणज्ञानस्यापेक्षासत्त्वात् ।

षष्ठः अस्वप्रकाशत्वरूपः विकल्पोऽपि न युज्यते । यतः अवेद्यत्वे सति अपरोक्षव्यवहारयोग्यत्वाभावः अस्वप्रकाशत्वम् । एवञ्च दृष्टान्ते शुक्तिरूप्ये अपरोक्षव्यवहारयोग्यत्वस्यैव सत्त्वेन साधनवैकल्यापत्तिः । एवं पूर्वपक्षिणा षडपि विकल्पाः दूषिताः ।

अत्रोच्यते – दृश्यत्वहेतुनिर्वचने पूर्वपक्षिणा उत्थापितानां षण्णां विकल्पानां मध्ये फलव्याप्यत्वमिति पक्षं परित्यज्य अन्येषां सर्वेषां पक्षाणां विचारसहत्वमस्ति । वृत्तिव्याप्यत्वं दृश्यत्वमिति पक्षे ब्रह्मणि व्यभिचारो नास्ति, यतः शुद्धब्रह्म न दृश्यम्, 'यत्तदद्रेश्य'मित्यादिश्रुत्या अनुपहितस्यैव ब्रह्मणः अदृश्यत्वस्वीकारात् शुद्धे वृत्तिविषयत्वं नास्ति । उपहितं ब्रह्म वृत्तिविषयः, तत्तु मिथ्यैव । ननु शुद्धस्य ब्रह्मणः वृत्तिविषयत्वाभावे शुद्धब्रह्मणः सिद्धिः कथमिति चेत् उच्यते – शुद्धस्य स्वतःप्रकाशत्वेन वृत्तिविषयत्वाभावेऽपि न तस्य असिद्धिः ।

ननु अज्ञाते धर्मिणि कस्यचिद्धर्मस्य विधातुं निषेद्धुं वा अशक्यत्वेन शुद्धे दृश्यत्वनिषेधाय शुद्धस्य वृत्तिविषयत्वमभ्युपेयम्, तथा च ब्रह्मणि व्यभिचारः इति चेन्न यतः स्वप्रकाशत्वेन स्वतःसिद्धे ब्रह्मणि 'यत्तदद्रेश्य'मित्यादिश्रुत्या दृश्यत्वनिषेधः क्रियते । यदि पुनः 'शुद्धं स्वप्रकाशम्' इति प्रतीतिविषयत्वात् शुद्धस्य वृत्तिविषयत्वाभावे स्वप्रकाशत्वमपि असिद्धमिति चेन्न वृत्तिकाले वृत्तिरूपवैशिष्ट्यात् न तस्य शुद्धत्वम् । शुद्धस्य वृत्तिविषयत्वं न सम्भवतीत्यतः 'शुद्धं स्वप्रकाशम्' इति वाक्यस्य लक्षणया अशुद्धत्वमस्वप्रकाशत्वव्यापकमित्यर्थः । तथा च यत्र यत्र अस्वप्रकाशत्वं तत्र तत्र अशुद्धत्वमितिवत् व्यतिरेकव्याप्तौ यत्र यत्र अशुद्धत्वाभावः तत्र तत्र अस्वप्रकाशत्वाभाव इति शुद्धे अशुद्धत्वाभावेन अस्वप्रकाशत्वाभावरूपं स्वप्रकाशत्वं सिध्यति । एवमेव शुद्धं न दृश्यं न मिथ्या इत्यस्यापि अशुद्धत्वं दृश्यत्वमिथ्यात्वयोः व्यापकमित्यर्थः ।

एवं च यस्मात् शुद्धे ब्रह्मणि वृत्तिव्याप्यत्वं नास्ति तस्मात् उभयसाधारणमिति तृतीयेऽपि कल्पे न व्यभिचारः ।

कदाचित् कथञ्चित् चिद्विषयत्वं दृश्यत्वमिति स्वीकारेऽपि न पूर्वोक्तरीत्या आत्मनि व्यभिचारः । पूर्वोक्तरीत्यैव शुद्धे चिद्विषयत्वस्याभावात् उपहितस्य च मिथ्यात्वाभ्युपगमात् । अयमपि पक्षः युक्त एव ।

स्वव्यवहारे स्वातिरिक्तसंविदपेक्षानियतिरूपं दृश्यत्वमिति पक्षोऽपि युक्तः । तथा च स्वव्यवहारे स्वातिरिक्तसंविदपेक्षानियतित्वमित्यस्य स्वगोचरयावद् व्यवहारे स्वातिरिक्तसंविदपेक्षाकत्वमित्यर्थः । ब्रह्मणः नित्यत्वादिरूपव्यवहारे वेदान्तवाक्यजन्यायाः संविदः अपेक्षितत्वेऽपि यावद्व्यवहारान्तर्गते नित्यसिद्धे स्फुरणरूपव्यवहारे स्वातिरिक्तसंविदपेक्षायाः अभावेन न ब्रह्मणि व्यभिचारः ।

एवमेव अस्वप्रकाशत्वं दृश्यत्वमिति षष्ठे पक्षेऽपि न दोषः । यतः ब्रह्म स्वप्रकाशम् । स्वप्रकाशत्वं च स्वापरोक्षत्वे स्वातिरिक्तानपेक्षत्वम् । अन्यानधीनापरोक्षत्वमिति तदर्थः । तद्भिन्नत्वं च अस्वप्रकाशत्वरूपं दृश्यत्वम् । तथा च 'यत्साक्षादपरोक्षात् ब्रह्म' इत्यादिश्रुत्या ब्रह्मणः अपरोक्षत्वे अन्यानधीनत्वसत्त्वेन न तत्र व्यभिचारः । शुक्तिरूप्येऽपि अन्यानधीनापरोक्षत्वाभावात् न साधनवैकल्यम् ।

एवं उक्तपञ्चसु विकल्पेषु पूर्वपक्षिणा उत्थापिताः सर्वेऽपि दोषाः वारिताः । अतः दृश्यत्वहेतुः मिथ्यात्वसाधकः ।

# प्रकृत्यधिकरणम्

**विद्वान् निरञ्जन भट्टः**
वेदान्तविभागः
रा.सं.सं. राजीवगान्धीपरिसरः, श्रृङ्गेरी

वेदान्तशास्त्रस्य आधारभूते प्रस्थानत्रये अन्यतमं भवति चतुरध्यायात्मकं ब्रह्मसूत्रम् । तत्र प्रथमस्य समन्वयाध्यायस्य प्रथमे पादे – "**अथातो ब्रह्मजिज्ञासा**[१]" इत्यनेन यथा अभ्युदयहेतुत्वात् धर्मो जिज्ञास्यः तथैव निःश्रेयसहेतुत्वात् साधनचतुष्टयसम्पत्त्यनन्तरं ब्रह्म जिज्ञासितव्यमित्युक्तम् । तच्च जिज्ञास्यं ब्रह्म किं लक्षणकमिति आक्षेपे सति "यतो वा इमानि भूतानि जायन्ते । येन जातानि जीवन्ति । यत्प्रयन्त्यभिसंविशन्ति" इति श्रुत्या 'अस्य प्रत्यक्षादिसन्निधापितस्य नामरूपात्मकप्रपञ्चस्य जन्मस्थितिभङ्गं यस्मात् सर्वज्ञात् सर्वशक्तेः कारणात् भवति तद्ब्रह्म' इति सामान्यतया जगत्कारणत्वं लक्षणमुक्तम् – "**जन्माद्यस्य यतः**[२]" इति । ततः समन्वयाध्यायस्य चतुर्थपादस्य उपान्तिमाधिकरणपर्यन्तं सर्वेषां वेदान्तवाक्यानामद्वितीये ब्रह्मण्येव समन्वयं प्रदर्शयन्ति सूत्रकाराः । सर्ववेदान्ततात्पर्यभूतस्य ब्रह्मणः जन्माद्यधिकरणे सामान्यतया जगत्कारणत्वलक्षणं यदुक्तं तस्य विशेषजिज्ञासया इदं प्रकृत्यधिकरणमारभ्यते इति तेनास्य सङ्गतिः । यथा घटस्य मृदुपादानकारणम्, रुचकादीनां सुवर्णम् उपादानकारणम्, यथा च घटं प्रति कुलालः, रुचकादीन् प्रति सुवर्णकारः निमित्तकारणं तथैव ब्रह्मणः जगत्कारणत्वमपि निमित्तोपादानोभयसाधारणं भवितुमर्हति इत्यतः अत्र विमर्शः जायते ।

तथा च कीदृशं कारणत्वं ब्रह्मणः भवितुमर्हति इति चेत् निमित्तकारणत्वमेव ब्रह्मणः भवितुमर्हति । तत्र प्रथमो हेतुः '**ईक्षापूर्वककर्तृत्वश्रवणात्**' इति । "स ईक्षाञ्चक्रे । स प्राणमसृजत" इति ईक्षापूर्वकं कर्तृत्वं तावद् ब्रह्मणः श्रूयते श्रुतिषु । ईक्षापूर्वककर्तृत्वं च घटादीनां निमित्तकारणे कुलालादावेव दृश्यते । घटकर्ता कुलालः घटसर्जनकाले घटविषयकम् ईक्षणं कृत्वा घटं निर्माति इति तु दृष्टं लोके । तस्मात् ब्रह्म न प्रकृतिः कर्तृत्वात् कुलालादिवत् इति सिध्यति । तथैव घटादिरूपकार्यं भिन्नकर्त्रुपादानकम् इति लोकदृष्टान्तेनैव ज्ञायते । तथा च – जगत् भिन्नकर्त्रुपादनकं कार्यत्वात् घटवत् इति । अयं न्यायः आदिकर्तरि परमेश्वरेऽपि युक्तः । '**ईश्वरत्वप्रसिद्धेः**' इति द्वितीयो हेतुः । यथा लोके

---

[१] ब्र.सू.१.१.१

[२] ब्र.सू.१.१.२

ISSN 2249-538X

राजादयः ईश्वराः सर्वेषु कार्येषु निमित्तकारणं भवन्ति । तेषां सान्निध्यमात्रेण सर्वं कार्यं सुष्ठु प्रचलति तद्वदेव परमेश्वरस्यापि ईश्वरत्वसामान्यात् तस्यापि निमित्तकारणत्वमात्रं स्यात् । तथा च – ब्रह्म न उपादानम् ईश्वरत्वात्, राजादिवत् इति । एवमेव ब्रह्म च चेतनम्, शुद्धम्, निरवयवमिति श्रूयते – "निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्[१]" इति । जगच्च अचेतनम् अशुद्धं, सावयवं च दृश्यते । कार्यं सर्वं कारणसरूपं दृश्यते । जगच्च कार्यं ब्रह्मविलक्षणं दृश्यते इत्यतः जगतः प्रकृतिः ब्रह्म न भवति । तथा च – जगत् न ब्रह्मप्रकृतिकं तद्विलक्षणत्वात् यदित्थं तत्तथा, कुलालादिविलक्षणघटादिवत् इति । तस्मात् निमित्तकारणमेव ब्रह्म इति सिध्यतीत्यतः ब्रह्मभिन्नमेव अचेतनम् अशुद्ध्यादिगुणकं स्मृतिप्रसिद्धं प्रधानमेव जगदुपादानमिति अवशिष्यते । ब्रह्मणः जगत्कारणत्वश्रुतिस्तु केवलं निमित्तकारणत्वमेव बोधयति इति पूर्वपक्षः ।

सिद्धान्तः आरभ्यते – **"प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्[२]"** इति । ब्रह्म प्रकृतिः उपादानकारणम् अभ्युपगन्तव्यम् इति तदर्थः । चकारेण निमित्तकारणत्वग्रहणम् । तत्र हेतुः भवति '**प्रतिज्ञादृष्टान्तानुपरोधात्**' इति । जगतः उपादानकारणं निमित्तकारणं च ब्रह्म इति अभ्युपगम्यते चेदेव श्रुतिनिर्दिष्टौ प्रतिज्ञादृष्टान्तौ न बाध्येते । तत्र छान्दोग्ये तावत् प्रतिज्ञा श्रूयते – "उत तमादेशमप्राक्ष्यो येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातम्[३]" इति । अनेन वाक्येन एकस्मिन् विज्ञाते सति सर्वं विज्ञातं भवति इति एकविज्ञानेन सर्वविज्ञानप्रतिज्ञा ज्ञायते । तच्च ब्रह्मणः उपादानकारणग्रहणेनैव सम्भवति । निमित्तकारणाभिन्नत्वं तु कार्यस्य नास्ति । यथा तक्षा प्रासादादीनां निमित्तकारणं स्वकार्यापेक्षया भिन्न एव । कार्यं सर्वम् उपादानकारणव्यतिरेकेण न भवति इत्यतः उपादानकारणस्य ज्ञाने सति तद्विकाराणां सर्वेषामपि ज्ञानं सम्भवति इति तत्रैव दृष्टान्तोऽपि दीयते – "यथा सौम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्याद्वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्[४]" इति । तथैव "एकेन लोहमणिना सर्वं लोहमयं विज्ञातं स्यात्[५]", "एकेन नखनिकृन्तनेन सर्वं कार्ष्णायसं विज्ञातं स्यात्[६]" इत्यपि दृष्टान्तः छान्दोग्ये

---

[१] श्वे.उ. ६.१९

[२] ब्र.सू. १.४.२३

[३] छा.उ. ६.१.२

[४] छा.उ. ६.१.४

[५] छा.उ.६.१.५

[६] छा.उ. ६.१.६

प्रदर्शितः । एवमेव मुण्डकेऽपि प्रतिज्ञा श्रूयते – "कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवतीति[१]" इति । दृष्टान्तोऽपि – "यथा पृथिव्यामोषधयः सम्भवन्ति[२]" इति च । बृहदारण्यके प्रतिज्ञा श्रूयते यथा – "आत्मनि खल्वरे दृष्टे श्रुते मते विज्ञाते इदं सर्वं विदितम्[३]" इति । तत्रैव दृष्टान्तः – "स यथा दुन्दुभेर्हन्यमानस्य न बाह्याञ्शब्दाञ्शक्नुयाद्ग्रहणाय दुन्दुभेस्तु ग्रहणेन दुन्दुभ्याघातस्य वा शब्दो गृहीतः[४]" इति । एवं प्रतिवेदान्तं प्रतिज्ञादृष्टान्तौ उपादानविषयकौ एव श्रूयेते ।

'यतो वा इमानि भूतानि जायन्ते[५]' इत्यत्रापि 'यत' इति "जनिकर्तुः प्रकृतिः[६]" इत्यनेन सूत्रेण जायमानस्य कार्यस्य प्रकृतिः उपादानकारणम् अपादानसंज्ञं स्यात् इति अपादानसंज्ञां प्राप्य "अपादाने पञ्चमी[७]" इति प्रकृत्यर्थे एव पञ्चमीविभक्तिं प्राप्नोति । निमित्तकारणत्वं तु ब्रह्मव्यतिरिक्ताधिष्ठाता अन्यः नास्तीत्यत एव तस्य सम्भवति । यथा लोके मृत्, सुवर्णमित्यादीनि यानि उपादानकारणानि विद्यन्ते तेषां प्रवृत्तिः कुलालसुवर्णाकारादिभिः अधिष्ठातृभिरेव भवति । किञ्च जगदुपादानभूतस्य ब्रह्मणः तस्मादन्यः अधिष्ठाता न अपेक्ष्यते । उत्पत्तेः पूर्वं तस्य एकमेवाद्वितीयमिति अवधारणश्रवणात् । यदि उपादानादन्यः कश्चन अधिष्ठाता अङ्गीक्रियते तर्हि एकविज्ञानेन सर्वविज्ञानं न सम्भवति इत्यतः प्रतिज्ञादृष्टान्तयोः उपरोधः प्रसज्येत । अत एव अधिष्ठात्रन्तराभावः ज्ञातव्यो भवति । तस्मादेव ब्रह्मणः कर्तृत्वम् , तस्मादन्यत् उपादानकारणं नास्तीत्यतः प्रकृतित्वमपि सम्भवति ।

एकस्यैव उभयविधकारणत्वं सम्भवति इति सूत्रचतुष्टयेन साध्यते । तत्र ब्रह्मणः उपादानत्वं निमित्तत्वं च सम्भवति इति अभिध्योपदेशात् ज्ञायते इति निरूपयति – **अभिध्योपदेशाच्च[८]** इति । अभिध्या सृष्टिसङ्कल्पः । "सोऽकामयत बहु स्यां प्रजायेय[९]",

---

[१] मु.उ. १.१.३

[२] मु.उ. १.१.७

[३] बृ.उ. ४.५.६

[४] बृ.उ.४.५.८

[५] तै.उ.३.१

[६] पा.सू. १.४.३०

[७] पा.सू. २.३.२८

[८] ब्र.सू. १.४.२४

[९] तै.उ.२.६

"तदैक्षत बहु स्यां प्रजयेय[१]" इति सृष्टिसङ्कल्पः ब्रह्मणः श्रूयते । तत्र अभिध्यानम् आदौ कृत्वा तदनन्तरं स्वतन्त्रतया सृष्टौ प्रवर्तते इत्यतः ब्रह्म कर्तृ इति ज्ञायते । तथैव 'बहु स्याम्' इत्यत्र बहुभवनस्य विषयः प्रत्यगात्मैव इत्यतः पुनः आत्मानमेव बहुधा व्याकरोति इति बहुभवनस्य प्रकृतिरपि ब्रह्मैव इति ज्ञातं भवति ।

ब्रह्मैव उपादानकारणमित्यत्र हेत्वन्तरं दीयते – **साक्षाच्चोभयाम्नानात्**[२] इति सूत्रेण । "सर्वाणि ह वा इमानि भूतानि आकाशादेव समुत्पद्यन्ते । आकाशं प्रत्यस्तं यन्ति[३]" इति श्रुतिः आकाशशब्दितात् ब्रह्मण एव सर्वेषां भूतानाम् उत्पत्तिः । तस्मिन्नेव च लयं गच्छन्ति इति ब्रह्मैव साक्षात् सर्वस्यापि उपादानकारणमिति प्रतिपादयति । इदमत्र प्रसिद्धम् – यद्धि यस्मात् प्रभवति यस्मिँश्च प्रलीयते तत्तस्योपादानमिति । तत्र दृष्टान्तः – यथा व्रीहियवादयः पृथिव्या एव उत्पद्यन्ते, तत्रैव लयं प्राप्नुवन्ति इति पृथिवी व्रीहियवादीनाम् उपादानकारणम् । 'आकाशादेव' इति श्रुतिः एवकारेण तस्मादन्यदुपादानकारणं नास्ति इति साक्षादेव वदति । तस्मादपि ब्रह्मणः प्रकृतित्वं सिद्ध्यति ।

**आत्मकृतेः परिणामाद्**[४] इत्यनेनापि कारणद्वयमपि ब्रह्मैव इति प्रतिपाद्यते ।

कृतेराश्रयः विषयश्च आत्मैव इत्यतः आत्मसम्बन्धिनी कृतिः आत्मकृतिः । तैत्तिरियोपनिषदि ब्रह्मप्रकरणे – "तदात्मनं स्वयमकुरुत[५]" इति आत्मन एव 'आत्मानम्' इति कर्मत्वं, 'स्वयमकुरुत' इति कर्तृत्वं चोक्तम् । तथा च लोके कृतेः आश्रयः कर्ता पूर्वमेव सिद्धो भवति, कृतिविषयस्तु साध्य इति सन्देहो भवेदित्यतः उच्यते परिणामात् इति । आत्मा तु पूर्वसिद्धोऽपि सन् विकारात्मना विशेषेण परिणामं प्राप्नोति इति विरोधो नास्तीत्यर्थः । घटादिविकारात्मना परिणामः मृदादिषु उपादानकारणेषु एव लभ्यते । 'स्वयम्' इति आत्मनो विशेषणश्रवणाच्च तद्व्यतिरेकेण निमित्तान्तरानपेक्षत्वं ज्ञातं भवति ।

योनिशब्दश्रवणादपि ब्रह्मणः प्रकृतित्वमेव भवितुमर्हति इति निरूप्यते – **योनिश्च हि गीयते**[६] इति । मुण्डकोपनिषदि तावत् – "कर्तारमीशं पुरुषं ब्रह्मयोनिम्[७]", "यद्भूतयोनिं

---

[१] छा.उ.६.२.३

[२] ब्र.सू.१.४.२५

[३] छा.उ. १.९.१

[४] ब्र.सू.१.४.२६

[५] तै.उ.२.६

[६] ब्र.सू.१.४.२७

[७] मु.उ.३.१.३

“यद्भूतयोनिं परिपश्यन्ति धीराः[१]” इति भूतानां योनित्वं ब्रह्मणः एव श्रूयते । लोके तु योनिशब्दः उपादानकारणे प्रसिद्धो दृश्यते – ‘पृथिवी योनिरोषधिवनस्पतीनाम्’ इति । अस्यामेव उपनिषदि दृष्टान्तरूपो वाक्यशेषोऽपि इममेवार्थं प्रमाणयति – “यथोर्णनाभिः सृजते गृह्णते च[२]” इति । तस्मात् जगतः उपादानकारणमपि ब्रह्मैव इति सिध्यति । पूर्वम् आक्षिप्तरीत्या लोके ईक्षणपूर्वककर्तृत्वं तु उपादानकारणभिन्ने कुलालादौ निमित्तकारणे एव सम्भवति इति यदुक्तं तच्च अलौकिकेऽपि अन्वितो भवेदिति नियमो नास्ति । अस्य अतीन्द्रियार्थत्वात् अत्र आगम एव प्रमाणभूतः न तु लौकिकप्रमाणम् । श्रुतिश्च ब्रह्मणः प्रकृतित्वं निमित्तकारणत्वमिति उभयविधकारणत्वं वदतीत्यतः ब्रह्मैव प्रपञ्चस्य अभिन्ननिमित्तोपादानकारणमिति ज्ञायते ।

---

१ मु.उ.१.१.६

२ मु.उ.१.१.७

# अनुपलब्धिः

**प्रो. सुब्राय वि भट्टः**
मीमांसाविभागाध्यक्षः
रा.सं.सं. राजीवगान्धीपरिसरः, शृङ्गेरी

वेदवाक्यानां तात्पर्यार्थनिर्णयद्वारा धर्माधर्मविवेचनार्थं प्रवृत्तमिदं मीमांसाशास्त्रम् । मानाधीना मेयसिद्धिरिति नियमेन धर्मरूपप्रमेयसिद्धये बहूनि प्रमाणानि अङ्गीचक्रुः मीमांसकाः । तानि च श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यारूपाणि अङ्गताग्राहकप्रमाणनि । श्रुत्यर्थपाठस्थानमुख्यप्रवृत्त्याख्यानि क्रमबोधकप्रमाणानि । एवं प्रत्यक्षम्, अनुमानम्, शब्दः, उपमानम्, अर्थापत्तिः, अनुपलब्धिश्चेति प्रमेयबोधकानि षड्प्रमाणानि । तत्र षष्ठं प्रमाणम् अनुपलब्धिः । अनुपलब्धेः अतिरिक्तप्रमाणत्वविषये अस्ति दार्शनिकानां मतभेदः ।

यतो हि – प्रत्यक्षमेकमेव प्रमाणमिति वादिनः चार्वाकाः तदतिरिक्तं प्रमाणमेव नास्तीति तेषां मते सर्वं प्रत्यक्षगम्यम् इति । बौद्धमते तु प्रत्यक्षव्यतिरिक्तः सर्वोऽपि प्रमेयभागः अनुमानप्रमाणगम्य इति ।

प्राभाकरमीमांसकमते अभावः अधिकरणस्वरूपः इति । अधिकरणञ्च भावरूपमिति भावग्राहकप्रमाणैरेव अवगम्यते इति तेषामपि अनुपलब्धिप्रमाणस्य प्रसक्तिर्नास्ति । पञ्चैव प्रमाणानि ।

नैयायिकमते अभावविषये विप्रतिपत्तिर्नास्ति । किन्तु सः योग्यानुपलब्धिसहकृतप्रत्यक्षगम्यः इति तेषामाशयः । किन्तु मीमांसकास्तु अभावः प्रत्यक्षादिभिः गृहीतुं न शक्यते इति तद्ग्रहणार्थम् अनुपलब्ध्याख्यम् अतिरिक्तं प्रमाणमङ्गीकुर्वन्ति ।

तेषामयमाशयः –

**अथोपलम्भयोग्यत्वे सत्यप्यनुलम्भनम् ।**
**अभावाख्यं प्रमाणं स्यादभावस्यावबोधकम् ॥** इति ।

घटादिवस्तुनः उपलम्भयोग्यत्वे सत्यपि अनुपलम्भः अभावाख्यं प्रमाणम् । ततश्च विषयभूतः घटः तदधीनेन्द्रियसन्निकर्षादीन् विना यत् चक्षुरुन्मीलन, आलोकसम्पात, मनःप्रणिधानादिकं घटोपलम्भकारणं सर्वं सञ्जातमित्यवगमे सति तत्सहकृतः सन् घटानुपलम्भः घटाभावं बोधयति ।

अत्र अनुपलम्भः करणम् ।तस्य च ज्ञानाभावरूपत्वात् अभावः प्रमाणमित्युच्यते ।

ISSN 2249-538X

तदुक्तं भाष्ये –"अभावोऽपि प्रमाणाभावः नास्तीत्यस्यार्थस्य असन्निकृष्टस्य"। इति । तत्र अभावः इति लक्ष्यनिर्देशः । प्रमाणाभावः इति लक्षणम् । नास्तीत्यस्यार्थस्य असन्निकृष्टस्य इति प्रमेयनिर्देशः लक्ष्यस्वरूपबोधको वा । प्रत्यक्षाद्यर्थापत्तिपर्यन्तस्य यथाविषयमनुत्पत्तिः अभावप्रामाणस्य लक्षणमित्यर्थः ।

प्रत्यक्षाद्यनुत्पत्तिस्तु – अभावरूपे वस्तुनि 'इह भूतले घटोनास्ती'ति यत् ज्ञानं तत् अभावाख्यं प्रमाणमित्यर्थः । नास्तीत्ययमर्थः प्रमाणाभावात्मकेन अभावप्रमाणेन अवगम्यते । अतः अभावोऽपि प्रमाणमित्यर्थः ।

प्रमाणाभावः कथं प्रमाणं भवितुमर्हति ? विरुद्धत्वात् इति चेत् तत्रोक्तं भट्टपादैः वार्तिके –

**प्रमाणपञ्चकं यत्र वस्तुरूपे न जायते ।**
**वस्तुसत्तावबोधार्थं तत्राभावप्रमाणता** ॥ इति ।(अ.प.)

प्रत्यक्षादिसदुपलम्भकप्रमाणपञ्चकाभिप्रायः अत्र प्रमाणशब्दः । तदभावश्च षष्ठस्य लक्षणम् । तेन वस्तुसत्तावबोधार्थं प्रमाणपञ्चकं यत्र घटादौ वस्तुरूपे सत्यामेव प्रसक्तौ न जायते तत्र घटादौ अभावस्य प्रामाण्यम् ।

ननु अप्रमीयमाणे घटे कथमभावस्य प्रामाण्यमिति चेत् – तत्राह भाष्यकारः – "नास्तीत्यस्यार्थस्य असन्निकृष्टस्य" इति ।

लोके सर्वं वस्तुजातं सद्रूपेण असद्रूपेण च द्विविधम् । यत्र सद्रूपेण वर्तते घटादि तत्र प्रत्यक्षादिना अस्तीति प्रतीयते ।

यत्र तु असद्रूपेण वर्तते तत्र सद्रूपग्राहकाणां प्रत्यक्षादीनां सद्रूपबोधनाय उत्पत्तुं योग्यतायां सत्यामपि यः अनुत्पत्तिः दृश्यादर्शनं योग्यानुपलम्भो वा नास्तीत्यमुमर्थं बोधयति इत्यर्थः। तदुक्तम् –

**स्वरूपपररूपाभ्यां नित्यं सदसदात्मके ।**
**वस्तुनि ज्ञायते कश्चित् रूपं किञ्चित् कदाचन** ॥ इति ।(श्लो.वा.अ.प.)

अभावप्रमां प्रति कारणीभूतः अनुपलम्भः द्विविधः – प्रमाणाभावः स्मरणाभावश्च इति ।

तत्र घटाद्यभावज्ञानं प्रत्यक्षप्रमाणाभावरूपादनुपलम्भात् । एवं – प्रातरिह चैत्रो नासीदिति सायङ्काले यज्ज्ञानं तत् स्मरणाभावरूपात् अनुपलम्भात् । तत्र प्रातःकालावच्छिन्नस्य चैत्रस्य सायङ्काले दर्शनयोग्यत्वं नास्ति । तस्य इन्द्रियसन्निकर्षाभावात् । किन्तु स्मरणयोग्यतायां सत्यामपि अस्मरणमेव तत्र प्रातःकालावच्छिन्नचैत्राभावबोधकतया आश्रियते ।

अभावः न प्रत्यक्षगम्यः । यदि प्रत्यक्षत्वं कथ्यते कश्चन इन्द्रियसन्निकर्षः वक्तव्यः । न तावत् संयोगः, द्रव्ययोरेव संयोगात् । अविद्यमानेन सह सम्बन्धो नोपपद्यते । संयुक्तविशेषणत्वं सन्निकर्षः अथवा विशेष्यविशेषणभावः सन्निकर्षः इति चेत् – असति सम्बन्धे विशेषणत्वं न सम्भवति । भूतलघटाभावयोः न कश्चित् सम्बन्धोऽस्ति । येन अभावः तद्विशेषणं स्यात् । सम्बन्धं विनापि विशेष्यविशेषणभावे हिमवद्विन्ध्ययोरपि विशेषणविशेष्यभावः स्यात् । अतः सन्निकर्षाभावादेव न प्रत्यक्षगम्यः अभावः । तदुक्तम्–

**न तावदिन्द्रियैरेषा नास्तीत्युत्पद्यते मतिः ।**

**भावांशेनैव संयोगो योग्यत्वादिन्द्रियस्य हि ॥** इति ।(श्लो.वा.अ.प.)

कथं तर्हि अभावज्ञानं जायते इति चेत् – अनुपलब्धिप्रमाणेन इत्युच्यते । तदुच्यते–

**गृहीत्वा वस्तुसद्भावं स्मृत्वा च प्रतियोगिनम् ।**

**मानसं नास्तिताज्ञानं जायतेऽक्षानपेक्षणात् ॥** इति ।(श्लो.वा.अ.प.)

आश्रयसद्भावे गृहीते प्रतियोगिनि च स्मृते दृश्यादर्शनसहायेन मानसम् अभावज्ञानं जायते । तत्र इन्द्रियव्यापारो नास्ति ।

दृश्यादर्शनम् अभावे प्रमाणं न अदर्शनमात्रम् । तत्र भावांशे इन्द्रियव्यापारः अभावतत्सम्बन्धयोस्तु अनुपलब्धिः व्याप्रियते । यथा क्षीरादिद्रव्ये जिह्वागते द्रव्यरूपं त्वचा, तस्य च माधुर्यं द्रव्यसम्बन्धश्च रसनेन इत्युभाभ्यां माधुर्यविशिष्टक्षीरज्ञानं जायते । यत्र च विशेष्यविशेषणसम्बन्धः प्रत्यक्षः तत्रैव विशिष्टस्वरूपस्य प्रत्यक्षत्वम् । अन्यत्र तु येनैव प्रमाणेन सम्बन्धग्रहणं तदेव विशिष्टस्वरूपस्य प्रमाणम् । तथा च पर्वते अग्निसम्बन्धस्य आनुमानिकत्वात् विशिष्टरूपमपि आनुमानिकम् ।

अत्रापि अभावसम्बन्धस्य अनुपलब्धिप्रमाणगम्यत्वात् अभावविशिष्टभूतलबोधोऽपि अभावप्रमाणक एव । न तत्र इन्द्रियस्य व्यापारः ।

ननु सर्वस्य प्रमाणस्य भावरूपत्वमेव दृष्टम् । तत्कथम् अभावस्य प्रामाण्यं स्यात् इति चेत् – भावे प्रमेये भावरूपमेव प्रमाणम् । अभावे प्रमेये तु अभावरूपमेव प्रमाणम् । प्रमेयानुरूपत्वात् प्रमाणाङ्गीकरणस्य । तदुक्तम् –

**भावात्मके यथा मेये नाभावस्य प्रमाणता ।**

**तथैवाभावमेयेऽपि न च भावप्रमाणता ॥**

**भावात्मकस्य मानत्वं न च राजाज्ञया स्थितम् ।**

**परिच्छेदफलत्वाद्धि प्रामाण्यं स्यात् द्वयोरपि ॥ (श्लो.वा.अ.प.)**

तर्हि अभावस्य अतिरिक्तप्रमाणत्वे स्वतन्त्रोपयोगः कः इति चेत् – स च दर्शितः भट्टपादैः–

**कर्माणि सर्वाणि फलैः समस्तैः सर्वैर्यथावच्च यदङ्गकाण्डैः ।**
**न सङ्गतानीह परस्परं च नाङ्गं तदेतत् प्रभवं क्रतूनाम् ॥ (श्लो.वा.अ.प.)**

सर्वप्रकारोऽपि अभावः अनुपलब्धिप्रमाणक एव । दर्शादेः श्रुत्यादिचोदित अङ्गातिरेकेण अङ्गान्तराभावे तथा श्रुत्यादिचोदितफलातिरेकेण फलान्तराभावे च अन्यत् आगमप्रमाणाभावात् अनुपलब्धिरेव प्रमाणम् ।

अभावः सदुपलम्भकप्रमाणैः प्रत्यक्षादिभिः गृहीतु न शक्यते इति अनुपलब्धेः अतिरिक्तप्रमाणत्वम् अवश्यमङ्गीकर्तव्यम् ।

॥ इति शम् ॥

# आतिथ्याबर्हिर्न्यायः

**डा. सूर्यनारायणभट्टः**
मीमांसाविभागः
रा.सं.सं. राजीवगान्धीपरिसरः, शृङ्गेरी

भगवता जैमिनिमहर्षिणा प्रणीतायां द्वादशलक्षण्यां चतुर्थाध्यायस्य द्वितीये पादे "**विधेः कर्मापवर्गित्वात् अर्थान्तरे विधिप्रदेशः स्यात् । अपि वा उत्पत्तिसंयोगात् अर्थसम्बन्धोऽविशिष्टानां प्रयोगैकत्वहेतुः स्यात्**" इति सूत्राभ्याम् आतिथ्याबर्हिर्न्यायः प्रदर्शितः ।

ज्योतिष्टोमेन स्वर्गकामो यजेत इत्यनेन विधिवाक्येन स्वर्गोद्देशेन ज्योतिष्टोमयागो विहितः ।अस्मिन् ज्योतिष्टोमप्रकरणे यदातिथ्यायां बर्हिः तदुपसदाम् , तदग्नीषोमीयस्य चेति श्रुतम् ।अयमेव अत्र विचारस्य विषयः ।विषयस्य प्रसङ्गस्तु इत्थम् – आतिथ्या नाम कश्चनेष्टिविशेषः । क्रीतं सोमं शकटे अवस्थाप्य प्राचीनवंशं प्रत्यानयने अभिमुखःयामिष्टिं निर्वपति सेयम्आतिथ्या।आतिथ्यायाः ऊर्ध्वं त्रिषु दिनेषु अनुष्ठीयमानो यागविशेषः उपसद् संज्ञकः । औपवसथ्ये दिने अनुष्ठेयः अग्नीषोमीयः ।एवमत्र प्रकरणे यदातिथ्यायां बर्हिः तदुपसदाम्, अग्नीषोमीयस्य च इत्यनेन वाक्येन यद् विधीयते तत् किमिति विचारो विधेयः । लोके देवदत्तस्य गौः यज्ञदत्ताय दीयतामित्युक्ते देवदत्तात् आछिद्य अर्थात् स्वीकृत्य यज्ञदत्ताय देया भवति एवमेव आतिथ्योद्देश्येन आनीतं यद् बर्हिः तत् ततः आछिद्य उपसदां कृते अग्नीषोमीयस्य कृते च उपयोक्तव्यम् ।तस्मात् आतिथ्यायां बर्हिषः उपादानमात्रम् । बर्हिर्जन्योपकारः कोऽपि आतिथ्यायां नास्ति । उपादानात् परं सर्वं बर्हिः अन्यत्रैव उपयोक्तव्यम् । प्रोक्षणादयो बर्हिधर्माः उपस्तरणादि बर्हिःकार्यं च सर्वमपि इतराभ्यामेव कर्तव्यम् इति प्रथमः कल्पः ।

यदि आतिथ्यायां केवलं उपदिश्य विना कार्यं इतरत्र उपयोगः क्रियते तर्हि अतिथ्यायां किमपि कार्यं नास्तीति प्राकृतकार्यकरित्वाभावात् अतिदेश एव न स्यात् । यतो हि आतिथ्यायां समानीतानां बर्हिषां केवलमानयनमात्रेण कोऽपि उपकारः नास्तीति आनीतानां अदृष्टार्थत्वं वक्तव्यम् । आतिथ्योद्देश्येन आनीतं बर्हिः अदृष्टं जनयतीति वक्तव्यम् ।तदा च अप्राकृतकार्यकरित्वापत्तिः दोषः । अतः अतिदेशो न स्यात् । इतराभ्यां कर्तव्यमिति यदुक्तं तन्न सम्भवति । परन्तु अतिदेशप्राप्तधर्माणां लोपेऽपि प्रमाणं नास्ति । अतः आच्छिद्य विधानं न सम्भवतीति प्रथम कल्पः नोपपद्यते ।

अतः आतिथ्यायां यद् बर्हिः उपयुक्तं तदेव बर्हिः उपसत्सु अग्नीषोमीयो च उपयोक्तव्यमिति विधीयेते । अयम् उपयुक्तस्य अन्यत्र उपयोगार्थं विधानं निरिष्टकोपदेश इत्युच्यते । निरवशेषं इष्टं यस्य तत् निरिष्टकम् । उपयुक्तस्य वचनबलात् अन्यत्र उपयोगार्थं स्वीकारः निरिष्टोपदेशः ।सम्प्रति आतिथ्यार्थं यद् बर्हिरानीतं तस्मिन् धर्माः अनुष्ठिताः प्रोक्षणादयः । परं तु तेषां प्रोक्षणादीनां कियत्पर्यन्तं स्थितिसामर्थ्यमिति जिज्ञासायां आतिथ्यायाः समाप्तिपर्यन्तमेव । इतरत्र तु अर्थात् उपसत्सु अग्नीषोमीये च केवलमुपादानमात्रं नास्ति अन्ये प्रोक्षणादिधर्माः पुनरनुष्ठेया एव ।

ननु उपसद्-यागः अपूर्वयागः इत्युच्यते । अत्र अपूर्वयागो नाम प्रकृतिपूर्वको न इत्यर्थः । क्लृप्तोपकारप्राकृताघारश्रवणेन अपूर्वत्वात् उपसत्सु अतिदेशो नास्तीति यावदङ्गानि श्रुतानि तावद्भिरङ्गैः सः अनुष्ठेयः । इति फलति ।

तथापि – उपसत् कृते बर्हिधर्माः न प्राप्यन्ते भवतु, परं तु तत्र क्लृप्तोपकारः यः आघारः श्रूयते तस्य कृते तु प्राकृतो धर्मः अपेक्षते । वेदिबर्हिर्न्यायेन वेदिबर्हिषां अङ्गप्रधानोभयार्थत्वमुक्तम् । अतः उपसदां कृते अत्र बर्हिः न स्वीक्रियते , परं तु यः आघारः वर्तते तदर्थत्वं बर्हिषामस्तीति बर्हिस्वीकारस्तु अतिदिश्यते । नो चेत् अप्राकृतकार्यकारित्वं स्यात् । अपि च प्रकृतौ तु बर्हिषां प्रतिपत्तिः विहिता वर्तते । आतिथ्यायां तु तादृशी प्रतिपत्तिः नैव कर्तव्या ।यदि क्रियते तर्हि बर्हिरेव नष्टं भवतीति अग्रे तेषामुपयोग एव कर्तुं नैव शक्यते । तस्मात् बर्हिषां दाहरूपप्रतिपत्तिकर्म अग्नीषोमीयान्ते कर्तव्यमिति सा प्रतिपत्तिः अग्नीषोमीयार्था एव नतु आतिथ्यार्था न वा उपसदर्थावा । अथवा आतिथ्या उपसदश्च खण्डेष्टयः । तस्मात् लोपोऽपि न दोषाय । तस्मात् निरिष्टकोपदेशः इति द्वितीयः पूर्वपक्षः ।

तृतीयपूर्वपक्षे तु –वचनं विना आतिथ्यायां स्वीकृतमेव बर्हिः उत्तरत्र न स्वीकर्तव्यम् अन्यदेव बर्हिः स्वीकर्तव्यम् ।यतो हि उपसदादिष्वपि लवनादीनां श्रवणात् तेषां लोपे प्रमाणाभावात् अन्यत्र उपयुक्तस्य बर्हिषः अन्यत्र उपयोगे शिष्टाचारविरोधात् आतिथ्यायां विहिताः आश्ववालं बर्हि इत्यादयः वैकृता ये बर्हिधर्माः त एव उत्तरत्रापि अनुष्ठेयाः अतः वाचनिकोऽतिदेश इति त्रिष्वपि न व्यक्ति ऐक्यं परं व्यक्तिभेदः इति अस्य आशयः ।

सिद्धान्तस्तु - त्रिष्वपि व्यक्त्यैक्यं विधीयते । तृतीयपूर्वपक्षे यदुक्तम् यदातिथ्यायां बर्हिः तदुपसदाम् अग्नीषोमीयस्य च इत्यत्र भिन्नमेव बर्हिः । धर्मास्तु त एव इति । परं बर्हिः पदे धर्मलक्षणायां प्रमाणं नास्ति ।अतः आतिथ्यायां बर्हिः यद्धर्मविशिष्टं तद्धर्मविशिष्टं बर्हिः

भवति उपसदाम् अग्नीषोमीयस्य च इति । अतः आतिथ्योपक्रमे लूयमानं बर्हिः त्रितयसाधारणमिति तत्र क्रियमाणा धर्माः अपि प्रतिपत्तिवत् साधारणाः ।प्रतिपत्तिस्तु अग्नीषोमीयस्यान्ते अनुष्ठेया ।

द्वितीयपूर्वपक्षे अन्यत्र उपयुक्तस्य अन्यत्रोपयोगः निरिष्टकोपदेश इत्युक्तम् ।परं तु ये धर्माःकृताः यदर्थं बर्हिरानीतं तत् न केवलं आतिथ्यायाः कृते त्रितयसाधारण्येन आनीयते । अनुष्ठिता धर्मा अपि त्रितयोद्देश्येनैव अनुष्ठिता इति अतिथ्यायाः समाप्तेः निरिष्टकत्वं न भवति । अर्थात् उपयुक्तस्य पुनरुपयोगो न भवतीति शिष्टाचारविरोधो नास्ति । तथापि केचन धर्माः आश्ववालादयः केवलं प्रकरणवशात् आतिथ्योद्देशेन विहिताः । तेषां धर्माणां प्रसङ्गवशात् इतरत्र उपकारकत्वमस्तीति स्यात् – यथा पश्वर्थमनुष्ठितानां धर्माणां पशुपुरोडाशार्थत्वमपि भवति । तत्र उपकारकत्वं भवतु नाम परं तु इतराङ्गत्वं तु न स्यात् केवलं आतिथ्याङ्गत्वं स्यात् इति शङ्का ।अस्याः समाधानं तावत् – यदातिथ्यायां बर्हिः तदुपसदाम् तदग्नीषोमीयस्य च इति यद् वाक्यं विहितम् तदुत्तरमेव आश्ववालत्वादिधर्मा विहिताः इति । एतद्धर्मविधौ उद्देश्यं किम् इति सन्देहे न केवलमातिथ्या किन्तु त्रितयमपि । एतद्वाक्यात् एतदिष्टित्रयगतं यत् त्रित्वं तदेव उद्देश्यत्वावच्छेदकम् । एतत्त्रित्वावच्छिन्नोदेश्येन धर्मा विधीयन्ते इति न दोषः ।वाक्यभेदोऽपि नास्ति ।

अपि च त्रित्वावाच्छिन्नोद्देशेन विधीयमाना एते धर्माः एकैकविकारेऽपि अतिदेशबलात् प्राप्नुवन्ति ।उद्देश्यावच्छेकतया त्रित्वं यत् स्वीकृतम् तत्तु वाक्यभेदपरिहारार्थम् । परं तु अपूर्वसाधनत्वमेव प्रयोजकं तत्तु एकैकविकृतावपि अस्तीति कृत्वा अतिदेशः अवश्यं भवति ।

॥इति सर्वं सुमङ्गलम्॥

ISSN 2249-538X 

# अभ्युदयेष्टिविचारः

**डा. एस्. वेङ्कटेशताताचार्यः**
मीमांसाविभागः
रा.सं.सं. राजीवगान्धीपरिसरः, शृङ्गेरी

दर्शपूर्णमासप्रकरणे दर्शयागस्य अकाले (चतुर्दश्याम्) उपक्रमे निमित्ते अभ्युदयेष्ट्याख्यं कर्म विहितम् । तत्किं दर्शयागाद्भिन्नं कर्म उत दर्शयागस्यैव गुणान्तरविशिष्टप्रयोगान्तरमात्रमित्यादयःतद्विषयकविचाराः षष्ठाध्याये पञ्चमे पादे आद्येषु षड्सु अधिकरणेषु कृताः ।तेऽत्र निबन्धे संक्षेपतो भाट्टदीपिकानुसारेण प्रस्तूयन्ते ।

(विषयसंशयसङ्गतयः)

[१]"यस्य हविर्निरुप्तं पुरस्ताच्चन्द्रमा अभ्युदेति त्रेधा तण्डुलान् विभजेत् ये मध्यमाः स्युः तानग्नये दात्रे पुरोडाशमष्टाकपालं कुर्यात् ये स्थविष्ठाः तनिन्द्राय प्रदात्रे दधंश्चरुं येऽणिष्ठाः तान्विष्णवे शिपिविष्टाय शृतेचरुमि"ति दर्शपूर्णमासप्रकरणे श्रुतम् । अत्र अभ्युदेतीत्यत्र अभि शब्दः [२]"अभिरभागे" इत्यनेन कर्मप्रवचनीयसंज्ञकः, तद्योगात् "हविः निरुप्तमि" त्यत्र [३]"कर्मप्रवचनीययुक्ते द्वितीया" इति द्वितीया । लक्षणत्वमभिद्योत्यम् । तदेव द्वितीयार्थः । तथा च यदीयनिरुप्तहविर्लक्षितश्चन्द्रोदय इत्यर्थः । निरुप्तं हविः समानकालिकत्वेन चन्द्रोदयं लक्षयतीति तस्य लक्षणत्वं सम्भवति । एतदेवाभिप्रेत्यभट्टभास्करभाष्ये [४]"यस्य निरुप्तं हविरभिलक्ष्य निर्वापे कृते पुरस्तात् पूर्वस्यां दिशि चन्द्रमा उदेति" इति "हविरभ्युद्यंश्चायं विपरीतफलः स्यात्" इति च उक्तमिति भाति । स इति अध्याहार्यम् । तस्य अग्रे उक्तेषु विभजेदित्यादिषु अन्वयः । अत्र प्रथमाधिकरणे संशयः – ये मध्यमाः इत्यादिवाक्यैः किम् चन्द्रोदयावच्छिन्नदिने प्रारम्भे निमित्ते नैमित्तिकानि दर्शाद्भिन्नानि कर्माणि विधीयन्ते उत दर्शयागस्यैव गुणान्तरविशिष्टप्रयोगान्तराणि विधीयन्ते इति । अत्र प्रकरणस्य दर्शपूर्णमासोभयसाधारण्येन हविःपदेन दर्शपूर्णमासोभयहविर्ग्रहणे प्राप्तेऽपि पूर्णमासहविर्निर्वापोत्तरं चन्द्रोदयस्य नियतत्वात् यस्येति पदेन सूचितं निमित्तत्वं नोपपद्यते, निमित्तस्य कादाचित्कत्वस्वभावात् । अतः हविःपदं दार्शिकहविःपरम् । दर्शे एव कदाचित् अमावास्याभ्रमेण चतुर्दश्यामेव प्रारम्भे कृते हविर्निर्वापोत्तरचन्द्रोदयरूपनिमित्तस्य कादाचित्कस्य सम्भवात् ।

अत्र तृतीयाधिकरणे किमस्मिन् कर्मणि चन्द्रोदयज्ञानात्पूर्वं कृतनिर्वापान्तप्रयोगस्य अधिकार उत कृतारम्भमात्रस्येति अधिकारविचारात् षष्ठे

चाधिकरणे किमत्र सन्नयत एव अधिकार उत असन्नयतोऽप्यधिकार इत्येवम् अधिकारविचारात् अधिकारनिरूपणपरे षष्ठेऽध्याये सङ्गतिर्लभ्यते । प्रथमाधिकरणं च एतत्कर्मस्वरूपविचारपरत्वेन तदुपोद्घातत्वात्सङ्गतं भवति । अन्यानि च अभ्युदयेऽष्टिविचाररूपाणि अधिकरणानि प्रसङ्गतः सङ्गतानि भवन्ति ।

नैमित्तिककर्माधिकारविचारात् पादसङ्गतिर्द्रष्टव्या ।अनन्तरसङ्गतिस्तावत् षष्ठचतुर्थान्त्याधिकरणे असन्नयतः शाखां विना प्रस्तरप्रहरणमित्युक्ते तत्प्रसङ्गात् असन्नयतः अभ्युदयेष्ट्यधिकारोऽस्ति न वेति संशयोदयाद् द्रष्टव्या ।

**(पूर्वपक्षः)**

दर्शयागतो भिन्नान्येव त्रीणि कर्माणि मध्यमादिवाक्यैर्विधीयन्ते । कर्मभेदश्चात्र वाक्यभेदापादकत्वेन पूर्वकर्मणि अनिविशमानाद्गुणाज्ज्ञायते । तथा हि – अत्र प्रथमयागे मध्यमतण्डुलोपादानकोऽष्टाकपालपुरोडाशो द्रव्यं, दातृत्वविशिष्टाग्निश्च देवता, द्वितीये स्थविष्ठतण्डुलप्रकृतिकदध्यधिकरणकचरुर्द्रव्यं, प्रदातृत्वविशिष्टइन्द्रो देवता । तृतीये अणिष्ठतण्डुलप्रकृतिकश्रृताधिकरणकचरुर्द्रव्यं, शिपिविष्टत्वविशिष्टो विष्णुर्देवता । सिद्धान्ते पूर्व(दर्श)यागीयतण्डुलदधिश्रृतद्रव्याणां प्राकृत(दार्शिक) देवतापनयपूर्वकं दातृत्वविशिष्टाग्न्यादिदेवतान्तर सम्बन्धविधानं स्वीक्रीयते । एवञ्च दर्शे तण्डुलप्रकृतिकद्रव्येण क्रियमाणो य आग्नेययागः तस्यैव मध्यमादितण्डुलप्रकृतिकद्रव्यकाणि त्रीणि प्रयोगान्तराणि, आग्नेययागीयप्रकृतिद्रव्यवत्त्वात् । द्वितीयतृतीययागौ च सान्नाययागप्रयोगावपि भवतः, सान्नायद्रव्यकत्वात् । एवञ्च अभ्युदयेष्टौ आग्नेययागस्य वारत्रयमभ्यासः, दधिपयोयागयोश्च स्थविष्ठाणिष्ठतण्डुलप्रकृतिकचरुद्रव्यकाग्नेययागाभ्यासाभ्यां सह तन्त्रेणानुष्ठानम्।असन्नयतः दधिपयोयागस्थाने ऐन्द्राग्न एकादशकपालपुरोडाशो दर्शे विहितः । तस्य तु दर्शे दधिपयोद्रव्याभावात् ततः देवतापनयःतत्र देवतान्तरसम्बन्धश्च न भवतः । तत्र ऐन्द्राग्नस्यापि तण्डुलप्रकृतिकद्रव्यकत्वात् असन्नयतः अभ्युदितेष्टिः ऐन्द्राग्नयागप्रयोगान्तररूपापि भवति ।तथा च तस्य आग्नेयैन्द्राग्नयोः तन्त्रेण वारत्रयमनुष्ठानम् । अत्र देवतादिगुणमात्रभेदेऽपि कर्म तु दार्शिकमेवेति सिद्धान्तस्थितिः ।

अत्र पूर्वपक्षी आक्षिपति – यदि कर्म तदेव, तर्हि मध्यमादिवाक्यैः प्राप्ते कर्मणि अनेकगुणविधानाद्वाक्यभेदः स्यात् । तथा हि – ये मध्यमा इति प्रथमवाक्येन मध्यमद्रव्यम् (वस्तुतः तण्डुलप्रकृतिकद्रव्यकयागे प्रकृतिद्रव्यस्य मध्यमत्वं विधेयम्) अष्टाकपालत्वरूपो द्रव्यधर्मः (आग्नेये प्राप्तत्वेऽपि ऐन्द्राग्ने अप्राप्तत्वात् असन्नयतश्च प्रथमयागस्य

आग्नेयैन्द्राग्नोभयरूपत्वात् अष्टाकपालत्वमपि विधेयमेव) अग्निदेवता, दातृत्वरूपस्तद्गुण-श्चेत्यावन्तो गुणा विधेयाः इति वाक्यभेदापत्तिः ।

द्वितीयवाक्ये च प्रकृतिद्रव्यगतं स्थविष्ठत्वं, द्रव्यस्य चरुत्वं, इन्द्रदेवता, प्रदातृत्वगुणः, दध्नः (सान्नायद्रव्यत्वेन प्राप्तस्य) अधिकरणत्वं चेत्येते गुणा विधेया इत्यतो वाक्यभेदः प्रसज्यते । एवं तृतीयवाक्ये अणिष्ठत्वं , चरुत्वं, विष्णुदेवता , शिपिविष्टत्वगुणः पयसोऽधिकरणत्वं चेति एतेषां गुणानां विधेयत्वाद्वाक्यभेदापत्तिः ।

न च दात्रादिपदानां यौगिकत्वात् यौगिकानां च पदानां द्रव्य(व्यक्ति)वाचित्वस्वीकारात् अग्न्यादिपदानाञ्च देवताविशेषवाचित्वेन तयोः सामानाधिकरण्यं सम्भवति । अतश्च तयोरभेदेन परस्परान्वयाङ्गीकारात् दातृत्वादिविशिष्टाग्न्यादि (दात्राद्यभिन्नाग्न्यादि) विधिसंभवेन न देवतातद्गुणेत्यनेकविधानप्रयुक्तवाक्यभेदः । अतश्च प्रकृतमध्यमादिद्रव्यमुद्देश्यत्वेन स्वीकृत्य दातृत्वादि- विशिष्टाग्न्यादिर्विधीयते ।अष्टाकपालत्वं च प्राप्तमेवेति षष्ठे विचारे उपपादयिष्यत इति तदपि न विधेयम् , इति न वाक्यभेदः इति वाच्यम् । सामानाधिकरण्येऽपि [५]"आग्नेयोऽष्टाकपालः" [६]"पञ्चदशान्याज्यानि" इत्यादाविव असमस्तपदानां क्रियाव्यतिरेकेण परस्परान्वयस्य अव्युत्पन्नत्वेन प्रथमतः क्रियान्वयस्यैव स्वीकर्तव्यत्वेन देवतातद्गुणरूपानेकार्थविधिप्रयुक्तवाक्यभेदस्य निवारयितुमशक्यत्वात् । स्थविष्ठाणिष्ठवाक्य-योर्दधिश्रृतयोरप्युद्देश्यत्वेन उद्देश्यानेकत्वनिमित्तकवाक्यभेदस्याप्यापत्तेश्च । किञ्च यच्छब्दबलात् मध्यमादिद्रव्याणां प्रकृतानामेव ग्रहणेन उद्देश्यत्वसम्भवेऽपि दधिश्रृतयोरुद्देश्यत्वे प्रमाणाभावः ।

अतः तत्तद्द्रव्यदेवतादिविशिष्टानि कर्मान्तराण्येव त्रीणि त्रिभिः वाक्यैः विधीयन्ते । न च प्रयोगान्तरविधानमात्रेण उपपत्तौ कर्मान्तरत्वे प्रमाणाभाव इति वाच्यम् । [७]अवेष्ट्यादिवत् कर्त्रादिरूपप्रयोगान्वयिगुणाभावेन प्रयोगमात्रभेदस्य वक्तुमशक्यत्वत् । निमित्तं तु न प्रयोगान्वयि किन्तु विनियोगान्वयि इति [८]यावज्जीवाधिकरणे उक्तत्वात् न निमित्तवशादपि प्रयोगभेदसिद्धिः । प्रत्युत द्रव्यदेवतादिरूपोत्पत्त्यन्वयिगुणसत्त्वात् [९]वाजिन[१०]पञ्चशरावादाविव कर्मभेद एवात्र सिद्ध्यति । त्रेधा तण्डुलान् विभजेदित्यनेन यागत्रयद्रव्यप्रकृतिभूततण्डुलानां मध्यमादिरूपेण त्रेधाविभागरूपः संस्कारो विधीयते । अत एव विभागरूपसंस्कारविध्युपात्तत्वेन प्रसिद्धत्वात् मध्यमादिवाक्ये मध्यमादिद्रव्यस्य यच्छब्देन अनुवादोऽप्युपपद्यते । त्रेधा तण्डुलान् विभजेत् इति वाक्यस्य सिद्धान्त्यभिमतं दार्शिकदेवतापनयविधिपरत्वं तु न युक्तम् । त्रेधा तण्डुलानिति पदद्वयस्य दार्शिकहविष्षु

लक्षणाङ्गीकारापत्तेः, देवतान्तरविधिबलेनैव पूर्वदेवतापनयस्य अर्थादेव सिद्ध्या अपनयविधिवैयर्थ्यापत्तेश्च ।

दधिश्रृतयोश्च न अधिकरणत्वेन विधिः । तथा सति प्रणीताकार्यापन्नत्वेन सहश्रपणस्य अर्थसिद्धत्वेन "सहश्रपयति" इति प्राकरणिकवाक्यस्य वैयर्थ्यापत्तेः । न ह्यनेन भिन्नदेवताकानां हविषां श्रपणे एककालिकत्वरूपं साहित्यं विधीयते, तस्य प्रयोगविध्यवगतसाहित्यवशादेव प्राप्तत्वेन विधिवैयर्थ्यापत्तेः, किन्तु सम्प्रतिपन्नदेवताकहविषां श्रपणे एकपात्राधिकरणकत्वरूपं साहित्यमेव अप्राप्तत्वाद्विधीयते । अतः उत्पत्तिवाक्ये नाधिकरणत्वेन दधिश्रृतयोर्विधानं किन्तु सप्तम्या करणत्वलक्षणात् करणत्वेनैव । सिद्धान्तेऽपि सप्तम्या उद्देश्यत्वलक्षणाङ्गीकारात् लक्षणा तुल्यैव । सह श्रपणेनैव चरुत्वस्यापि सिद्धेः चरुत्वं न विधीयते किन्त्वनूद्यते ।

एतेषाञ्च कर्मणां स्वकाले क्रियमाणदर्शाङ्गत्वं, प्रकरणात् । तदपि अकालोपक्रमदोषनिर्घातार्थत्वात् [११]द्वादशाध्यायोक्तन्यायेन विकल्प्येत । त्रयाणामपि दोषनिर्घातरूपैकप्रयोजनकत्वात् । यदि तु अकालोपक्रमस्य विहिताननुष्ठान-निषिद्धानुष्ठानरूपत्वाभावेन न दोषजनकत्वमिति विभाव्यते, तर्हि एतेषां कर्मणामदृष्टार्थत्वेन भिन्नप्रयोजनकत्वात् समुच्चय एव । यस्तु अकाले दर्शार्थप्रणयने कृते अग्नेरायतनादकाले बहिर्नयनप्रयुक्तदोषः, स न दर्शवैगुण्यापादक इति न तन्निर्घातार्थत्वेन प्रकरणप्राप्तं दर्शाङ्गत्वमुपपादयितुं शक्यते । अतः अदृष्टद्वारैव दर्शार्थत्वात् समुच्चय एव त्रयाणामिति पूर्वपक्षसंक्षेपः ।

**(सिद्धान्तः)**

अथ सिद्धान्त उच्यते – नाभ्युदयेष्टिः कर्मान्तरं, किन्तु दर्शस्यैव प्रयोगान्तरमात्रम्, कर्मभेदबोधकप्रमाणाभावात् । न हि वाक्यभेदापादको गुणः कर्मभेदबोधकः । द्रव्योद्देशेन देवतामात्रविधानेन वाक्यभेदाभावात् । देवताया उपपादकीभूतयागापेक्षायां प्रकृतानामेव आग्नेयादियागानामुपपादकत्वं स्वीक्रियते, [१२]"ऐन्द्रवायवं गृह्णाति"इत्यादौ देवतात्वोपपादक यागापेक्षायां प्रकृतस्य ज्योतिष्टोमस्य उपपादकत्व स्वीकारवत् । चरुत्वाधिकरणत्वयोश्च पूर्वपक्षोक्तरीत्यैव प्राप्तत्वादनुवादः । अष्टाकपालत्वप्राप्तिश्च असन्नयतोऽधिकारप्रस्तावे वक्ष्यते । अतः दातृत्वादिविशिष्टाग्न्यादिदेवतामात्रं मध्यमादिद्रव्योद्देशेन विधीयत इति न वाक्यभेदः । न च देवतातद्गुण-दातृत्वोभयविधानाद्वाक्यभेद इति वाच्यम् । अग्नये दात्रे इति चतुर्थ्युक्त देवताकारकस्यैकत्वेन भिन्नसुबन्तोपस्थितयोरपि परस्परान्वयस्वीकारात् । सर्वथा

तादृशान्वयानङ्गीकारे दात्रे इति पदमेव दातृत्वविशिष्टाग्निलक्षकमग्निपदं तु तात्पर्यग्राहकमात्रमिति स्वीक्रियते । स्थविष्ठाणिष्ठवाक्ययोस्तु दधिश्रृतयोरपि उद्देश्यत्वेन उद्देश्यानेकत्वनिमित्तो वाक्यभेदः गत्यन्तराभावात् स्वीक्रियते । यच्छब्दबलाच्च मध्यमादिद्रव्यं प्रकृतमेव गृह्यत इति भाष्यादि ग्रन्थेषु निरूपितम् । परन्त्वेवं वाक्यभेदस्वीकारे प्रमाणाभावेन एककारकविधाने परस्परान्वयस्वीकारे [१३]"ऐन्द्रंपञ्चशरावमोदनम् निर्वपेदि"ति वाक्येऽपि प्रकृतेन्द्रदेवतामनूद्य पञ्चशरावपरिमाणविशिष्टौदनरूपैककारकविधानापत्तेः, प्रकृते स्थविष्ठादिवाक्ययो-रुद्देश्यानेकत्वस्वीकारे पञ्चशरावौदनरूपविधेयद्वयस्यापि स्वीकारापत्तेः नात्र वस्तुतो द्रव्योद्देशेन देवतामात्रविधानम् । किन्तु द्रव्यदेवतादिगुणविशिष्टभावनान्तरविधानमेव स्वीकर्तव्यम् । न चैवमुत्पत्त्यन्वयिगुणसत्त्वेऽपि कर्मभेदमस्वीकृत्य भावनाभेदमात्रस्वीकारे पञ्चशराववाक्येऽपि भावनामात्रभेदापत्तिरिति वाच्यम् । मध्यमादिद्रव्यस्य पूर्वयागीयत्वोपस्थापक यच्छब्दबलेन अकर्मान्तरत्वप्रतीतौ वाक्यभेदपरिहाराय विशिष्टभावनाविधिस्वीकारात् , पञ्चशरावेतु देवतायाः पूर्वयागीयत्वोपस्थापकं न किञ्चिदिति यागैक्यप्रमित्यभावेन उत्पत्त्यन्वयिगुणस्य कर्मभेदबोधकत्वाच्च ।

मध्यमादिद्रव्यस्य पूर्वयागीयत्वोपस्थापक यच्छब्दबलात् प्रकृतस्यैव ग्रहणेऽपि दधिश्रृतयोः पूर्वयागीययोरेव ग्रहणमित्यत्र किं प्रमाणमिति चेदुच्यते – स्थविष्ठादिवाक्ये यच्छब्दबलात् पूर्वयागीय –(अनपगत पूर्वयागसम्बन्ध) स्थविष्ठादिद्रव्यग्रहणेन यागैक्ये अवधारिते तत्र द्रव्यान्तरयोर्दधिश्रृतयोः एकरूप्येणविकल्पेन समुच्चयेन वा विधानायोगात् अधिकरणत्वेन विधानस्य च "सह श्रपयती"ति वाक्यवैयर्थ्यापत्याऽसम्भवात् दधिश्रृतयोरपि सान्नाय्ययागीययोरेव विधेयभावनाविशेषणत्वम् । इयमेकैव भावना तन्त्रेण आग्नेययागीया दधियागीया च भवतीति भावः । नन्वेवमपि आग्नेययागे लौकिकदध्यादिविध्यसम्भवेऽपि तदीयभावनासम्बन्धियागान्तरे लौकिकदधिविधाने न किञ्चिद्बाधकम्, स्थविष्ठतण्डुलप्रदातृत्वविशिष्टेन्द्रैतदुभयविशिष्टयाग – लौकिकदधि-प्रदातृत्वविशिष्टेन्द्रैतदुभयविशिष्टयागयोः भवनाया विधातुं शक्यत्वादिति चेत् सत्यम् । तथापि "त्रेधा तण्डुलान् विभजेत्"इत्यस्य प्रकृतहविषां दार्शिकदेवता-सम्बन्धापनयविधायकत्वेन दधिश्रृतयोरपि अपनीतदेवतासम्बन्धत्वेन देवतान्तरापेक्षितया अपेक्षितविधानानुरोधेन दार्शिकदधिपयसोरेव स्थविष्ठाणिष्ठवाक्ययोर्ग्रहणम् ।

भाष्यानुसारिसिद्धान्तपक्षे चरुत्वमर्थप्राप्तमित्युक्तम् , तन्नसम्भवति , "सह श्रपयती"ति वाक्यात् दधिश्रृतयोरधिकरणत्वप्राप्तावपि चरुत्वविध्यभावे

आग्नेययागीयाष्टाकपालत्वत्यागे प्रमाणाभावेन पुरोडाशस्यैव दध्यादिना सहश्रपणापत्तेः । अतः चरुत्वमपि विधेयमेव ।

त्रेधा तण्डुलान् विभजेत् इत्यस्य च न तण्डुलद्रव्यस्य विभागरूपसंस्कारविधायकत्वम् । मध्यमादिद्रव्यविशिष्टभावनाविधिनैव अर्थात् मध्यमादिरूपेण त्रेधाविभागस्य प्राप्तत्वात् । न च चित्रेष्टितण्डुलवत् लौकिक मध्यमादि ग्रहणप्रसक्त्या प्रयोगान्तःपातिविभागसिद्ध्यर्थं विधिरावश्यक इति वाच्यम् । यतो हि लोकसिद्धमध्यमादिग्रहणे तण्डुलप्रकृतिभूत व्रीहिसंस्कारकनिर्वापाप्राप्त्या निर्वापात्पूर्वं चन्द्रोदय शङ्कायां चन्द्रोदयकालात्पूर्वं निर्वापस्य कर्तव्यतानुवादकं "यद्यगृहीतं हविरभ्युदियात् महारात्रे एव हवींषि निर्वपेत्" इति वाक्यमनुपपन्नम् स्यात् । किञ्च निर्वापादिसंस्कारस्य प्रदेयप्रकृतिभूत तण्डुलव्यापारकसाधनताश्रयव्रीह्यादिनिष्ठत्वस्यैव [१४]तेषामर्थाधिकरणे स्थापितत्वात् चित्रेष्टौ च तण्डुलानामेव साक्षात्प्रदेयत्वेन प्रदेयप्रकृतित्वाभावात् द्वारलोपेन निर्वापादिबाधेऽपि अभ्युदयेष्टौ श्रपणसत्त्वेन तण्डुलानां प्रदेयप्रकृतित्वेन सौर्यादाविव व्रीहिसंस्कारकनिर्वापादिबाधे प्रमाणाभावेन लौकिकमध्यमादिग्रहणप्रसक्तिरिति प्रयोगान्तःपातिविभागोऽप्यर्थसिद्ध एवेति न त्रेधा तण्डुलान् इति वाक्यस्य त्रेधाविभागविधायकत्वम् , किन्तु त्रेधा तण्डुलान् इति पदद्वयेन प्रकृतयागीयहविर्लक्षणया तेषां प्रकृतदेवताभ्योऽपनयरूपविभागविधायकत्वमेव । वाक्यानर्थक्यभिया च लक्षणाप्यदोषाय । न च नैमित्तिकदेवतान्तरविधिबलादेव पूर्वदेवतापनयः सिद्ध्यतीति तद्विधिरनर्थक इति वाच्यम् । पूर्वदेवतापनयाभावे तत्रैव कर्मणि देवतान्तरविधानासम्भवेन मध्यमादिवाक्यैः द्रव्यदेवतादिविशिष्टकर्मान्तरविधानापत्त्या प्रकृतहविषां पूर्वदेवतापनयस्य अर्थतः प्राप्त्यसम्भवात्। अतः पूर्वदेवतापनयविधिरेव अपनीतदेवतासम्बन्धानाम् अनपगतयागसम्बन्धानां प्रकृतहविषां देवतान्तराकाङ्क्षामुत्थापयन् मध्यमादिवाक्यानां तत्र देवतान्तरसम्बन्धविधिपरत्वमुपपादयन् कर्मान्तरत्वं प्रतिबध्नाति । देवतान्तरविधिश्च विशिष्टभावनान्तरविधिस्वीकार एव उपपद्यत इत्युक्तमेव ।

"यद्यगृहीतं हविरभ्युदियादेषैव व्रतचर्या, यदि गृहीतं हविरभ्युदियात् अथो तर्ह्येतानेव तण्डुलान् सुफलीकृतान् दधि पयश्च" इति लिङ्गादपि अकर्मान्तरत्वं निश्चीयते । यदि हविर्निर्वापात्पूर्वं चन्द्रोदयः जातः तर्हि चतुर्दश्यां कृतस्य अनशनसत्यवदनादिनियमस्य अमावास्यायाम् आवृत्तिः कार्या (ततः स्वकाले दर्शयागोऽनुष्ठेयः ) । हविर्निर्वापोत्तरं चन्द्रोदये तु दर्शयागीयामन्येव तण्डुलादिद्रव्याणि

अभ्युदितेष्टौ विनियुज्य द्रव्यान्तरैरमावास्याकर्म श्वोभूते कार्यमिति प्रभावल्यामेतद्वाक्यार्थो दर्शितः । एवञ्चात्र अभ्युदितेष्टौ दार्शिकद्रव्याणामेवोपादनकथनात् लौकिकमध्यमादिद्रव्यान्तरोपादनाभावेन नेदं कर्मान्तरं किन्तु दर्शस्यैव प्रयोगान्तरमिति विज्ञायत इति भावः ।

एवं "यदिबिभीयादभिमोदेष्यतीति, महारात्र एव हवींषि निर्वपेत्, फलीकृतैस्तण्डुलैरुपासीत,अर्धं दधि हविरातञ्चनार्थं निदध्यात् , अर्धं न ।यद्यभ्युदियात् तेनातञ्च्य प्रचरेत्, यदि न प्रातरेतेन ब्राह्मणान् भोजयेदि"ति लिङ्गमपि अकर्मान्तरत्वं साधयति । तथा हि – यदि दर्शोपक्रमानन्तरं मामभिचन्द्र उदेष्यतीति शङ्केत तर्हि चन्द्रोदयकालात्पूर्वं व्रीहिनिर्वापावघातादिकृत्वा प्रतीक्षेत , सान्नाय्यार्थदध्नोऽर्धं स्वकाले करिष्यमाणदर्शार्थहविरातञ्चनार्थं निदध्यात् , अवशिष्टमर्धं तदर्थं न (किन्तु चन्द्रोदये सति अभ्युदितेष्टौ विनियुञ्जीत) । यदि चन्द्रोऽभ्युदेति, तर्हि दर्शार्थातञ्चनार्थं निहितेन दध्ना आतञ्च्य स्वकाले दर्शयागमनुतिष्ठेत् । यदि नोदेति तर्हि आतञ्चनार्थनिहितभिन्नदध्ना दर्शयागमनुतिष्ठेत् , आतञ्चनार्थदध्ना तु ब्राह्मणान् भोजयेदिति वाक्यार्थः । अत्र दर्शार्थमुत्पादितस्य दध्नः अर्धस्याभ्युदितेष्टौ विनियोगो दृश्यते । इदञ्चकर्मान्तरत्वे नोपपद्यते । तथात्वे अन्यस्यैव दध्नः अभ्युदितेष्टौ विनियोक्तव्यत्वात् । एवमन्येन दध्ना अभ्युदितेष्टिं कृत्वा पूर्वोत्पादितदर्शार्थदध्ना एव स्वकाले दर्शस्य कर्तव्यत्वात् स्वकाले करिष्यमाणदर्शार्थमातञ्चनाभ्यासदर्शनमप्यनुपपन्नम् । दर्शस्यैव अभ्युदयेष्टिः प्रयोगान्तरमिति पक्षे तु दर्शार्थदध्ना तदनुष्ठानं नानुपपन्नम् । न च अकालोपक्रमेण दध्नो दुष्टत्वेन न तत् स्वकालक्रियमाणदर्शस्यार्हमित्यतः तदर्थं हविरन्तरोत्पादार्थमातञ्चनाभ्यासदर्शनमुपपन्नमेव कर्मान्तरत्वपक्षेऽपीति वाच्यम् । अकालोपक्रमनिमित्तस्य सर्वस्यापि दोषस्य (द्रव्यसम्बन्धिनो वा यजमानात्मसम्बन्धिनो वा)अभ्युदयेष्ट्या परिहारेण तस्यैव दध्नो दर्शार्हत्वसम्भवात् । अतः अभ्युदितेष्टिः दर्शस्यैव प्रयोगान्तरम् अकाले दर्शोपक्रमनिमित्तदोषपरिहारद्वारा स्वकाले करिष्यमाणदर्शप्रयोगाङ्गम् । अकाले उपक्रमस्य च दोषजनकत्वं [१५]सामान्यमुखेन "विवा एतं प्रजया पशुभिरर्धयति वर्धयत्यस्य भ्रातृव्यमि"ति अभ्युदयेष्ट्यर्थवादेन अवगम्यते ।

कीदृशश्चन्द्रोदयो निमित्तमिति विचारः

इदं तु चिन्तनीयम् – "यद्यगृहीतं हविरभ्युदियादि"त्यादिलिङ्गात् प्रभावल्युक्तव्याख्यानुसारेण निर्वापात्पूर्वं चन्द्रोदये व्रतचर्यामात्रम्, निर्वापात्परं चन्द्रोदये तु अभ्युदयेष्टिः कर्तव्येति प्रतीयते । "यदि बिभीयादभिमोष्यती"त्यादिलिङ्गात्तु निर्वापात्पूर्वं

चन्द्रोदयज्ञानेऽपि अभ्युदितेष्टिः कर्तव्येति प्रतीयते । अत्रैव अभ्युदितेष्टिपेटिकायां तृतीयाधिकरणे निर्वापो निमित्तकोटौ न विवक्षितः, चन्द्राभ्युदयावच्छिन्नदिने प्रारम्भ एव निमित्तमिति सिद्धान्तितम् । तदधिकरणे भाट्टदीपिकायां तु "यद्यगृहीतं हविरभ्युदयादि"त्येतत् निर्वापात्पूर्वं चन्द्रोदयोऽपि निमित्तमित्यत्र उपोद्बलकत्वेन उपन्यस्तम् । तत्तु तावन्मात्रांशपर्यालोचनयेति भाति । "एषैव व्रतचर्ये"त्याद्यग्रिमांशस्य आलोचने तु निर्वापोत्तरं चन्द्रोदये एव अभुदितेष्टिरिति प्रतीयते । तदधिकरणे प्रभावल्यां तु निर्वापोत्तरं चन्द्रोदये एव अभ्युदितेष्टिरिति स्वाभिप्रायः प्रकटितः । तस्मिन्नेव पक्षे "यदि बिभीयादभिमोदेष्यती"त्यादेर्लिङ्गस्य आनुकूल्यञ्च दर्शितम् । निर्वापात् पूर्वं चन्द्रोदयशङ्कायामपि चन्द्रोदयात्पूर्वमेव निर्वापानुष्ठानविधानेन अन्ततो निर्वापोत्तरचन्द्रोदये एव अभ्युदितेष्ट्यनुष्ठानात् । परन्तु निर्वापात् पूर्वं शङ्काया अभावे साक्षात् चन्द्रोदयनिश्चये एव आपतिते किमभ्युदितेष्टिः कर्तव्या न वेति नैतद्वचनात् स्पष्टं लभ्यते । प्रभावल्यां तु "निरुप्ते स्यात्तत्संयोगादि"त्यधिकरणे हविर्निरुप्तम् इत्यत्र हविषोऽविवक्षां निर्वापस्य विवक्षां चोक्त्वा न कर्तव्येत्युक्तम् । भाष्यकारादिखण्डदेवपर्यन्तैः ग्रन्थकारैः निर्वापस्य अविवक्षां हविषश्च विवक्षामुक्त्वा प्रवृत्तहविर्मात्रोपलक्षितचन्द्रोदयो निमित्तम् । तथा च चन्द्रोदयात्पूर्वं यागोपक्रममात्रेऽपि अभ्युदितेष्टिः कार्या इत्युक्तम् । कथं हविर्मात्रविवक्षणेन यागोपक्रमस्य निमिततालाभ इतिप्रथमाधिकरणे प्रभावल्यामुपपादितम् ।

अत्रेदं प्रतिभाति – तृतीयाधिकरणोक्तरीत्या हविरेव निमित्तकोटौ विवक्षितम्, न निरुप्तम् इति । परन्तु हविरुपलक्षितचन्द्रोदयो नाम न यागोपक्रममात्रोत्तरचन्द्रोदयः, उपक्रममात्रेण हविस्सत्ताया अलाभात् । किन्तु सायं दोहे सत्येव हविर्लभ्यते । अतः व्रीहिनिर्वापे कृते अकृते च सायंदोहे तु कृते अभ्युदितेष्टिः कर्तव्येति तृतीयाधिकरणे प्रतिपाद्यो विषयः । सायं दोहेऽप्यकृते तु हविर्ग्रहणस्यैव (हविस्सम्पादनस्यैव) अभावेन "यद्यगृहीतं हविरि"त्यादिवचनानुसारेण यागोपक्रमे कृतेऽपि व्रताभ्यासमात्रं भवति, नाभ्युदितेष्टिरिति न वचनानां विरोध इति ।

द्वितीयाधिकरणे उपांशुयाजस्यापि देवतापनयात् देवतान्तरसंयोगाभावाच्च अभ्युदयेष्टौ उपांशुयाजो लुप्यत इति साधितम् । निमित्तकोटौ निर्वापाविवक्षारूपतृतीयाधिकरणविषयस्तूक्त एव । चतुर्थेऽधिकरणे निर्वापात्पूर्वं चन्द्रोदयज्ञाने पश्चात् क्रियमाणो निर्वापः वैकृतीभ्य एव देवताभ्य इति निरूपितम् । पञ्चमेऽर्धनिरुप्तेचन्द्रोदयज्ञाने अवशिष्टनिर्वापः तूष्णीमिति मीमांसकमतम्, वैकृतीभ्य एव अवशिष्टनिर्वाप इति याज्ञिकमतञ्च निरूपितम् । षष्ठेऽसन्नयतोऽपि (असोमयाजिनोऽपि)

अकाले दर्शोपक्रमे अभ्युदयेष्टिः भवतीति साधितमिति सङ्क्षेपतः प्रतिपादिता अभ्युदयेष्टिसम्बन्धिनो विचाराः ।

टिप्पण्यः -

१. तत्तिरीयसंहिता २-५-५
२. पाणिनिसूत्रम् १-४-९१
३. पाणिनिसूत्रम् २-३-८
४. भट्टभास्करभाष्यम् पृ.सं. २५१
५. पूर्वमीमांसा १-४-११ अधिकरणविषयवाक्यम्
६. पूर्वमीमांसा १-४-३ अधिकरणविषयवाक्यम्
७. पूर्वमीमांसा २-३-२ अधिकरणं द्रष्टव्यम्
८. पूर्वमीमांसा २-४-१ अधिकरणम्
९. पूर्वमीमांसा २-२-९ अधिकरणं द्रष्टव्यम्
१०. पूर्वमीमांसा ६-४-९ अधिकरणं द्रष्टव्यम्
११. पूर्वमीमांसा १२-३-५ अधिकरणं द्रष्टव्यम्
१२. पूर्वमीमांसा २-२-६ अधिकरणं द्रष्टव्यम्
१३. तत्तिरीयब्राह्मणम् ३-७-१
१४. पूर्वमीमांसा ३-१-४ अधिकरणे मीमांसाकौस्तुभे
१५. अनेन विहितकर्ममात्रस्य अकालोपक्रमः दोषायेति सामान्यतः ज्ञाप्यते, न तु विशिष्य दर्शयागस्यैवेति भावः ।

# पाणिनीये तदन्तविधितदादिविध्यादय उपायाः

**प्रो विष्णुनम्पूतिरिः, पय्यन्नूर्**
आचार्यः व्याकरण विभागः,
श्री शंकराचार्यसंस्कृतविश्वविद्यालयः कालटी,
पय्यन्नूर् केन्द्रम् केरळा

पाणिनिना शास्त्रनिर्वाहार्थं बहव उपाया आश्रिताः । तद्यथा वृद्धिगुणादयः संज्ञाः, तस्मिन्नित्यादयः परिभाषाः, प्रत्याहारः, ग्रहणम्, तदन्तविधिस्तदादिविधिरित्यादयः । तेषु यद्यपि प्रत्याहाराग्रहणं तदन्तविधिस्तदादिविधिरित्येते संज्ञारूपेष्वेवोपायेषु गणनीया स्तथापि प्रत्याहारादयः संज्ञासमूह इति विशेषः । आदिरन्त्येन सहेतेत्यनेनैकेन बहवोऽणादयः प्रत्याहारा निष्पाद्यन्ते । एवमणुदित् सवर्णस्येत्यनेन अइउ इत्यादयो द्वादश संज्ञाः । येन विधिस्तदन्तस्येत्यनेन वर्णः प्रत्ययः प्रातिपदिकम् अनर्थकवर्णसमुदायो वा शब्दसमुदायान्त्यावयवभूतः सन् स्वघटितसमुदायस्य संज्ञेति परिभाष्यते । तथा च - अन्ताः स्वघटितसमुदायानां संज्ञाः । यस्मिन् विधिस्तदादावल्ग्रहण इति वार्तिककारस्तदादिविधिरूपमुपायमुपदिशति । आदिवर्णः परनिमित्तत्वेनोपात्तस्य स्वघटितसमुदायस्य संज्ञेति तेनोच्यते ।।

येन विधिस्तदन्तस्येति सूत्रेण पाणिनिस्तदन्तग्रहणं विधत्ते । येनेति करणतृतीयान्तम् । यच्छब्दस्तच्छब्दमाक्षिपति । शब्दशास्त्रमधिकृतमिति यत्तद्भ्यां शब्दो ग्राह्यः । विधाने करणत्वेनोपात्तः शब्दः तत्पर्यन्तस्य शब्दस्य संज्ञा । विधाने च करणभूतस्य शब्दस्य विशेषणमेव व्यापार इति विशेषणं तदन्तस्य संज्ञा स्यादिति फलितः सूत्रार्थ उच्यते । यथा अचो यत् इत्यत्रानुवृत्तधातुविशेषणमच इति । तस्मात् अच् अजन्तस्य धातोः संज्ञा । अत इञित्यत्रानुवृत्तप्रातिपदिकविशेषणमत इति । तस्मात् अत् इति अदन्तस्य प्रातिपदिकस्य संज्ञा ।।

<u>प्रकारान्तरेण तदेवोच्यते-</u> येन - यं शब्दमादाय, विधिः - विधिरुच्यते, स शब्दः संज्ञा स्यात् । कस्य । तदन्तस्य - तत्पर्यन्तस्य शब्दस्य । तत्पर्यन्तश्च शब्दः संज्ञी तत्र तत्र प्रातिपदिकात्, धातोः, पदस्य, अङ्गस्य, भस्येत्येवं निर्दिश्यते । अनिर्देशेऽपि सामान्यतः शब्द एव संज्ञी ग्राह्यः । एवञ्च - अत इञ् इत्यत्र अत इति संज्ञानिर्देशः । संज्ञा च संज्ञिनं प्रत्याययति । अकारसंज्ञकात् शब्दादिञित्यर्थः । अकारसंज्ञकश्च शब्दोऽकारान्तः । तत्र कोसावकारान्तः शब्द इञ्प्रकृतिरिति संज्ञिविशेषापेक्षायामधिकृतं प्रातिपदिकादिति सामानाधिकरण्येन विशेषणतया सम्बध्यते । प्रातिपदिकाभिन्नो योऽकारसंज्ञकः

शब्दस्तस्मादिञ् प्रत्यय इति सूत्रार्थः । एवम् - धातोरचो यत् । धात्वभिन्नो योऽच्संज्ञकः शब्दस्तस्माद् यदिति तदर्थः । अत्र येनेति यद्यपि करणतृतीयान्तं, तथापि करणव्यापारो न व्यावर्तनमिह । किन्तु उद्देश्यतया निमित्ततया वा वर्तनम् ।।

अस्मिन् कल्पे इको यणचीत्यादावपि तदन्तविधिः प्राप्नोतीति वार्तिककृता प्रकृते तदन्तविधिरिति वक्तव्यमित्युक्तम् । इको यणचीत्यादौ विशेषणतानिरूपकविशेष्यप्रकरणाभावात् तदन्तसंज्ञात्वमिको नास्ति । भाष्यकारस्तु अकारादीनां तदन्तसंज्ञानां विशेषणतयान्वयमाश्रित्य वार्तिकं प्रत्याचष्ट । तथाहि, इको यणचीत्यादौ विशेषणतानिरूपकविशेष्यानुपादानान्न तदन्तसंज्ञात्वम् । शब्दरूपस्याध्याहृतस्य विशेषणत्वाद्वा । प्रकरणतो विशेष्यलाभेपि विशेषणविशेष्यभावे कामचारात् क्वचित् तदन्तविध्यभावः साधितः । यथा पुगन्तलघूपधस्य च ।लघूपधं यदङ्गं तदवयवस्येको गुण इति । एवं स्थिते मदुक्तरीत्या संज्ञाया विशेष्यत्वेपि न दोषः । इष्टानुरोधेन सामानाधिकरण्यवैयधिकरण्ययोराश्रयणेन दोषवारणस्य शक्यत्वात् ।।

इको गुणवृद्धी इति परिभाषयोपस्थापित इक् तत्र तत्र सति सम्भवे इगन्तस्य संज्ञा । तद्यथा - सार्वधातुकार्धधातुकाभ्यां पूर्वस्याङ्गस्य इको गुणः । अङ्गाभिन्नस्येकः । इगन्तस्येत्यर्थः । सार्वधातुकार्धधातुकाभ्यां पूर्वस्य इको गुणः । अत्र नास्ति सम्भवो यदिगन्तस्य लघूपधत्वं पुगन्तत्वञ्चेति कृत्वा वैयधिकरण्येन सम्बन्ध आश्रीयते । तस्मादिहोपस्थितस्य इक्शब्दस्य तदन्तसंज्ञात्वं नास्ति । नन्वेतदयुक्तं यदेक एवायमिक्शब्द उपस्थापितः क्वचित् संज्ञा क्वचिन्नेति । एवन्तर्हि – वैयधिकरण्येऽपि संज्ञैवास्तु । कथं पुगन्तलघूपधस्थले । सार्वधातुकार्धधातुकाभ्यां पूर्वस्येको गुणः । इगन्तस्येत्येवार्थः । येन नाव्यवधानं तेन व्यवहितेपीति सिध्यति । ननु चोक्तं नास्ति सम्भवो यदिगन्तस्य लघूपधत्वं पुगन्तत्वञ्चेति । नैष दोषः । योऽयं लघूपधः पुगन्तो वा शब्दः तस्मिन् अस्त्येवान्तर्भूत इगन्तः शब्दः । यद्येवमन्तादेशो गुणो न सिध्यति । किं कारणम् । नानर्थकेऽलोन्त्यविधिः, उपधान्तश्च नार्थवान् । तस्मादिक इति क्वचित् संज्ञा, क्वचिच्च नेत्येवास्थेयम् । प्रतिवाक्यं परिभाषा उपप्लवन्ते । अतो नैक इक्शब्दः ।।

**तदन्तविधिरूप उपायोऽन्यप्रकारेण प्रदर्श्यते-**

येषां शब्दानामन्तिमोऽवयवः समानः तेषां तेभ्यो वा यदा किञ्चिद् विधित्सितं तदा स समानोऽवयवस्तेषां संज्ञा स्यात् । तथा हि - अदन्तानां शब्दानाम् अदिति संज्ञा । आकारान्तानां धातूनामन्तावयव आकार इति आकारान्तधातूनाम् आदिति संज्ञा । अजन्तानां धातूनामन्तावयवः अच् , स तेषां संज्ञा । तिङन्तानामन्तावयवस्तिङ्, स तेषां

संज्ञा । येषां शब्दानामन्तावयवो मन् तेषां मन्निति संज्ञा । येषां शब्दानां पादिति अन्तावयवः तेषां पादिति संज्ञा । तं तं समानमन्तावयवमादाय पाणिनिः विधिं करोति । एवञ्च समानान्त-अनेक-शब्दोद्देश्यके विधौ अन्तेन समानेन तेनावयवेन विधिः क्रियत इति स समानोवयवः समुदायस्य संज्ञा ।।

वर्णेन तदन्तविधिः, प्रत्ययेन तदन्तविधिः, प्रातिपदिकेन तदन्तविधिः, अनर्थकवर्णसमुदायेन तदन्तविधिरिति - बहुधा विद्यते । तत्र वर्णस्य तदन्तसंज्ञात्वं प्रति अत इञ्, अचो यदित्युदाहरणम् । प्रत्ययस्य तदन्तसंज्ञात्वं प्रति सन्यङोरित्याद्युदाहरणम् ।।

क्वचित् तदन्तविधिद्वयमाश्रितं कौमुद्याम् । तद्यथा - वनो र च । अत्र वन इति प्रत्ययग्रहणत्वात् शब्दरूपविशेषणतामाश्रित्य प्रत्ययग्रहणपरिभाषया वन्नन्तपर इति व्याख्येयं प्रथमम् । तस्य च प्रातिपदिकविशेषणत्वात् पुनस्तदन्तविधिः । ततश्च - वन्नन्तान्तमित्यर्थः । तेन - अतिधीवरीति सिध्यति । अन्यथा प्रत्ययग्रहणेषु प्रकृतिप्रत्ययोभयावधिकसमुदायस्यैव ग्रहणाद् धीवरीत्यत्रैव स्यातां ङीब्रौ ।।

**एतदयुक्तम् –**

द्वाभ्यां हेतुभ्याम् । अनुच्चारितस्य तदन्तस्य पाणिनिकर्तृकविधाने करणत्वायोगादिति प्रथमेन । प्रत्ययग्रहणपरिभाषांशतदादिविधेरनादरादिति द्वितीयेन । तथाहि - यदि प्रत्ययग्रहणपरिभाषा वनो र चेत्यत्र प्रवर्तते तर्हि तदीयतदाद्यन्तांशवाक्यस्याप्युपस्थितौ धीवन्नित्येतावत एव ग्रहणं साधु । द्वितीयतदन्तविधिना तु प्रकृतेः पूर्वस्यापि ग्रहणे सम्पादिते सति तदादिविधेरनादर एव फलति । तस्मादत्र मार्गान्तरं प्रदर्श्यते – तदन्तविधिद्वयेन भवता प्रत्ययग्रहणपरिभाषीयतदादिविधेरभाव एव फलतः सम्पाद्यते । तर्हि लाघवात् प्रत्ययग्रहणपरिभाषामेव वात्र प्रावीवृतत् । मया त्वेवमुच्यते - वनः परस्य ङीपो रेफः स्यादिति सूत्रार्थः । नलोपः प्रातिपदिकान्तस्येति नलोपः ।यद्वा - ङीपि परे वनो रेफः स्यादिति सूत्रार्थः । अलोन्त्यस्येति नकारस्य । अथवा -यथा टिड्ढाणञित्यत्र अत इति सम्बध्य अण् योकार इति व्याख्यानेन अल्विधित्वं सम्पाद्यते, अणो यथा तत्र तदन्तसंज्ञात्वं न, शार्ङ्गरवाद्यञो ङीनित्यत्र यथा अञो योऽकार इति व्याख्यानात्तदन्तविध्यभावः, एवं वनो र चेत्यत्र ऋन्नेभ्यो ङीबित्यतो न इति सम्बध्य वनो यो नकारस्तस्य ङीप्सन्नियोगेन रेफ आदेशो विधीयत इति व्याख्यायते । नन्वत्रापि प्रत्ययग्रहणपरिभाषोपस्थित्या भाव्यमेव, वन इति प्रत्ययग्रहणात्, ततश्च धीवरीत्यादावेव ङीब्रौ स्याताम्, अतिधीवरीत्यादौ मा भूतामिति चेन्न ।अङ्गसंज्ञासूत्रे, यस्मात् प्रत्ययविधिस्तदादि प्रत्यये इति योगविभागेनोन्नीतं

प्रत्ययग्रहणपरिभाषीयतदादिवाक्यम् । तथाचेह वन इति प्रत्ययग्रहणात् धातुपदमुपतिष्ठते । धातोः परस्य वनो ङीप्सन्नियोगेन रेफस्स्यादिति सूत्रार्थः । प्रत्ययग्रहणे चापञ्चम्या इति तदन्तविध्यभावः।।

एवं यत्र सप्तम्यन्तं वर्णग्रहणं विशेषणं तत्र स वर्णः तदादेः शब्दस्य संज्ञा । यथा सः सि आर्धधातुके, वान्तो यि प्रत्यये इत्यादि । सकारादेः शब्दस्य सकारः संज्ञा । यकारादेः शब्दस्य यकारः संज्ञा ।।

अत्रेदमुच्यते- यथा मृजेर्वृद्धिरित्यादौ मृजेराकारः स्यादिति सूत्रार्थो नोच्यते एवमेव अत इञ्, एरच्, अचो यत् , वान्तो यीत्यादावपि संज्ञापदघटित एव सूत्रार्थ उचितः

।। शम् ।।

# षष्ठी स्थानेयोगा(१-१-४९)

**डा. सिहेच्. एस्. एस्. नरसिंहमूर्तिः**
नव्यव्याकरणविभागध्यक्षः
रा.सं.सं. राजीवगान्धीपरिसरः, शृङ्गेरी

"षष्ठी स्थानेयोगा" इति सूत्रम् अष्टाध्याय्यां प्रथमाध्यायस्य प्रथमपादे ऊनपञ्चाशत्तमं वर्तते। इदं सूत्रं सिद्धान्तकौमुद्यां परिभाषाप्रकरणे वर्तते। अत इदं परिभाषासूत्रम्। अत्र सूत्रे भाष्ये एवं विचार आरब्धः - किमिदं स्थानेयोगेति? प्रश्नस्यायमाशयो भवति पदमिदं व्यस्तमुत समस्तम् इति। स्थाने योगोऽस्याः सेति व्यधिकरणबहुव्रीहिसमासे अलौकिकविग्रह एवं भवति - स्थान+ङि, योग+सु इति स्थिते सुपो धातुप्रातिपदिकयोः(२-४-७१) इत्यनेन सुब्लुकि स्थानयोग, स्त्रीत्वे टापि विशिष्टात् सुपि हल्ङ्यादिलोपे स्थानयोगा इति भाव्यम्। अतस्समस्तमिति न वक्तुं शक्यते। व्यस्तमिति कथयामश्चेत् षष्ठीति विशेष्यानुरोधात् युज् धातोः 'अकर्तरि च कारके संज्ञायाम्(३-३-१९) इति घञं बाधित्वा स्त्रियां क्तिन्(३-३-९४) इत्यनेन क्तिनि युक्तिरिति भाव्यम्।

अत्रेदं समाधानम् - अत्र स्थाने योगोऽस्याः सेति व्यधिकरणबहुव्रीहिसमास एव स्वीक्रियते। सप्तम्याः निपातनादलुक्। तथा च स्थनेयोगा इत्यस्य स्थाननिमित्तसम्बन्धेत्यर्थः। अथवा स्थानेन योगोऽस्याः सा = स्थानेयोगा इति। अत्र पक्षे अलौकिकविग्रहवाक्यमेवं भवति - स्थान +टा, योग+सु इति स्थिते सुपो धातुप्रातिपदिकयोः(२-४-७१) इत्यनेन सुब्लुकि स्थानपदघटकाकारस्यैकारः, स्थानेयोगा इति भवति। तृतीयायाः एकारविधानन्तु कर्तुं न शक्यते। तथा सति स्थान +टा, योग+सु इति इत्यवस्थायां टायाः टाङसिङसामित्यादिना इनादेशः प्रप्नोति, सुपो धातुप्रातिपदिकयोः इति लुक् प्राप्नोति। इनादेशोऽन्तरङ्गः, पदद्वयसम्बन्धिसमासाश्रयत्वेन लुक् बहिरङ्गः। अतोऽन्तरङ्गत्वात् इनादेशे अयम् एकारोऽन्त्यस्य स्यात्। कथञ्चिद् अन्तरङ्गपरिभाषायाः बाधां कल्पयित्वा टायाः ए आदेशे स्थान+ ए इति स्थिते अतो गुणे(६-१-८७) इति पररूपे स्थाने इति भवति। परमत्र पररूपं बाधित्वा वृद्धिः प्राप्नुयादिति उद्योते नागेशभट्टः। वृद्ध्यापत्तेश्चेत्यपपाठ इति राजलक्ष्मीव्याख्याने गुरुप्रसादशास्त्रिणः अलेखिषुः।

लोकव्यवहारे "देवदत्तस्य यज्ञदत्तः" इत्युक्ते किम्? इत्याकाङ्क्षावशात् पुत्रः इत्यध्याहारो यथा, तथा शास्त्रेऽपि अस्तेर्भूः(२-४-५२) इत्यादिप्रदेशेषु स्थानपदाध्याहारेण अस्तेः स्थाने भूः भवतीति बोधो जायते।

अथवा तिष्ठन्त्यस्मिन् इति स्थानशब्दः अधिकरणल्युडन्तः

(करणाधिकरणयोश्च(३-३-११७))। वाचकत्वसम्बन्धेनार्थे शब्दाः तिष्ठन्ति। तथा चास्तेरर्थे भूः भवतीति।

अथवा प्रसङ्गवाची स्थानशब्दः। तेनास्तेः प्रसङ्गे = अस्तेः सम्भावनायां भूः प्रयुज्यते। तेन आर्धधातुकविवक्षायाम् अस्तेरप्रयोग एव, भूप्रयोग एव कर्तव्यः इति सूत्रमिदं बोधयति।

सम्बन्धबोधकषष्ठ्याः सम्बन्धिद्वयांशे नित्यसाकाङ्क्षतया द्वितीयसम्बन्धि-बोधकपदानुपादाने किं पदार्थनिरूपितः सम्बन्धः षष्ठ्यर्थत्वेन निर्णेयः? इति संशयात् तत्र स्थानपदमध्याहृत्य तन्निरूपितसम्बन्ध एव षष्ठ्यर्थत्वेन निर्णेयः। यथा - इको यणचि, इग्यणः सम्प्रसारणम् इत्यादिषु। द्वितीयसम्बन्ध्युपादाने तत्सम्बन्ध्यन्वययोग्यस्य सम्बन्धस्य निश्चयादेषा परिभाषा नोपतिष्ठते। यथा - ऊदुपधायाः गोहः(६-४-८९),शास इदङ्हलोः(६-४-३४)। अत्र सूत्रे चत्वारि वार्तिकानि सन्ति। तानि यथा -

१) षष्ठ्याः स्थानेयोगवचनं नियमार्थम्।

२) अवयवषष्ठ्यादिष्वतिप्रसङ्गः शासो गोह इति।

३) अवयवषष्ठ्यादीनां चाऽप्राप्तिर्योगस्याऽसंदिग्धत्वात्।

४) विशिष्टा वा षष्ठी स्थाने योगा।

विना सूत्रेण लोकव्यवहारादेवेष्टसिद्धौ सूत्रमिदं नारम्भणीयम्, प्रत्युत सूत्रारम्भे क्वचित् दोषाः आपतन्ति। तद्वारणाय व्याख्यानतो विशेषप्रतिपत्तिर्न हि सन्देहादलक्षणम् इति परिभाषया व्यवस्था कर्तव्या। परिभाषायाः अभावेऽपि तयैव इष्टसिद्धिः भवत्येव। अतः कुतः सूत्रमिति शङ्कायाम् प्रथमं वार्तिकमारब्धम् - षष्ठ्याः स्थानेयोगवचनं नियमार्थम् इति। षष्ठीदण्डकपाठः इति कश्चिद् ग्रन्थः वर्तते, तदनुसारं षष्ठ्यर्थाः एकशतं सन्ति। क्वापि षष्ठ्यामुच्चारितायाम् एते सर्वेऽर्थाः उपस्थिताः भवन्ति। तदा सूत्रमिदं नियमयति अत्र शास्त्रे या षष्ठी सा स्थाननिरूपितषष्ठ्येव इति।

एतत्सूत्रस्वीकारे पुनरपि दोषाः उत्पद्यन्ते। यतो हि व्याकरणे या षष्ठी सा स्थाननिरूपितैव इति स्वीकारे द्वितीयवार्तिकेन दोषाः कथ्यन्ते - अवयवषष्ठ्यादिष्वतिप्रसङ्गः शासो गोह इति। शास इदङ्हलोः(६-४-३४) इति सूत्रे शासः इति षष्ठी वर्तते, एवमेव ऊदुपधायाः गोहः(६-४-८९) इत्यत्र गोहः इति षष्ठी वर्तते। अतोऽत्रापि सूत्रस्य प्रवृत्तिः स्यादिति मत्त्वा नात्र स्थानषष्ठी, किन्तु अवयवषष्ठी वर्तते। अतः परिभाषायाः नात्र प्रवृत्तिः। यद्यत्र सूत्रं प्रवर्तेत तदा शास इदङ्हलोः(६-४-३४) इत्यनेन विधीयमानमित्त्वं शास इति षष्ठ्या अलोन्त्यस्य(१-१-५२) इति परिभाषया शासः अन्त्यस्य प्राप्नोति, शासः उपधया साकं सम्बन्धाभावात् पचादिसम्बन्धिनोऽपि उपधायाः इत्त्वं स्यात्। अत्र सूत्रे

साक्षादुपधापदभावेऽपि अनिदितां हल उपधायाः क्ङिति(६-४-२४) इत्यतः उपधायाः इत्यनुवर्तनादवयवषष्ठीत्व निर्णयात्। स्थानं न षष्ठ्यर्थः, तथा सति स्थानं योगः यस्याः इति समानाधिकरणबहुव्रीहिसमासेनैव सिद्धे व्यधिकरणबहुव्रीहिसमासपर्यन्तं भाष्यकारः कुतोऽनुधावति।

वार्तिकमिदं नावश्यकमिति वार्तिककृदेव खण्डयति। तथाहि - अवयवषष्ठ्यादीनां चाऽप्राप्तिर्योगस्याऽसंदिग्धत्वादिति। यस्मिन् योगे सन्देहो भवति तत्र अस्य नियमस्य प्रसक्तिः, यत्र सन्देह एव
न भवति तत्र नियमेन किं प्रयोजनम्। प्रकृते शास इदङ्हलोः(६-४-३४), ऊदुपधायाः गोहः(६-४-८९) इत्यत्र च उपधापदसान्निध्याद् अवयवषष्ठीत्वनिर्णयान्नास्य सूत्रस्य प्रवृत्तिः।

वस्तुतः द्वितीयतृतीययोः वार्तिकयोरवसर एव नास्ति। लौकिकदृष्टान्तेनैव गतार्थत्वात्। यथा - कश्चित् कंचित् पृच्छति - ग्रामान्तरं गमिष्यामि पन्थानं मे भवानुपदिशतु" इति। स तस्मायाचष्टे - अमुष्मिन्नवकाशे हस्तदक्षिणो(हस्तः दक्षिणः यस्य सः इति बहुव्रीहिसमासः। पूर्वपरावरेत्यत्र सर्वादिगणे दक्षिणशब्दो वर्तते। अतः सर्वनामसंख्ययोश्च(वा) इत्यनेन तस्य बहुव्रीहौ पूर्वनिपातः कर्तव्यः। भाष्यकारवचनात् सर्वनाम्नोऽपि परनिपातः। यस्य दक्षिणहस्तः सन्निहित इत्यर्थः)ग्रहीतव्यः, अमुष्मिन्नवकाशे हस्तवाम इति। यस्तत्र तिर्यक्पथो(अनृजुमार्गः) भवति, न तस्मिन् सन्देह इति कृत्वा नासावुपदिश्यते। एवमिहापि सन्देहे नियमो, न चावयवषष्ठ्यादिषु सन्देहः।

अथवा स्थानेऽयोगा = स्थानेयोगेति। तदेवोक्तम् - स्थानेऽयोगा = स्थनेयोगा वेति। अव्यक्तयोगा = अयोगा। अत्र पक्षे योगशब्दे कर्मणि घञ् युज्यते असाविति। योगः = सम्बन्धीत्यर्थः। अन्तरेण सम्बन्धं षष्ठ्याः एवाभावात् यस्याः विशिष्टः योगः नास्ति तत्रैवास्याः प्रवृत्तिः। अतः शास इदङ्हलोः(६-४-३४) ,ऊदुपधायाः गोहः(६-४-८९) इत्यत्र च उपधापदसान्निध्याद् अवयवषष्ठीत्वनिर्णयान्नास्य सूत्रस्य प्रवृत्तिः।

अथवा योगवती वा योगा इति समाधानान्तरमप्युक्तम्। अत्र योगशब्दात् मत्वर्थीय अर्श आद्यच्प्रत्ययः। अर्श आदेराकृतिगणत्वात्। योगाः अस्याः सन्तीति योगः = योगवती। भूम्नि हि मतुब्भवतीति भाष्ये पाठो वर्तते। तत्र मतुबित्यस्य मतुबादिरित्यर्थः, अत अर्श आद्यजित्यभिप्रायः। अनेनापि यत्र बहवः सम्बन्धाः भवितुमर्हन्ति, तत्रैवैतत्सूत्रं प्रवर्तते। तेन शास इदङ्हलोः(६-४-३४) ,ऊदुपधायाः गोहः(६-४-८९) इत्यत्र च उपधापदसान्निध्याद् अवयवषष्ठीत्वनिर्णयान्नास्य सूत्रस्य प्रवृत्तिः।

विशिष्टा वा षष्ठी स्थानेयोगा" इति सामाधानान्तरमपि वार्तिककृदवदत्। तस्यायमाशयः - यत्रास्य सूत्रस्य प्रवृत्तिरिष्टा तत्र किञ्चित् कलादिलिङ्गं निर्दिश्यते। इको

यणचीत्यत्र तल्लिङ्गं करिष्यते, अतस्तत्र प्रवर्तते। शास इदङ्हलो:(६-४-३४) ,ऊदुपधाया: गोह:(६-४-८९) इत्यत्र च तल्लिङ्गं न करिष्यते, अतो नात्र प्रवर्तते। निरुक्तार्थस्वीकारे शा हौ(६-४-३५) इति सूत्रे शासिग्रहणं कर्तव्यम्। तथाहि - शास इदङ्हलो:(६-४-३४) इति सूत्रात् अस्मिन् सूत्रे शास: अनुवृत्तिं स्वीकृत्य षष्ठी स्थानेयोगेत्यनेन स्थाननिरूपितसम्बन्धार्थकत्वमुक्त्वा शास: स्थाने शादेशो भवतीति वर्ण्यते। सम्प्रति भवदुक्तरीत्या तत्र लिङ्गाभावात्तस्याप्रवृत्तौ अत्रापि तदर्थौ दुर्लभ:। अत: शासिग्रहणं कर्तव्यमिति दोषो वर्तत इति चेद् -

उच्यते, न कर्तव्यम्। यदेवाऽद: पुरस्तादवयवषष्ठ्यर्थं प्रकृतमेतदुत्तरत्राऽनुवृत्तं सत् स्थाने योगार्थं भविष्यति। अत: पृथग् शासिग्रहणं न कर्तव्यम्। कथमिति चेद् - अधिकारो नाम त्रिप्रकार:। कश्चिदेकदेशस्थ: सर्वं शास्त्रमभिज्वलयति, यथा प्रदीप: सुप्रज्वलित: सर्वं वेश्माभिज्वलयति॥ अपरोऽधिकारो यथा रज्वाऽयस वा बद्धं काष्ठमनुकृष्यते चकारेण॥ अपरोऽधिकार: प्रतियोगं तस्यानिर्देशार्थ इति योगे योगे उपतिष्ठते॥ इति अनुवृत्तिविषये त्रय: पन्थान: प्रदर्शिता:। प्रकृतेऽत्र तृतीय: पथोऽत्र स्वीकृत:।

निरुक्ता: विचारा: अधिकारस्य विषये। प्रकृते एषा परिभाषा खलु कथं तेषां विचाराणामत्र पालनमिति चेद् - उच्यते, अधिकारसूत्रं यथा विधिशास्त्रोपकारकं भवति, तथैव परिभाषासूत्रमपि। तत्तौल्यमस्तीति मत्वाऽत्रापि अधिकारशब्दप्रयोगो भगवता अकारि।

**नित्यशब्दवादे कार्यशब्दवादे चास्य सूत्रस्यावश्यकत्वप्रदर्शनम्**

कार्यशब्दवादे निवृत्ते: स्थानपदार्थतया प्रतियोगिता सम्बन्ध:। नित्यशब्दवादे प्रसक्तेस्तदर्थतया विषयविषयिभाव: सम्बन्ध:। प्रसङ्गश्च आहार्यज्ञानरूपापत्तिरेव। सर्वत्र स्थाने इति सप्तम्यन्तपदस्याध्याहार: कर्तव्य:। प्रकृत्यर्थस्य विषयविषयिभावेन स्थानपदार्थेऽन्वय:। इगादिप्रकृतयश्च तद्बुद्धिलाक्षणिक:। सर्वत्र बुद्धिविपरिणाम-स्यैवाभिप्रेतत्वात्। यणादयोऽपि तथा। स्थाने इति यस्य च भावेन भावलक्षणम् इति सप्तमी। तदर्थ: - सत्ता ज्ञाप्य सत्ता। एवञ्च इग्बुद्धिविषयकाहार्यज्ञानसत्ताज्ञाप्यसत्ताश्रया यण्बुद्धि:। जराया जरसन्यतरस्याम्(७-२-१०१) इत्यादिविकल्पविधिषु जराबुद्धिविषयकाहार्यज्ञानसत्ताज्ञाप्यसत्ताश्रयजरस्बुद्धे: अन्यतरस्यामित्यनेन पाक्षिकत्वे बोधिते आहार्यज्ञानस्यापि पाक्षिकत्वलाभेन अनाहार्यज्ञानविषयतापि जराशब्दबुद्धौ तिष्ठति।

प्राचीनै: निर्दिश्यमानस्यादेशा: भवन्तीति परिभाषा प्रोक्ता, तत्स्थाने पाणिन्याचार्येण सूत्रमिदमुपदिष्टम्।

# उपमानानि सामान्यवचनैः

**डा.चन्द्रशेखरभट्टः**
नव्यव्याकरणविभागः
रा.सं.सं. राजीवगान्धीपरिसरः, शृङ्गेरी

द्वितीयाध्यायस्य प्रथमपादे पञ्चपञ्चाशमिदं सूत्रम्।सह सुपा इति सूत्रात् सुपेति, सुबामन्त्रिते पराङ्गवत्स्वरे इत्यतः सुबिति, पूर्वकालैकसर्वजरत्पुराणनवकेवलाः समानाधिकरणेन इति सूत्रात् समानाधिकरणेन इति च पदमनुवर्तते। उपोपसर्गात् माङ् धातोः ल्युटि उपमानशब्दः। समानो धर्मः सामान्यम्।चतुर्वर्णादित्वात् स्वार्थे ष्यञि सामान्यमिति।साधारणधर्मोऽर्थः।स हि उपमानोपमेययोरेव विवक्षितः। उपपूर्वको माङ् धातुः सादृश्यपरिच्छेदके रूढः। येन वस्त्वन्तरं सादृश्येन परिच्छिद्यते तदुपमानमित्यर्थः।यथा गौरिव गवयः। इह गौः करणम्, परिच्छेत्ता च पुरुषः। स हि गोसादृश्येन गवयं परिच्छिनत्ति यादृशो गौस्तादृशो गवय इति।उपमानवाचीनि सुबन्तानि सामान्यवचनैः सुबन्तैः समस्यन्ते, स तत्पुरुषः इति सूत्रार्थः।घन इव श्यामो घनश्यामः। ननु सूत्रे निर्दिष्टमुपमानपदमुपमेयसाकाङ्क्षम्।किं तयोरत्यन्तभेद उताभेदः? कुतः पुनरियं विचारणा ? दृश्यते चन्द्र इव मुखम् , रावण इव रावणः इत्युभयत्रापि इवशब्दप्रयोगः। अतो जायतेऽत्र विचारणा। ननु उपमीयतेऽसौ , उपमीयतेऽनेन इति कर्मकरणरूपार्थभेदात्सिद्धो भेदः? सत्यम्, द्वितीयसदृशव्यवच्छेदाय गौरिव गौरिति प्रयोगो दृश्यते। उपमानोपमेयस्थले इयमेव गतिः स्यादिति जायते संशयः।अतो युक्त एवात्र विचारः। यदेतदत्यन्ताभेदः स न युक्तः।क इहोपमार्थः स्याद् गौरिव गवय इति ? अथात्यन्तभेदः क इहोपमार्थः स्याद् गौरिवाश्व इति ? एवं तर्हि यत्र किञ्चित्सामान्यं कश्चिच्च विशेषः तत्रोपमानोपमेये भवतः।यथा - शस्त्री श्यामा।शस्त्रीव श्यामा देवदत्ता।अत्र हि शस्त्रीत्व-देवदत्तत्वादयो विशेषधर्माः।श्यामत्वं साधारणो धर्मः।इदं च उपमानशब्दमर्यादयैव लभ्यते। मानं हि नाम अनिर्ज्ञातार्थस्य ज्ञानार्थमुपादीयते।अनिर्ज्ञातमर्थं साकल्येन यज्ज्ञापयति तन्मानमित्युच्यते।यथा प्रस्थादिपरिमाणविशेषः।स हि अज्ञातस्य परिमाणरूपार्थस्य साकल्येन ज्ञापकः।मानस्य समीपमुपमानम्।निपातनात्तत्पुरुषः।अव्ययीभावे तु उपमानानीति भाष्यप्रयोगासङ्गतिः। उपमानं हि प्रस्थादिवत् पदार्थस्य न साकल्येन परिच्छेदकः किन्तु अंशतः।अत एव मानस्य समीपे यन्नात्यन्ताय मिमीते तदुपमानमिति भाष्यम्।यथा गौरिव गवयः।गौर्निर्ज्ञातः, गवयोऽनिर्ज्ञातः।उपमानम् गौर्हि उपमेयं गवयं तद्गतैः कतिभिश्चिदेव धर्मैः ज्ञापयति न तु साकल्येन।यथा चक्षुरादिना घटं जानाति यथा वा द्रोणादिना व्रीह्यादिकं न तथा गवादिना

गवयम् इति गवादिकं प्रत्यक्षादिमानसमीपमुपचर्यते। इदं च तात्पर्यार्थकथनमेव। व्युत्पत्तिस्तु उपमीयतेऽनेनेति प्रागुक्तरीत्यैव।

ननु अनिर्ज्ञातपदार्थं तद्गतैः कतिभिश्चिद्धर्मैः ज्ञापयदुपमानं यदि तर्हि गवय इव गौरित्यपि प्रसज्येत। आरण्यकेन पुरुषेण गवयो निर्ज्ञातो गौश्चानिर्ज्ञातः। गवयेन हि गौः गोगतैः कतिभिश्चिद्धर्मैः ज्ञाप्यते। एवं ह्युपमानोपमेययोः व्यवस्था न प्राप्नोति। अत्रोच्यते निरूपकापेक्ष उपमानोपमेयभावः पितापुत्रादिवत्। पितापि देवदत्तः यज्ञदत्तस्य पुत्रः, पुत्रोऽपि यज्ञदत्तः विष्णुमित्रस्य पिता। एवं गवयो गोरुपमान-मारण्यकानाम्, गौर्गवयस्योपमानं नगरस्थानाम्।

शस्त्रीश्यामा इति ह्यत्रोदाहरणम्। शस्त्रीशब्दः शस्त्र्यां श्यामाशब्दोऽपि तत्रैवेति समासेनोपमेयाया देवदत्ताया अभिधानं न प्राप्नोति। अथ शस्त्रीशब्दः शस्त्र्यां श्यामाशब्दो देवदत्तायां तदा समासो न स्यात् सामर्थ्याभावात्। शस्त्र्याः सादृश्यसम्बन्धेन श्यामावाच्यदेवदत्तायामन्वये सति सामर्थ्योपपत्तावपि सामानाधिकरण्याभावात् समासो दुर्घटः इह सूत्रे समानाधिकरणे इति पदानुवृत्तेः।

अयमत्र समाधिः सूत्रे सामान्यवचनैरित्यस्य सामान्यधर्मविशिष्टं यदुपमेयं तद्वचनैरित्यर्थः। कथमिदं विज्ञायते सामान्यवचनैरित्यनेन ? न्यायात्। वचनग्रहणं हि तत्र क्रियते। सामान्यमुक्तवन्तः सामान्यवचनाः इति बाहुलकात् कर्तरि भूते ल्युट्। पूर्वं सामान्यमुक्त्वा सम्प्रति तद्वति द्रव्ये पर्यवसन्नास्ते भवन्ति सामान्यवचनाः। सामान्यधर्मविशिष्टं च तद्द्रव्यम् उपमानसम्बन्धित्वादुपस्थितोपमेयमेव विज्ञायते। इत्थं च उपमानवाचकं सुबन्तं सामान्यधर्मविशिष्टोपमेयेन सुबन्तेन समस्यते इति सूत्रार्थः सम्पद्यते।

शस्त्रीश्यामा इत्यत्र शस्त्री उपमानम्, देवदत्ता उपमेया। प्रसिद्धं ह्युपमानं भवति। शस्त्री एव श्यामगुणवत्तया प्रसिद्धा। श्यामत्वं साधारणो धर्मः। श्यामशब्दो हि श्यामत्वमुक्त्वा देवदत्तायां वर्तते। ततश्च श्यामत्वविशिष्टदेवदत्ताया अपि समासेनाभिधानं भवतीति न दोषः।

ननु पूर्वकालैकसर्वजरत्पुराणनवकेवलाः समानाधिकरणेन इति सूत्रात् समानाधिकरणेन इति पदमत्रानुवर्तते। प्रकृतोदाहरणे श्यामशब्दो देवदत्तायां वर्तते, शस्त्रीशब्दः शस्त्र्याम्। एवं हि सामानाधिकरण्याभावत् समासो दुर्घटः इति चेदुच्यते उपमानं सामान्यधर्मविशिष्टेन उपमेयेन समस्यत इत्युक्तमेव। सर्वत्र हि उपमानोपमेययोर्भेदोऽवश्यम्भावी। सामर्थ्यादेवात्र समासो भवति। अन्यथा सूत्रमेवानर्थकं स्यात्।

नन्वेवं वचनसामर्थ्यात् शस्त्रीश्यामेति समाससिद्धावपि मृगीव चपला मृगचपला, हंसीव गद्गदा हंसगद्गदा इत्यादौ पुंवद्भावो दुरुपपादः स्यात् पुंवत्कर्मधारयजातीयदेशीयेषु इति सूत्रेण पुंवद्भावस्य वाच्यतया कर्मधारयपदेन समानाधिकरणे इति प्राप्तेः, तत्पुरुषः समानाद्धिकरणः कर्मधारयः इत्युक्तेश्च। अत्रेदं समाधानम् – समानाधिकरणसमास एव शस्त्रीश्यामेति, शस्त्रीशब्दश्यामाशब्दयोरुभयोरपि देवदत्तायां वृत्तेः। शस्त्रीत्वं प्रवृत्तिनिमित्तमाश्रित्य तद्वति प्रवृत्तोऽयं शस्त्रीशब्दो जातिवचनश्चेदपि सादृश्यनिमित्तादभेदोपचारात् देवदत्तायां वर्तते। परिच्छेदकशस्त्र्यभिना परिच्छेद्या श्यामा देवदत्ता इति बोधः। अत एव विग्रहे इवशब्दप्रयोगः। नचैवं श्यामाशब्दवत्शस्त्रीशब्दस्यापि देवदत्तायां वृत्तौ तस्योपमानवाचकत्वं न स्यादिति वाच्यम्; उपमेयसङ्क्रमात्पूर्वावस्थामाश्रित्योपपत्तेः।

ननु शस्त्री इव श्यामा शस्त्रीश्यामा इत्यत्र शस्त्रीशब्दः शस्त्रीत्ववदर्थं, श्यामाशब्दश्च देवदत्तां बोधयतः। ततश्च शस्त्रीसदृशी श्यामा देवदत्ता इति बोधो जायते। एवं हि शस्त्र्यां बहवो गुणाः तीक्ष्णत्वं, सूक्ष्मत्वं,पृथुत्वमित्यादयः। श्यामाशब्दो हि देवदत्तामुपस्थाप्य चरितार्थः। तेन च शस्त्रीगतश्यामत्वं नोच्यत इति शस्त्रीगतगुणान्तरव्यवच्छेदः कथं स्यात् ? एवञ्च अनियतगुणनिमित्तसादृश्यप्रतीतिप्रसङ्गः। अत्रोच्यते – शस्त्रीव श्यामा इति वाक्ये श्यामत्वस्य उपमेयनिष्ठत्वेनैव प्रतीतिश्चेदपि उपमेयनिष्ठो गुणः उपमानं स्पृशतीति शस्त्रीगतश्यामत्वमपि प्रतियते। अथवा अनिर्दिश्यमानस्यापि गुणस्य प्रतीतिर्भवति लोके । यथा – चन्द्रमुखी देवदत्ता। बहवश्चन्द्रे गुणाः। यासौ प्रियदर्शनता सा प्रसिद्धिवशाद्गम्यते। वृद्धव्यवहारवशादनिर्दिष्टोऽपि गुणः उपमाननिमित्तत्वेन प्रतीयते। इत्थमुपमेये श्रुतो गुणः उपस्थितत्वेन प्रत्यासत्त्या च उपमानं स्पृशत्येवेति भावः।

अथ सूत्रमिदं न कार्यम्, विशेषणं विशेष्येण बहुलमित्येव सिद्धेरिति चेन्मैवम्; पूर्वनिपातनियमार्थमस्यावश्यकत्वात्। समासविधायके शास्त्रे उपमानानि इति पदस्य प्रथमानिर्दिष्टत्वेनोपसर्जनत्वात् पूर्वनिपातः। विशेषणं विशेष्येण इति समासाश्रयणे तु विशेषणविशेष्यभावे कामचारात् खञ्जकुब्जः, कुब्जखञ्ज इत्यादिवत् पूर्वनिपातनियमो न स्यात्। किञ्च तत्पुरुषे तुल्यार्थतृतीयासप्तम्युपमानाव्ययद्वितीयाकृत्याः इति सूत्रविहितस्वरः एतत्सूत्रनिष्पन्नसमासस्यैव यथा स्यादित्येवमर्थमपीदं सूत्रम्। अनेन सूत्रेण तुल्यार्थादीनां पूर्वपदभूतानां प्रकृतिस्वरो विधीयते। शस्त्रीशब्दो हि गौरादिङीषन्तत्वादन्तोदात्तः। समासोत्तरमपि स एव स्वरो भवति। अत एव मयूरव्यंसकादित्वात् समासेऽयं स्वरो नेति सिद्धान्तः। इति शिवम्॥

# एत्येधत्यूठसु

**डा. सि हेच् के पद्मनाभम्**
नव्यव्याकरणविभागः
रा.सं.सं. राजीवगान्धीपरिसरः, श्रृङ्गेरी

अत्र सूत्रे एचीति पदमनुवर्तत इति तच्च एत्येधतिभ्यामुभाभ्यां सम्बध्यते इति केचित्। ततः प्राचीनास्तु एचीति एतेरेव विशेषणम् इति मन्वते, नव्याश्च तदेव प्रमाणमिति भावयन्ति। तदत्र विविच्यते।

वृद्धिरेचि इति सूत्रमनुवर्तते। अनुवृत्तमेचीति एतेरेव विशेषणम् इति वादिनां मते उपपत्तिरित्थम् – एतिः नाम प्रसिद्धत्वात् इण्धातुरेव। इङिकोः अधिपूर्वकत्वनियमेन अत्र अधेरभावेन न तयोर्ग्रहणम्। इटकिटकटी इत्त्यत्र वी गतिव्याप्तिप्रजनकान्त्यवसादनेषु इत्यत्र च प्रश्लिष्टयोः अप्रसिद्धत्वात् न ग्रहणम्। अत्र च व्याख्यानमेव शरणम्। एत्येधतिभ्यां साहचर्यात् ऊडपि धातुरेव ग्राह्यः इति चेन्न साहचर्यस्य सर्वत्र अनियामकत्वात्। अस्य चार्थस्य द्विस्त्रिश्चतुरिति सूत्रे कृत्वोर्थग्रहणेन ज्ञापितत्वात्। अपि च तस्य धातुत्वे पूर्वनिपातापत्तिश्च। पूर्वनिपातशास्त्रस्य अनित्यत्वमस्तीति चेत्तर्हि अन्तरङ्गपरिभाषाज्ञापकपरं भाष्यमेव तस्य धातुत्वाभावे प्रमाणम्। एवं च स आदेश एव इति पर्यवस्यति।

सम्भवव्यभिचाराभ्यामेव विशेषणस्य अर्थवत्त्वनियमेन एति इतः यन्तीत्यादौ तयोस्सत्त्वेन च एचीति एतेरेव विशेषणम्। अत एव इणीकारादौ प्रतिषेधो वक्तव्यः इति वार्तिककृदाह। इकारादौ इणि वृद्धेः प्रतिषेधो वक्तव्यः इति तस्य तात्पर्यम्। अत्र इणि इत्यस्य विशेषणत्वे सम्भवति उपलक्षणत्वस्य अन्याय्यत्वात्। इणीकारादौ प्रतिषेधो वक्तव्य इति वार्तिकात् पूर्वम् एत्यधत्योरिति योगो विभज्यते, एचीति वर्तते इति भाष्यकृदाह। एवं च अत्र धातुद्वयोपादानस्य सत्त्वेन एधतेरपि इदं विशेषणं भवति। इणीकारादावित्यादौ इणित्युपलक्षणम् एधतेरपि इति उभयविशेषणत्ववादिमतम्। मा भवान् प्रेदिधत् इत्यादौ व्यभिचारदर्शनेन एधत्यंशेपि विशेषणत्वस्य आवश्यकत्वात्। कैयटेन च तथैवोक्तत्वात्।

तथाहि मा भवान् प्रेदिधत् इत्यादौ माङ्योगे प्रपूर्वात् एधधातोः णिजन्ताल्लुङि चङि णौ चङ्युपधायाः ह्रस्वः इति उपधाह्रस्वे चङि द्वित्वे प्र इ धि धि अ ति इति जाते अभ्यासस्य जश्त्वे णिलोपे इतश्च लोपे प्र इ दि ध् अ त् इति जाते आद्गुण इति गुणे प्रेदिधत्

इति रूपम्। अत्र एधतेः एजादित्वाभावेन एचीति विशेषणसत्त्वे एव वृद्धिः वार्यते। तदभावे तु वृद्धिः स्यादेवेति। माङ्योगसत्त्वेन आटश्च इति वृद्धौ विशेषाभावस्य न प्रसक्तिः।

प्र एधि अ ति इत्यवस्थायां द्वित्वोपधाह्रस्वत्वयोः प्राप्तयोः उपधाह्रस्वत्वस्य चङ्परणिच्पराङ्गसापेक्षत्वेने बहिरङ्गत्वमेव तथापि बहिरङ्गोऽप्युपधाह्रस्वो द्वित्वात् प्रागेव इति ओणेः ऋदित्करणाल्लिङ्गात् ज्ञापितत्वेन उपधाह्रस्व एव भवति। म भवान् ओणिणत् इत्यादौ हि अन्तरङ्गत्वात् द्वित्वे कृते उपधाह्रस्वस्य प्रसक्तेरेवाभावेन ऋदित्करणेन निषेधस्य अनुचितत्वात्।

भाष्ये तु द्वित्वस्य नित्यत्वमेवोक्तम्। एवं च अन्तरङ्गत्वात् नित्यत्वाद्वा उपधाह्रस्व एव प्रथमतः प्रवर्तते इति स्थितिः। प्र एधि अ ति इत्यवस्थायाम् उपधाह्रस्वे कृते अयमेधतिरेव न इति चेन्न एकदेशविकृतमनन्यवदिति न्यायेन एधतित्वस्य सत्त्वात्। नन्वत्र अचीति विशेषणसत्त्वेऽपि मा भवान् प्रेदिधत इत्यत्र अतिव्याप्तिरस्त्येव।

तथाहि परनिमित्तोऽजादेश उपधाह्रस्वः, तस्मात् पूर्वविधौ वृद्धौ कर्तव्यायामिति चेन्न पूर्वमात्रस्य यत्र विधिस्तत्रैव अचः परस्मिन्निति स्थानिवद्भावः। अत्र वृद्धिः पूर्वपरविधिः। अतो न दोषः। अत्र धिशब्दस्थाने न द्विर्वचनम्। किन्तु द्विःप्रयोगः। अतः वस्नसोरिव प्रकृतिप्रत्ययविभागसम्मोहः एधत्यंशे नास्ति। षाष्ठद्विर्वचनस्य द्विःप्रयोगरूपतायाः भाष्यकृता सिद्धान्तिततत्वात्। अन्यथा जिघांसति इत्यादौ कुत्वमपि न स्यात्।

सन्यङोरित्यस्य षष्ठ्यन्तत्वेन प्रथमैकाचः हन्स् इत्यस्य द्वित्वे सति सकारविशिष्टे प्रकृतिप्रत्यविभावसम्मोहे हन्त्वाभावेन कुत्वस्याप्राप्तेः। चङीति पृथक्सूत्रकरणेन सन्यङोरित्यस्य षष्ठ्यन्तत्वनिर्णयस्यावश्यकत्वात्। अत्र यद्यपि दृष्टान्ते प्रकृतिप्रत्ययसमूहादेशः वस्नसादौ दर्शितः, दार्ष्टातिके अत्र तु प्रकृतिप्रत्ययसमूहादेशो नास्ति, एकदेशयोरेव स्थान्यादेशभाव आपादनीयः तथापि प्रकृत्येकदेशः प्रकृतित्वेन गृह्यत इत्येतावन्मात्रेण दृष्टान्तदार्ष्टान्तिकत्वमित्यवधेयम्।

एवं च हनधातोः सनि हन्स् इत्यस्य द्वित्वम् इति यदस्ति तत् न स्थाने द्विर्वचनम्। अत एव अत्र न प्रकृतिप्रत्ययसम्मोहः। तदुक्तं भाष्ये द्विःप्रयोगो द्विर्वचनं षाष्ठम् इति। एवं च हन्स् इति शब्दरूपे न प्रकृतिप्रत्ययसम्मोहः इति तत्र द्वित्वे कृतेऽपि हनधातुत्वस्य सत्त्वेन तस्मात् परस्य कुत्वं निर्बाधम्।

यद्धर्मपुरस्कारेण पूर्वं तदंशस्य स्थितिः तद्धर्मपुरस्कारेणैव तस्य द्वित्वप्राप्तेः। एवं च प्रकृतेऽपि तुल्यन्यायेन द्वित्वात्परमपि एधधातुत्वमव्याहतमेव इति कृत्वा तत्र विशेषणस्य

आवश्यकत्वात्। अन्यथा केवलस्य एधधातुत्वस्य सत्त्वेन प्रेदिधत् इति प्रयोगे वृद्धिः दुर्वारैव स्यात्। इदं सर्वं दीक्षितादीनां मते।

नव्यास्तु इणीकारादौ प्रतिषेधो वक्तव्यः इति वार्तिके एधत्यनुपादानात् , नत्वेधरेरव्यभिचारात् इति वृत्तेश्च अस्य माभवान् प्रेदिधत् इत्यस्य अनभिधानमेव न्याय्यम्। एत्येधत्योरेचीति विशेषणमिति भाष्यस्य एधत्यंशे सम्भवमात्रेण उपरञ्जकतया विशेषणमिति भाष्यकृदाशः इत्याहुः।

प्रकृतसूत्रे भाष्ये तु एत्येधत्योरिति रूपग्रहणमुत धातुग्रहणमिति प्रश्नः कृतः। तत्र यदि रूपग्रहणम् तर्हि एति इतिरूपं यत्र सम्भवति तत्र वृद्धिः इत्यर्थः। तदा उपैति प्रैति इत्यादिषु प्रयोगेषु वृद्धिरूपस्य कार्यस्य सिद्धत्वेऽपि प्रैषि उपैषि इत्यादिषु वृद्धिः न स्यात्। तुल्यया युक्त्या एधत्यंशे एधति इति रूपं यत्र सम्भवति तत्रैव वृद्धिः इति वक्तव्यम्।

एधधातोरात्मन्नेपदित्वेन सूत्रे एधतीति रूपस्य सत्त्वेन एधतिग्रहणस्य उदाहरणमेव नोपलभ्यते इति न वाच्यम् श्तिपा निर्देशस्थले चारितार्थ्यस्य वक्तुं शक्यत्वात्। यद्यपि एधतेरात्मनेपदित्वेन तस्य एधति इति रूपं तु सर्वथा न सम्भवति, बहुलक्ष्यसंस्कारानुरोधेन तिङन्तस्यैव एधतेरत्र ग्रहणमित्यपि वक्तुं न शक्यम्। रूपग्रहणस्य प्रकृते स्वीकृतत्वेन रूपस्य च प्रथमपुरुषैकवचनस्थले एव सत्त्वात्, तथापि एति इति साहचर्यात् सोऽपि तिङन्त एव गृहीत इत्यभिप्रायः स्वीकर्तव्यः। तत्र च परस्परसाहचर्यं ग्राह्यम् इति तु प्रतिभाति। अन्यथा एत्यभिप्रायेणैव अत्र भाष्यं प्रवृत्तमिति वा चिन्तनीयम्।

स्वरूपग्रहणमिति पक्षं परित्यज्य धातोः ग्रहणमिति पक्षे तु पूर्वोक्तेषु उपैषि उपैमि इत्यादावपि वृद्धिः सिध्यति। धातुग्रहणे तु उपेत इत्यादावपि वृद्धिः प्राप्नोतीति तद्वारणार्थम् इणि इकारादौ प्रतिषेधो वक्तव्यः इति वार्तिकमारब्धम्। इकारदौ इणि धातौ परतः वृद्धेः प्रतिषेधः वक्तव्यः इत्यर्थः अस्य वार्तिकस्य। एवं च उपेत इत्यादौ इण इकारादित्वात् वृद्धिः प्रतिषिद्ध्यते। इदं च वार्तिकं योगविभागात् सिद्धम् इति भाष्यकृद्वचनेन प्रत्याख्यातम्।

तथाहि – वृद्धिरेचि ततः एत्येधत्योः, एत्येधत्योश्चैचि इति भाष्यं वर्तते। एत्येधत्योरेजाद्योः परयोरेव वृद्धिः इत्यर्थस्य आश्रयणेन उपेत इत्यत्र वृद्धिः वार्यते इति तदर्थम् इणीकारादाविति वार्तिकं नारब्धव्यमिति भगवत आशयः प्रतीयते। इणीकारादाविति वार्तिके तु इणीति उपलक्षणमेधतेरपि। एवं च इकारादाविणि इकारादावेधतौ च वृद्धेः प्रतिषेधो वक्तव्य इति वार्तिकार्थः फलति। अत एव एतद्वार्तिकप्रत्याख्यानपरभाष्ये एधतिग्रहणं चरितार्थम्।

एवं च मा भवान् प्रेदिधत् इत्यादौ एधतेरेजदित्वाभावेन वृद्धिः वार्यते इति एतद्भाष्यार्थः इति दीक्षितानामाशयः । अत्र सूत्रे भाष्ये नव्यास्तु – प्रतिषेधवार्तिके इणीति उपलक्षणमेधतेरपि अत एव एत्येधत्योरिति योगं विभज्य तस्यैचीति विशेषणमुक्तं भाष्ये। म भवान् प्रेदिधदित्यादौ व्यभिचारमुपवर्ण्य कैयटादीनां च मतमुपवर्ण्य वार्तिकानुरोधात् एधत्यंशे उपरञ्जकतया विशेषणमित्येव भाष्यतात्पर्यम्। मा भवान् प्रेदिधत् इत्यादेरनभिधानमेवोचितम् इत्याहुः। वार्तिकानुरोधेन भाष्यवचनस्य उपरञ्जकतया व्याख्यानमिति तु नव्यैः अन्यत्र न क्वापि उक्तमिति तु अत्र विशेषः। सति सम्भवे मुनित्रयस्य एकवाक्यत्वमेव न्याय्यमिति तु तेषामाशयः प्रतीयते।

# नामिसूत्रार्थविचारः

**डा. प्रमोद भट्टः**
नव्यव्याकरणविभागः
रा.सं.सं. राजीवगान्धीपरिसरः, शृङ्गेरी

सूत्रमिदमष्टाध्याय्यां षष्ठाध्याये चतुर्थपादे अङ्गाधिकारे वर्तते । एकपदं सत्रम् । नामि इति नुडागमसहितस्य आम् इत्यस्य सप्तमीविभक्त्येकवचनम् । "ढ्रलोपे पूर्वस्य दीर्घोऽणः" (०६-०३-१११)इति सूत्रात् दीर्घः इत्यनुवर्तते । दीर्घशब्देन विधानात् "अचश्च" (०१-०२-२८ )इति परिभाषया अचः इति षष्ठ्यन्तं पदमुपतिष्ठते । "अङ्गस्य" (०६-०४-०१) इत्यधिक्रियते । अचः इत्युपस्थितम् अङ्गस्य विशेषणम् , अतः तदन्तविधिः । एवं च नामि परेऽजन्तस्याङ्गस्य दीर्घः स्यात् इति सूत्रार्थः फलति ।

अङ्गस्य प्रत्ययांशे नित्यसाकङ्क्षतया "अर्थवद्ग्रहणे नानर्थकस्य ग्रहणम् " इति परिभाषया "प्रत्ययाप्रत्यययोः प्रत्ययस्यैव ग्रहणम्" इति परिभाषया च नाम् इति षष्ठीविभक्तिबहुवचनमेव गृह्यते । तेन पामनामित्यादौ द्वितीयान्ते न दीर्घः । तथा हि पाम अस्य अस्तीति विग्रहे पामन् -शब्दात् "तदस्यास्त्यस्मिन्निति मतुप्" (०५-०२-९४) इत्यतः तदस्यास्तस्मिन्निति अनुवर्तमाने "लोमादिपामादिपिच्छादिभ्यः शनेलचः" (०५-०२-१००) इति सूत्रेण लोमन्शब्दस्य पामादिषु पाठात् न प्रत्यये स्त्रीलिङ्गे टापि सवर्णदीर्घे कृते लोमना इति रूपम् । तस्मात् द्वितीयैकवचने अमि "अमि पूर्वः" (०६-०१-१०७) इति पूर्वरूपे लोमनाम् इति रूपम् । अत्रामि नाम् सत्वात् "नामि" इति सूत्रेण लोमेत्यङ्गस्य दीर्घः प्राप्तः न भवति । अत्र नामित्यस्य प्रकृत्येकदेशघटितत्वेनानर्थकत्वात् । यद्यपि नप्रत्ययान्तपामनाशब्देऽनर्थकस्य ग्रहणेऽपि नलोपसिद्धतया दीर्घप्राप्तिरेव नास्ति । तथापि अङ्गनाम् , भावनाम् इत्यादौ दोषः अस्त्येव । नलोपासिद्धत्वेऽपि "नोपधायाः" (०६-०४-०७) इति दीर्घापत्तिश्च । वस्तुतः परिशील्यमाने अङ्गस्य इत्यस्याभावे ब्राह्मणभिस्सा इत्यत्र दोषदानपरभाष्यविरोधेन अत्र प्रकरणे "अर्थवद्ग्रहणे नानर्थकस्य" इति परिभाषायाः "प्रत्ययाप्रत्यययोः प्रत्ययस्यैव ग्रहणम्" इति परिभाषायाश्च अप्रवृत्तिरेवेति अङ्गस्य निमित्तं यन्नाम् तत्र दीर्घः इत्यर्थाभ्युपगमात् षष्ठीबहुवचनस्यैव ग्रहणम् ।

अङ्गस्य इत्यभावे अचः दीर्घः स्यान्नामि इत्यर्थः फलति । तदा चर्मणाम् इत्यत्र दोषः । अपि च अङ्गस्य इत्यस्याभावेऽत्र दीर्घप्रकरणे भाष्यानुरोधात् अर्थवत्परिभाषायाः प्रत्ययाप्रत्ययपरिभाषायाश्च अप्रवृत्या नाम्पदेन यस्य कस्यापि ग्रहणे चर्मणामित्यत्र अजन्तस्य नाम्परकत्वात् दीर्घस्स्यात् । तद्वारणाय अङ्गस्येति अनुवृत्तिः अभ्युपेया ।

अङ्गाधिकारसत्वे प्रत्ययनिरूपितत्वेनन नामि षष्ठीबहुवचनस्यैव ग्रहणात् न दोषः । यद्यपि अकारात्परस्य भिस्मात्रस्यैस्भवति इहापि प्रसज्येत , ब्रह्मणभिस्सा इति भाष्यात् अर्थवत्परिभाषायाः प्रत्ययाप्रत्ययपरिभाषायाश्च अप्रवृत्तिकल्पने फलाभावात् पूर्वोक्तभाष्यस्यैकदेशयुक्तित्वेन अर्थवतः एव नामः ग्रहणे चर्मणामित्यत्र दोषाभावेऽपि णम्धातोः क्विबन्तनिष्पन्ननाम्शब्दे परे चर्म नाम् इत्यत्र दोषः बोध्यः । शेखरेऽपि अङ्गस्येति किम्? चर्मणाम् इत्यत्र चर्मनाम् इत्येव पाठः, णत्वघटितपाठस्तु लेखकप्रमादात् इति तद्व्याख्याकाराः प्रोचुः ।

ननु नामि इति सूत्रस्थाने नुटि इत्येव सूत्रमस्तु । नुटि परे अजन्तस्याङ्गस्य दीर्घः स्यादिति तदर्थः । एवञ्च रामाणाम् इति रूपं सिद्ध्यति, इति चेत् अनश्वः इति न सिद्ध्येत् । तथा हि न अश्वः इति विग्रहे "नञ्" (०२-०२-०६) इत्यनेन नञ्समासे नलोपे नुडागमे च अनश्वः इति रूपम् । अनश्व इत्यत्रेदानीं नुड्वत्वात् नुटि इत्यनेन दीर्घः स्यात् , आनश्वः इति स्यात् , इष्यते च अनश्वः इति । अतः न नुटि इति न्यासितुं शक्यते ।

ननु नुटि इत्येव सूत्रमस्तु । अनश्वः इत्यत्र दोषवारणाय "तस्मान्नुडचि" (०६-०३-७४) इति सूत्रस्थाने "तस्मान्नुगचि" इति न्यासोऽस्तु । लुप्तनकारान्नञः नुक् स्यादुत्तरपदे परे इति हि तदर्थः । नुक् कित्वात् पूर्वपदान्तावयवत्वेन प्राप्नोति । एवञ्च अनश्वः इति सिद्ध्यतीति ।

ननु नुगागमे यदागमपरिभाषया पूर्वपदान्तावयवत्वेन नुकि अन् इत्यत्र पदान्तप्रातिपदिकान्तनकारस्य सत्वाच्च "नलोपः प्रातिपदिकान्तस्य" (०८-०२-०७) इति नलोपापत्तिर्दोषः इति नुग्वक्तुं न शक्यः । ननु नुग्विधानसामर्थ्यादत्र नलोपः न प्राप्नोति । अन्यथा नुगागममुक्त्वा तस्य लोपकरणापेक्षया नुगागमाकरणमेव लघीयः । अतः कारणात् नुग्विधानसामर्थ्यात् नलोपो न ।

ननु नुटि इति न्यासे भृङ्गः इत्यत्र दोषः । तथा हि भृधातोः औणादिकः गन् प्रत्ययः, तस्य नुडागमश्च विधीयते ।नुडयं कित् । अतः धातोः "सार्वधातुकार्धधातुकयोः" (०७-०३-८४) इति प्राप्तगुणस्य निषेधे अनुस्वारे परसवर्णे च भृङ्गः इति रूपम् । अत्रेदानीं नुटि इति न्यासेन दीर्घः स्यात् ।

ननु अत्र दीर्घवारणाय "भृञः किन्नुट् च" इति सूत्रस्य स्थाने "भृञः किन्नुम् च" इति न्यासो भवतु । एवञ्च धातोरेव नुमागमे अनुस्वारपरसवर्णे च भृङ्गः इति सिद्ध्यति । अतः नुटि इति न्यासे न कोऽपि दोषः । अथवा संज्ञादिशब्दानां

साधुत्वप्रयोजकप्रकृतिप्रत्ययादीनां कल्पनयैव साधनस्य वक्तव्यतया भृधातोः न्गक् प्रत्ययेनापि साधुत्वं वक्तुं शक्यते ।

वस्तुतः "आयनेयीनीयियः फढखछघां प्रत्ययादीनाम्" ( ०७-०१-०२) इति सूत्रे शमेः खः शङ्खः इत्यत्र इनादेशमाशङ्क्य "उणादीनि अव्युत्पन्नानि प्रातिपदिकानि" इति भाष्येक्त्या भृङ्गः इत्यत्र नुटि इति सूत्राभावेन नुटीति न्यासे दोषाभावेऽपि अनेकत्र अनेकक्लिष्टकल्पनापेक्षया "नामि" इति सूत्रकरणमेव न्याय्यम् ।

केचित्तु नामि इति सूत्रस्थाने "नि" इति सूत्रन्यासं वदन्ति । नि इति सूत्रं च "सुपि च"(०७-०३-१०२) इत्यनन्तरं पठनीयम् । नि इति सुपीत्यस्य विशेषणत्वात् तदन्तविध्यपवादतया तदादिविधिः । नकारादौ सुपि अजन्तस्याङ्गस्य दीर्घः स्यात् इत्यर्थः । एवञ्च रामाणाम् , हरीणाम् इत्यादीनि रूपाणि सिध्यन्ति । अङ्गना इत्यादौ च नकारादिसुप्परकत्वाभावात् न दोषः । हरिणा इत्यत्र तु दोषः सम्भवति । तथापि तत्र "आङो नाऽस्त्रियाम्" (०७-०३-१२०) इत्यस्य स्थाने "आमि नुगस्त्रियाम्" इति न्यासः कार्यः, आङि परे अङ्गस्य नुग्विधानात् नकारादिसुप्परकत्वाभावाच्च न दोषः । एवं न्यासे अमुना इत्यत्र नाभावस्य अभावेन "न मु ने" (०८-०२-०३) इत्यस्य अप्रवृत्या इदानीम् अमुना इति रूपं न स्यात् । अतः अमुना इति रूपसाधनाय नाभावे इत्यर्थे सूत्रवैयर्थ्येन नकारे कर्तव्ये मुभावो नासिद्धः इत्यर्थस्वीकारान्न दोषः ।

इतरे तु "नामि" इति सूत्रस्थाने "न आमि" इति सूत्रमस्तु "ह्रस्वनद्यापो नुट्" (०७-०१-५४) इति च स्थाने ह्रस्वनद्यापो नुग् इति न्यासोऽस्तु । न आमि इत्यत्र न इति षष्ठ्यन्तम् । तथा च नान्तस्य अङ्गस्य अचः आमव्यवहितपूर्वस्य दीर्घः इत्यर्थः । येन नाव्यवधानम् इति न्यायात् नकारमात्रव्यवधानेऽपि दीर्घः स्यात् इति "नोपधायाः" इति सूत्रमपि न कार्यम् । तत्राप्यनेनैव "न आमि" इत्यनेनैव दीर्घसिद्धेः । रामाणामित्यत्र "अल्लोपो नः" इति अल्लोपस्तु न क्षुद्राणाम् अनिरवसितानाम् इति निर्देशात् "ब्रुवः पञ्चानाम् आदित आहो ब्रुवः" (०३-०४-८४) इति निर्देशात् सन्निपातपरिभाषायाः वा अजुपजीव्यस्य नुकस्तद्विघातके लोपे निमित्तत्वाभावात् । एवञ्च बहुविधन्यासस्वीकारे न कश्चन दोषः, तथापि अनेकत्रानेकक्लिष्टकल्पनज्ञानगौरवापेक्षया यथाश्रुतन्यास एव ज्यायान् इति वदन्ति ।

# नवेति विभाषा – सूत्रार्थविचारः

**विद्वान् अरुणभट्टः**
नव्यव्याकरणविभागः
रा.सं.सं. राजीवगान्धीपरिसरः, श्रृङ्गेरी

महतः शब्दौघस्य साधुत्वसम्पादनार्थं प्रकृतिप्रत्ययद्वारा सम्यग्ज्ञानार्थं च भगवता पाणिनिना उपचतुस्सहस्रं सूत्राणि व्यरच्यन्त । सागरोपमं शब्दराशिं लघुतमैः सूत्रैः आचार्यः व्याकार्षीदिति महद्वैशिष्ट्यं वर्तते । तानि च सूत्राणि षोढा विभक्तानि संज्ञापरिभाषादिरूपेण । षोढा विभक्तेषु सूत्रेषु विधिसूत्राण्येव प्रधानानि भवन्ति । अन्यानि विधिसूत्रसहायकानि भवन्ति । विधिसूत्रमेव मुख्यम् । विभाषा जसि[१] इत्यादिषु शताधिकेषु विधिसूत्रेषु विभाषा इति शब्दश्रवणात् तादृशविधिसूत्रसहायकं"नवेति विभाषा[२]" इति विभाषासंज्ञासूत्रं किञ्चित् विचार्यते ।

याज्ञिकप्रयोगेषु विभाषाशब्दः दृष्टः "मेध्यः पशुरनड्वान् विभाषितः" इत्यादिषु । तस्य विकल्पः अर्थः । तादृशविकल्पः द्विप्रकारकः सन्दृश्यते । यथा "बैल्वः खादिरो वा यूपः स्यात्" इति वा शब्दश्रवणात्  विकल्पःइतिप्रथमः प्रकारः । "अतिरात्रे षोडशिनं गृह्णाति । नातिरात्रे  षोडशिनं गृह्णाति" इति विरुद्धार्थकवाक्यद्वयश्रवणेन अन्यतरस्य वैयर्थ्यापत्या विकल्पः सिद्ध्यति । अयं द्वितीयः प्रकारः ।

इह तु शास्त्रे निषेधः विकल्पश्चेति द्वयं मिलित्वा विभाषा इति बोधयितुं इदमारभ्यते - नवेति विभाषा इति । अनेन सूत्रेण विभाषा संज्ञा उच्यते । कस्य विभाषा संज्ञा ? इति चेत्, "नवा कुण्डिका" "नवा शाटिका" इत्यादिवाक्यश्रवणेन प्रतिषेधार्थकस्य अखण्डनिपातस्य विभाषा संज्ञा  इति चेदत्रोच्यते – "विभाषा दिक्समासे बहुव्रीहौ[३]" इति सूत्रं कृत्वा ततः परं "न बहुव्रीहौ" इति निषेधकरणं पाणिनिकृतं व्यर्थं स्यात् । अतः नवा इति अखण्डनिपातस्य न विभाषा संज्ञा । न वा इतिशब्दस्यापि न संज्ञा । अत्र हि ,न वा इत्यव्ययौ । न च वा च इति  द्वन्द्वे सुब्लुकि नवा इति भवति । ततः पठितः इति शब्दः प्रत्येकमभिसम्बध्यते । "द्वन्द्वादौ द्वन्द्वमध्ये द्वन्द्वान्ते च श्रूयमाणं पदं प्रत्येकमभिसम्बध्यते" इति नियमात् इति प्राञ्चः ।  अत्र नागेशः, न वा इति पृथक् पदे  व्याख्यानात्  इति प्राह ।

---

[१]पाणिनीयाष्टाध्यायी १.१.३२

[२]पाणिनीयाष्टाध्यायी १.१.४४

[३]पाणिनीयाष्टाध्यायी १.१.२८

तथा हि "विभाषा इति महती संज्ञा क्रियते । संज्ञा च नाम यतोन लघीयः। कुत एतत् ? लघ्वर्थं हि संज्ञाकरणम् । तत्र महत्यायाः संज्ञायाः करणे एतत् प्रयोजनम् – उभयोः संज्ञा यथा विज्ञायेत[१]" इति व्याख्यानम् । तदा मध्यमणिन्यायेन इति शब्दः उभयत्र सम्बध्यते इति । व्याख्यानं तु नवा इत्यस्य पृथक् संज्ञाबोधकपरम् इत्यतः द्वन्द्वस्वीकारेऽपि न कापि क्षतिः । किञ्च द्वन्द्वाभावे इति शब्दस्य कदाचित् वा इत्यत्रैव अन्वयः स्यात् । अतः नेति वेति इत्यनयोः विभाषा संज्ञा ।लोके तावत् अर्थबोधनाय शब्दप्रयोगः । अतः लोके शब्दस्य अर्थ एव अर्थः । इति शब्दप्रयोगे तु शब्दस्य शब्द एव अर्थः भवति । तथा हि – गवित्ययमाह इति गोशब्दादितिकरणः प्रयुज्यमाने गोशब्दः स्वस्मात् पदार्थात् प्रच्युतः अर्थपदार्थकः शब्दपदार्थकः सम्पद्यते । इह शास्त्रे तु स्वं रूपं शब्दस्याशब्दसंज्ञा इति परिभाषणात् अर्थविशिष्टः शब्दः संज्ञी इति शब्दस्य शब्द एव अर्थः । इति शब्दः अर्थविपर्यासकृत् । इह सूत्रेऽपि नवा शब्दादितिकरणः प्रयुज्यमाने नवा शब्दः स्वस्मात् पदार्थात् प्रच्युतः शब्दपदार्थकता लौकिकार्थं प्रत्याययति । अतः नवा शब्दस्य यौ अर्थौ निषेधविकल्पौ तयोः विभाषा इति सूत्रार्थः पर्यवस्यति ।

विभाषा तावत् त्रिधा । प्राप्तविभाषा, अप्राप्तविभाषा, उभयत्रविभाषा इति ।

१.प्राप्तविभाषास्थले नास्य सूत्रस्य उपयोगः । तासां पक्षे निवृत्तिमात्रफलकत्वात् । तथा हि दिवस्तदर्थस्य[२]इति विहिता षष्ठीविभक्तिः विभाषोपसर्गे[३] इति सूत्रेण दिव् धातोः उपसर्गयोगे विकल्पेन भवति इत्युच्यते । अत्र पूर्वसूत्रेण यः विधिः नित्यमुक्तं पक्षे तन्निवृत्तिमात्रं क्रियते ।

२. निषेधश्च प्राप्तिं विना अनुपपन्नः इत्यतः अप्रातविभाषास्थले नास्य उपयोगः । तत्र अभावस्य सिद्धत्वेन प्रवृत्तिमात्रं विधीयते इति संज्ञायाः उपयोगो नास्ति । तथा हि – विभाषा लुङ्लृङोः इत्यनेन इङ् धातोःविकल्पेन गाङ् आदेशहः विधीयते । आदेशः केनापि सूत्रेण पूर्वम् अप्राप्त्या अप्राप्तविभाषा ।

३. एवं प्राप्तविभाषास्थले भावांशस्य , अप्राप्तविभाषास्थले अभावांशस्य वैयर्थ्यम् । अतः विभषा श्वेः इत्याद्युभयत्रविभाषार्थमिदं सूत्रम् । विभाषा श्वेः इत्यनेन श्वि धातोः लिटि सम्प्रसारणं विकल्पेन भवति इत्युच्यते । तथा हि – श्वि धातोः किति लिटि शुशुवतुः

---

[१]नवेतिसूत्रभाष्यम्

[२]पाणिनीयाष्टाध्यायी २.३.५८

[३]पाणिनीयाष्टाध्यायी २.३.५९

इत्यादौ वचिस्वपियजादीनां किति[१] इति सूत्रेण नित्यं सम्प्रसारणे प्राप्ते शुशाव इति पिति लिटि च अप्राप्ते विभाषा श्वेः इति विकल्पेन सम्प्रसारणं विधीयते । अतः शुशाव शुशुवतुः शुशुवुः , शिश्वाय शिश्वियतुः शिश्वियतुः इति विकल्पः सिध्यति । नवेति विभाषा इति सूत्रानारम्भे तु विभाषायाः विधिमुखेन प्रवृत्ति भवति इति चेत् । तर्हि पित्स्वेव सप्रसारणविकल्पः स्यात् । यदि प्रतिषेधमुखेन प्रवर्तते चेत् कित्स्वेव प्रवृत्तिः स्यात् , नतु पित्सु । पित्सु विधिमुखेन कित्सु निषेधमुखेन प्रवर्तते इति न वाच्यम् । विनिगमनाविरहेण कामचारः स्यात् । अतः सूत्रमारम्भणीयम् ।

निषेधविकल्पयोः विभाषा इति नवेति इति सूत्रारम्भे तु श्रुतक्रमानुरोधेन "न" इत्यंशेन कित्सु पूर्वं निषेधः प्रवर्तते । ततः किदकिद्रूपे सर्वस्मिन् लिटि निस्सम्प्रसारणतया एकरूपं प्रापिते सति "भवति ,न भवति" इतेकरूपेण विधिमुखेन एव विकल्पः प्रवर्तते । तदेवम् उभयत्रविभाषार्थमिदं सूत्रम् ।

भाष्यकारस्तु विभाषासंज्ञाभावेऽपि लक्ष्या नुरोधात् विधिमुखेन निषेधमुखेन च तत्तत् विकल्पसूत्रस्य प्रवृत्तिं स्वीकृत्य सूत्रस्य प्रत्याख्यानमकरोत् । पूर्वोक्तप्रकारेण प्राप्तविभाषास्थले , अप्राप्तविभाषास्थले च नास्य उपयोगः । उभयविभाषार्थं तु आवश्यकमेव किल इति चेत् ? अत्रोच्यते अभ्यवपूर्वक हृधातो भक्षणार्थत्वात् गतिबुद्धि इत्यनेन कर्मसंज्ञायां प्रप्तायं तदन्यस्मिन् अप्राप्तायां हृक्रोरन्यतरस्याम् इति विकल्पेन विधानात् उभ्यत्र विभाषेऽयम् । अत्र विभाषाभावेऽपि उभयत्रविभाषा । विभाषायाः अभावे नवा इत्यस्य प्रवृत्तिः न स्यात् । एतन्निरासाय वाक्यभेदेन भावत्वेन अभावत्वेन उभयथा पवृत्तिः अवश्यम् अङ्गीकर्तव्या । सूत्रम् अङ्गीकृत्य वाक्यभेदस्वीकारापेक्षया सूत्रम् अनङ्गीकृत्य विकल्पस्य वाक्यभेदेन विधिनिषेधमुखेन च स्वीकारः उचितः ।

तथा च भाष्यकरः -"आचार्यः खल्वपि संज्ञामारभमाणो भूयांसमन्यैरपि शब्दैरेतमर्थं संप्रत्याययति – बहुलम्, अन्यतरस्याम् , उभयथा, वा, एकेषाम् इति" कथयन् अशिष्यो वा विदितत्वात् इति वार्तिकमाश्रित्य प्रत्याचख्यौ । विभाषा इति संज्ञा कृत्वापिभूयिष्टमन्यैरपि पदैः आचार्यः विकल्पं बोधयति यथा- बहुलं , अन्यतरस्याम् ,उभयथा , वा , क्वचिदृषिग्रहणेन च । सर्वस्य पृथक् संज्ञा तु न गृहीता । किञ्च नवेति विभाषा इति सूत्रानारम्भपक्षेऽपि विभाषा इति पदार्थः विकल्पः इति ज्ञायत एव । याज्ञिकाः अपि संज्ञामनारम्भमाणाः विभाषेत्युक्ते अनित्यत्वमवगच्छन्ति । यथा "मेध्यः पशुरनड्वान्

---

[१]पाणिनीयाष्टाध्यायी ६.१.१५

विभाषितः” इति । विभाषादि विकल्पार्थकपदानां लोकवदेव केवलं विकल्पपरत्वेऽपि क्वचिद्विधिमुखेन क्वचिन्निषेधमुखेन लक्षानुरोधेन प्रवृत्तिः भवति । व्यक्तिपक्षे लक्ष्यभेदेन लक्षणभेदात् प्रतिलक्ष्यं सूत्रभेदः । अतः उभयत्रविभाषास्थले लक्षानुरोधेन क्वचिद्विधिमुखेन प्रवृत्तिः, क्वचिन्निषेधमुखेन इति इदं सूत्रं नावश्यकमेव । जातिपक्षे तु सूत्रमाश्यकमिति कैयटः । जातिपक्षे सूत्रं न प्रवृर्तते इत्यत्र प्रमाणाभावेन पक्षद्वयेऽपि सूत्रं नावश्यकमिति नागेशः । तथापि सूत्रं तु मन्दमध्यादिकारिणामावश्यकमेव इत्यत्रैव विरम्यते ।

यदत्र सौष्ठवं किञ्चित्तद्गुरोरेव मे नहि ।
यदत्रासौष्ठवं किञ्चित्तन्ममैव गुरोर्नहि ॥

**परिशीलितग्रन्थाः –**


१ पाणिनीयाष्टाध्यायी

२ महाभाष्यम्

३ शब्देन्दुशेखरः लघुशब्देन्दुशेखरः च

४ वैयकरणसिद्धान्तकौमुदी

५ सिद्धान्तकौमुदीव्याख्याः-तत्वबोधिनी ,बालमनोरमा , सुखबोधिनी च

# न्यायशास्त्रस्य माहात्म्यम्

**आचार्यः पीयूषकान्तदीक्षितः**
कुलपतिः,
उत्तराखण्डसंस्कृतविश्वविद्यालयः हरिद्वारम्

**अनुभवहेतुः सकले सद्यः समुपासिता मनुजे ।**
**साकाङ्क्षाऽऽसन्ना च स्वार्थे योग्या सरस्वती देवी ॥**

मङ्गलपद्यमिदं जगदीशस्य सर्वस्वभूतायाः शब्दशक्तिप्रकाशिकायाः विद्यत इति वयं सर्वे तर्करसिकाः जानीमः । तार्किकाः तर्कबलेन समस्यासमाधानधौरेया भवन्ति । साम्प्रतं समाजे मूर्तस्वरूपायाः सरस्वत्याः स्वरूपं तात्विकं तावदजानानाः जनाः कदाचिद् विवदमाना दृश्यन्ते , परं पद्येनानेन वाक् स्वरूपायाः सर्वजनसुसम्बद्धायाः सरस्वत्याः शारदाम्बायाः सार्वभौमं स्वरूपं निरूप्य श्रीमता जगदीशतर्कालङ्कारेण परमतार्किकेण नैयायिकानां तर्कवैभवमेव प्रादर्शि ।

महर्षिगौतमप्रणीतस्य न्यायशास्त्रस्य मर्मज्ञैः नैयायिकैः जयपराजयहेतुत्वेन, प्रमाणनिश्चितौ वा साधनोपालम्भौ तर्कविषयीकृतौ वा वादादिषु अभिधातव्यौ । प्रमाणनिश्चितेन साधनेन उपालम्भेन तर्कविनिश्चितेन वा साधनेन उपालम्भेन यथा क्रमम् अर्थप्रतिपत्तिरनर्थपरिहारश्च सम्भवतः । यदा कश्चन प्रेक्षावान् प्रमाणेन अर्थम् अवधार्य प्रवर्तते, तदास्य सोऽर्थः सिद्ध्यत्येव । यदा पुनः निश्चयाभाववेलायां कारणोपपत्तितः अर्थं सम्भाव्य प्रवर्तते तदानीमपि अस्य प्रेक्षाकारिणः सोऽर्थस्तावत् प्रसिद्ध्यत्येव । काकतालीयन्यायेन यदि व्यभिचरति, यथा तन्तुषु प्रवृत्तस्य कुविन्दस्य पट इति ।

एतावता नैयायिकैः कुशलैः परैराक्षिप्तैरपि वादादिषु तावन्न प्रवर्तितव्यं यावन्न स्वात्मनः सामर्थ्यं ज्ञानाद्यतिशयलक्षणम्, एतद्विपरीतञ्च परस्य प्रतिवादिनः असामर्थ्यं, समातिप्राश्निकयोरन्यायप्रवृत्तिनिवारणसामर्थ्यं माध्यस्थ्यञ्च सुनिश्चितं सुसंभावितं वा भवति । यः पुनरहङ्कारमात्रेण स्वसामर्थ्यादिकमविचार्यैव प्रवर्तते स नैयायिक एव न भवति, अविचारकत्वात् । न हि सुबुभुक्षितोऽपि प्रेक्षापूर्वकारी बुधः सविषत्वाशङ्कामनिवर्त्य भोक्तुमन्नं प्रवर्तते इति । संशये सति, प्रवृत्तिः भवति न वेति न सन्देह्यम् , अर्थसंशयस्यापि प्रवृत्तिहेतुत्वात् । यदि लोके प्रामाणिकैः अनर्थसंशयानर्थोहानर्थनिश्चयान्यतमस्य अप्रवृत्तिहेतुत्वं मन्यते, तर्हि तुल्ययुक्त्या तावदर्थसंशयार्थोहार्थनिश्चयान्यतमस्य प्रवृत्तिहेतुत्वमपि नूनं मन्तव्यम् । एतावता संशयस्य वादादिषु प्रवृत्तिहेतुत्वं नास्तीति कथनं कथं श्रद्धेयम् ? इत्येवं प्रश्नस्तु नानुष्ठेयः । अन्यथार्थसंशयस्य प्रवृत्तिहेतुत्वात् । अर्थात्

अन्यादृशस्य वादादिस्थलभिनस्यैव संशयस्य विशिष्टप्रकृतिकस्य प्रवृत्तौ हेतुता तर्कबलेनाभ्युपेयेति निर्गलति तात्पर्यम् ।

सर्वलोकानुभवो यद्यदा कश्चन दुःखार्तो जनः समुपलब्धेषु दुःखोपशमहेतुषु सन्दिह्यमानोऽन्यं दुःखोपशमनहेतुं न पश्यति, तदर्थसंशयादेव दुःखोपशमहेतौ प्रवर्तते , प्रवर्तमानस्य हि जनस्य कदाचित् दुःखनिवृत्तिः दृश्यत अपि । परं सन्दिहानस्य जनस्य अप्रवर्तमानस्य तु दुःखं तदवस्थमेव महत्कष्टं जनयतीति । एतावता यदापि इष्टार्थहेतुषु सन्दिह्यमानः तावदन्यम् इष्टार्थहेतुं नावधारयति , प्रवृत्तौ च प्रयासभूयस्त्वमनर्थप्राप्तिं वा न सम्भावयति तदार्थसंशयादेव सर्वोऽपि प्रवर्तत इति निरातङ्कमनुभूयते । इत्थं विचारकस्य अर्थसंशयोऽपि प्रवृत्तिहेतुरिति निर्धार्यते ।

कथाभेदयोः जल्पवितण्डयोस्तु पराजयं प्राप्तस्य जनस्य महाननर्थो भवति , अप्रवर्त्तमानस्य तु न काचिन्महती क्षतिरित्यतो विचारकैः नैयायिकैः विशेषतया सन्देहाद् वादेऽपि प्रथमं न प्रवर्तितव्यम् । असत्साधनादिप्रयोगं कुर्वाणस्य हि जडबुद्धिविषयत्वेन नूनम् अनवधर्मवचनत्वप्रसङ्गात् । योऽपि प्रथमं साधनसामर्थ्यादनिश्चयः तन्निश्चयार्थं गुरुशिष्यसब्रह्मचारिभिः वादं करोति सोऽपि शिष्य एव मन्तव्यः ज्ञानार्जनाभिप्रायत्वात् शास्त्रार्थचिन्तनप्रवृत्तवन्न खलु सम्यग्वादीत्यवधेयं विशेषतः ।

एवं वादनिपुणानां नैयायिकानां न्यायविद्या तावत् प्रमाणादिभिः षोडशपदार्थैः प्रविभज्यमाना समासां विद्यानां प्रदीपस्थानीया, सर्वकर्मणाम् उपायभूता, इह जगतीतले प्रथितानां सर्वधर्माणाम् आश्रयत्वेन च कीर्तिता तावत् कौटिल्येन स्वरचितेऽर्थशास्त्रे विद्योद्देशप्रकरणे ।

सिद्धान्ततः भारतीयैः मुख्यगौणपुरुषार्थभेदेन चतस्रो विद्याः धर्मार्थकाममोक्षशास्त्रस्वरूपार्थाः मुक्तकण्ठेनाभ्युपगताः । एतेषु चतुर्धा प्रविभक्तेषु पुरुषार्थेषु काममोक्षौ सुखदुःखोपगमापगमावुक्तौ । काममोक्षयोः उपायौ तु दृष्टादृष्टभेदेन चिन्तकैः अर्थकामौ प्रोक्तौ ।

एवं स्वीकारे सति त्रय्यान्वीक्षिक्योः अपवर्गात्मकैकप्रयोजनकत्वादभेदः प्राप्नोतीति नैवाशङ्कनीयम् । विचारकविषयत्वेन सर्वविद्यानुग्राहकत्वेन चास्याः आन्वीक्षिक्याः सर्वविद्याभ्यः प्राधान्यमवान्तरभेदश्चास्तीति निर्णयात् । निरुपमायाः अस्याः अक्षपादप्रणीतायाः आन्वीक्षिक्याः सर्वविद्यानुग्राहकत्वं तावत् न्यायशास्त्रत्वादेव निश्चेयम् । न्यायशास्त्रेणैव हि सर्वविद्यानां प्रामाण्यं समर्थ्यते ।

अन्यान्यपि वेदान्तादिशास्त्राणि प्रत्यक्षादिप्रमाणविषयाणीति तथ्यं स्थितावस्यां न्यायशास्त्रमेवेदं कथं प्रतिपत्तव्यमिति प्रश्नस्य समाधानं तर्कशास्त्रेऽस्मिन् न्यायप्रवृत्तिशुध्द्यङ्गत्वेन संशयादीनामुद्देशलक्षणपरीक्षामुखेन सावधि सविस्तरं प्रतिपादनात्मकं अनितरसाधारणं विशेषं पुरस्कृत्य कार्यम् । गौतमीये न्यायशास्त्रे संशयादीनां पृथक् प्रतिपादनादेव अन्येषाम् अनुमानादिप्रमाणप्रतिपादनपराणामपि शास्त्राणां न न्यायशास्त्रत्वं प्रसिध्यति । फलतः न्यायप्रधानत्वादियमेव न्यायविद्या सर्वविद्यानुग्राहकत्वात् निश्रेयसहेतोस्तत्त्वज्ञानस्य च निमित्तत्वात् उत्तमेति ध्येयम् ।

न्यायविद्यायास्तावदप्रतिमायाः आन्वीक्षिकीपदेनोल्लेखं कुर्वता महर्षिणा वात्स्यायनेन आन्वीक्षिकीपदव्युत्पत्तिः एवमकारि, अनु पश्चादीक्षणमन्वीक्षा, तया प्रवर्त्तत इत्यान्वीक्षिकी न्यायविद्या न्यायशास्त्रमिति । कौटिल्योऽपि स्वकीयेऽर्थशास्त्रे एवं निर्दिशति - सांख्यं योगो लोकायतं चेत्यान्वीक्षिकी । धर्माधर्मौ त्रय्यां नयानयौ दण्डनीत्यां , बलाबले चैतासां हेतुभिरन्वीक्षमाणा लोकस्योपकरोति । व्यसनेऽभ्युदये च बुद्धिमवस्थापयति, प्रज्ञावाक्यवैशारद्यं करोति । इमास्तुचतस्रो विद्याः पृथक् प्रस्थानाः प्राणभृतामनुग्रहायोपदिश्यन्ते, यासां चतुर्थीयमान्वीक्षिकी न्यायविद्या । तस्याः पृथक्प्रस्थानाः संशयादयः पदार्थाः । तेषां पृथग्वचनमन्तरेणाध्यात्मविद्यामात्रमियं स्यात् , यथोपनिषदः । तस्मात् संशयादिभिः पदार्थैः पृथक् प्रस्थाप्यते । तत्र नानुपलब्धे न निर्णीतेऽर्थे न्यायः प्रवर्त्तते । किं तर्हि ? संशयितेऽर्थे । तथा चोक्तम् –

" विमृश्य पक्षप्रतिपक्षाभ्यामर्थावधारणं निर्णयः " (१.१.४१) इति ।

-----------------------

# उपाधिप्रकरणसारः

**प्रो. का. इ. मधुसूदनः**
नव्यन्यायविभागाध्यक्षः
रा.सं.सं. राजीवगान्धीपरिसरः, श्रृङ्गेरी

विदितमेवेदं यत् किञ्चिद्वस्तुसाधनाय प्रयुज्यमानो हेतुः द्विविधो भवति, प्रयोजकः अप्रयोजकश्चेति । तत्र अनुकूलतर्कवान् हेतुः प्रयोजकः । तद्रहितश्च अप्रयोजकः । अनुकूलतर्करहितत्वमेव चाप्रयोजकत्वम् । तद्वान् हेतुः द्विविधः – शङ्कितोपाधिकः निश्चितोपाधिकश्चेति । यावत् साध्याभाववतः हेतुमत्त्वमत्यल्पमपि शङ्क्यते - 'हेतुरयं व्यभिचरित' इत्याक्षेपः क्रियते , तावत् हेतोः व्याप्तिग्रहो न सम्भवति । उपाधिनिश्चये सति तु सुतरां तदसम्भवः । तदुक्तं वृद्धैः –

**यावच्चाव्यतिरेकित्वं शतांशेनापि शङ्क्यते ।**
**विपक्षस्य कुतस्तावत् हेतोर्गमनिका बलम् ॥**

इति । तत्र कोऽसौ उपाधिर्नाम यज्ज्ञानं व्याप्तिग्रहं विघटयति इति प्रबन्धेऽस्मिन् यथामति विचार्यते पूर्वसूरिग्रन्थपर्यालोचनया ।

साध्यत्वाभिमतव्यापकत्वे सति साधनत्वाभिमतव्यापकः उपाधिः । अयोगोलकं धूमवत् वह्नेरित्यत्र धूमवति सर्वत्र महानसादौ आर्द्रेन्धनसंयोगः (आर्द्रेन्धनमेव वा ) वर्तते , वह्निरूपसाधनवति पक्षे च न वर्तते इति साध्यव्यापकत्वे सति साधनाव्यापकः सः उपाधिः । सत्यन्तदलानुपादाने वह्निमान् धूमात् इत्यत्र पर्वतत्वस्योपाधित्वापत्तिः इति तदुपादानम् । तन्मात्रोपादाने च तत्रैव वह्निव्यापके द्रव्यत्वेऽतिव्याप्तिरतः विशेष्यदलम् । दलद्वयोपादानादेव च कार्यत्वं प्रति सावयवत्वस्य सावयवत्वं प्रति कार्यत्वस्य च उपाधित्वापत्तिवारणम् । साध्यत्वसाधनत्वयोः व्यापकत्वव्याप्यत्वरूपयोः सोपाधिके वस्तुतो न सम्भवः इत्युभयत्र अभिमतत्वोक्तिः । यद्यपि साध्ये उपाधिव्याप्तिग्रहे सत्येव उपाधौ साध्यनिष्ठव्याप्तिनिरूपकत्वरूपसाध्यव्यापकत्वज्ञानम् , उपाधिव्यापकयावदन्तर्गते उपाधौ साध्यनिष्ठव्याप्तिनिरूपकत्वज्ञाने सत्येव च साध्ये उपाधिव्याप्तिज्ञानम्, तस्य यावदुपाधिव्यापकव्यापकत्वरूपानौपाधिकत्वघटकत्वात् इत्यन्योन्याश्रयः - तथापि व्याप्तिज्ञाने अनौपाधिकत्वज्ञानस्य हेतुत्वाभावात् न दोषः । अथवा लाघवात् साध्यव्यापकत्वं साध्यवन्निष्ठात्यन्ताभावाप्रतियोगित्वम् । तत्प्रतियोगित्वरूपञ्च साधनाव्यापकत्वम् । अव्याप्यवृत्तीनां द्रव्यत्वादिसाध्यकसंयोगाद्युपाधीनां साध्यवन्निष्ठाभावाप्रतियोगित्वमुपपादयितुं प्रतियोगिव्यधिकरणत्वेनाभावः विशेषणीयः ।

ISSN 2249-538X 

अत एव द्रव्यं गुणादित्यादौ संयोगादीनां गुणोऽभिधेयादित्यादौ संयोगाभावादीनाञ्च न साधनाव्यापकत्वम् । स्वावच्छिन्नानधिकरणसाध्याधिकरणकं यद्यत् तदन्यत्वे सति स्वावच्छिन्नानधिकरणसाधनाधिकरणको यो धर्मः तद्वत्त्वं तेन रूपेण उपाधित्वमिति निष्कर्षः । प्रथमं स्वपदमन्यत्वप्रतियोगिपरम् । द्वितीयञ्च उपाधितावच्छेदकपरम् ।

नन्वेवं सति वायुः प्रत्यक्षः प्रत्यक्षविषयाश्रयत्वात् इत्यत्र पक्षधर्मबहिरिन्द्रियद्रव्यत्वावच्छिन्नप्रत्यक्षत्वव्यापके उद्भूतरूपवत्त्वे, काकः श्यामो मित्रातनयत्वादित्यत्र साधनावच्छिन्नसाध्यव्यापके शाकपाकजत्वे चाव्याप्तिः । तयोः साध्यवन्निष्ठाभावाप्रतियोगित्वाभावात् । न चेष्टापत्तिः, उभयत्रैव व्यभिचारोन्नायकत्वसत्त्वेन दूषकताबीजसाम्यात् । तयोरुपाधित्वानङ्गीकारे सिद्धान्तविरोधाच्च । काकादेः हि मित्रातनयत्वेन श्यामत्वसाधने शाकपाकजत्वस्य प्रत्यक्षविषयाश्रयत्वेन वायोः प्रत्यक्षत्वे साध्ये च उद्भूतरूपवत्त्वस्य शास्त्रे व्यभिचारानुमानप्रयोजकत्वेन उपाधित्वं स्वीकृतम् ।

किञ्च पर्वतो धूमवान् वह्नेरित्यादौ पर्वतेतरादौ अतिव्याप्तिः । तादात्म्यसम्बन्धेन तस्य साधनाव्यापकत्वात् , साध्यसन्देहदशायामुपाधित्वग्रहानुरोधेन पक्षातिरिक्ते एव साध्यव्यापकत्वस्य ग्राह्यत्वेन तस्यापीह सत्वात् । न च साध्यव्यतिरेके साध्ये पर्वतेतरान्यत्वे हेतौ इतरान्यत्वस्य असिद्धिवारणार्थं पर्वतपदं विशेषणम् इति व्यभिचारावारकविशेषणत्वात् पर्वतेतरस्य नोपाधित्वम् । येन रूपेण उपाधेः साध्यव्यापकता तद्रूपावच्छिन्नतदभावेन साध्याभावसाधने व्यभिचारावारकविशेषणशून्यत्वे सतीति विशेषणस्य विवक्षितत्वात् इति वाच्यम् । एवं तर्हि पक्षे साध्याभावेन उन्नीतस्य वह्निरनुष्णः कृतकत्वादित्यादौ वह्नीतरत्वस्याप्युपाधितानुपपत्तेः । न चेष्टापत्तिः , इतरान्यत्वस्याप्रसिद्ध्या वह्न्यादिविशेषणं विना व्याप्तिग्रहासम्भवेन वह्न्यादिविशेषणे व्याप्तिग्रहानुपयुक्तत्वरूपस्य दूषणावहस्य वैयर्थ्यस्याभावात् इति चेत् , न, यद्व्यभिचारित्वेन साधनस्य साध्यव्यभिचारित्वं सः उपाधिः । विशेषणताविशेषसम्बन्धघटितसामानाधिकरण्यसम्बन्धेन यद्व्यभिचारित्वविशिष्टं साध्यव्यभिचारित्वं साधनवृत्ति स उपाधिरिति । वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वादित्यादौ विशिष्टसाध्यव्यापकानामुपाधीनामुद्भूतरूपवत्त्वादीनां व्यभिचारित्वेन विशिष्टं साध्यव्यभिचारित्वमपि साधनवृत्त्येव । वह्निमान् धूमादित्यत्र साध्यव्यापके वह्निसामग्रीमत्त्वेऽतिव्याप्तिवारणाय साधनवृत्तित्वं निवेशितम् । लक्षणञ्च पर्यवसितसाध्यव्यापकत्वे सति साधनाव्यापकत्वम् । अनेनैव रूपेण ज्ञातस्य उपाधेः दोषत्वम् । यद्धर्मवति साध्यं वर्तमानं सामानाधिकरण्यसम्बन्धेन तादृशयत्किञ्चिद्धर्मविशिष्टं पर्यवसितं साध्यम् । स च धर्मः काकः श्यामो मित्रातनयत्वादित्यादौ साधनमेव । वायुः

बहिरिन्द्रियजन्यप्रत्यक्षविषयः प्रमेयत्वादित्यादौ द्रव्यत्वादिः । धूमवान् वह्नेरित्यादौ महानसत्वादिः ।

उपाधिव्यभिचारेण साध्यव्यभिचारोऽनुमीयते । साध्यव्याप्यस्य साध्याव्याप्यस्य वा साध्यव्यापकस्य व्यभिचारेण साधनस्य साध्यव्यभिचारस्तावत् सुग्रहः । व्यापकव्यभिचारिणः तद्व्याप्यव्यभिचारावश्यम्भावात् । साधनावच्छिन्नपक्षधर्मावच्छिन्न-साध्यव्यापकयोः व्यभिचारित्वेन साधनस्य साध्यव्यभिचारित्वमेव अनुमीयते , यथा ध्वंसोऽनित्यः इत्यत्र भावत्वस्य , वायुः प्रत्यक्षः इत्यत्र उद्भूतरूपवत्त्वस्य च ।

न च विशिष्टसाध्यव्यापकव्यभिचारित्वेन हेतुना विशिष्टसाध्यव्यभिचारित्व-मेवानुमातुं शक्यते , तत्कथं शुद्धसाध्यव्यभिचारग्रहः इति वाच्यम् । विशेषणाव्यभिचारिणि साधने विशिष्टव्यभिचारस्य विशेष्यव्यभिचारपर्यवसायित्वात् । अत एव वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वात् इत्यत्र उद्भूतरूपवत्त्वव्यभिचारित्वेन विशिष्टसाध्यव्यभिचारसाधने नार्थान्तरम् । यतः विशेषणाव्यभिचारित्वेन ज्ञाते साधने सिध्यन् विशिष्टसाध्यव्यभिचारः विशेष्यव्यभिचारित्वेतरविशिष्टसाध्यव्यभिचारित्वस्य बाधग्रहबलात् विशेष्यसाध्यव्य-भिचारित्वमादायैव सिध्यति । विशेषणाव्यभिचारसाधने विशिष्टसाध्यव्यभिचारस्य विशेष्यीभूतशुद्धसाध्यव्यभिचारस्वरूपत्वेन शुद्धसाध्यव्यभिचारस्यापि व्यापकतावच्छेदक-रूपावच्छिन्नत्वसत्त्वात् । इतरकोटिबाधसहकारस्थले व्यापकतानवच्छेदकरूपेणापि व्यापकतावच्छेदकावच्छिन्नानुमितिस्वीकारेण अनुमितेः विशिष्टसाध्यव्यभिचारित्व-प्रकारकत्वेऽपि क्षतिविरहात् । विशेष्यव्यभिचारित्वाविषयकत्वे प्रतीतेरप्रमात्वप्रसङ्गात् ।

यदि चानुमितेः व्यापकतावच्छेदकप्रकारकत्वनियमः स्वीक्रियते, तदापि प्रत्यक्षस्पर्शाश्रयत्वं प्रत्यक्षत्वव्यभिचारि द्रव्यत्वाव्यभिचारित्वे सति द्रव्यप्रत्यक्षत्वव्यापकव्यभिचारित्वात् चक्षुरादिनिष्ठमहत्त्ववत् इत्यनुमानं प्रत्यक्षपरिमाणवत्त्वरूपोपाध्यभिप्रायेण सम्भवत्येव । एवं मित्रातनयत्वं श्यामत्वव्यभिचारि मित्रातनयत्वव्यभिचारित्वे सति श्याममित्रातनयत्वव्यापकव्यभिचारित्वात् व्यतिरेकेण अघटत्ववत् इत्यपि अनुमानं सम्भवति । अतो नार्थान्तरम् ।

किञ्च अर्थान्तरं पुरुषदोषः, तदुद्भावकस्य पुरुषस्य निग्रहस्थानमात्रत्वात् । व्यभिचारानुमितिप्रतिबन्धकान्तरस्य व्यभिचारानुमितिपूर्वदशायामभावात् ध्वंसो विनाशी जन्यत्वादित्यादौ भावत्वादिकमुपाधिः दोष एव । तेनापि परम्परया व्यभिचारानुमितिनिर्वाहेण परोक्तसाध्यसिद्धिप्रतिबन्धस्य उद्देश्यस्य निर्वाहात् ।

न चावच्छिन्नसाध्यव्यापकत्वस्यापि दोषताप्रयोजकत्वे शब्दोऽभिधेयः प्रमेयत्वादित्यत्र अश्रावणत्वमुपाधिः स्यात् , पक्षधर्मगुणत्वावच्छिन्नसाध्यव्यापकत्वज्ञानसम्भवात् । एवं जलं प्रमेयं रसवत्त्वादित्यत्र पक्षधर्मावच्छिन्नसाध्यव्यापकत्वज्ञानसम्भवात् पृथिवीत्वमुपाधिः स्यात् इति वाच्यम् । केवलान्वयित्वसाधकप्रमाणेन शब्दजलयोः साध्यसिद्ध्या उपाधेः पक्षधर्मगुणत्वावच्छिन्नसाध्यव्यापकत्वानिश्चयेन दोषाभावात् । केवलान्वयित्वसाधकप्रमाणाभावे तु दोषस्य इष्टत्वात् ।

न च पक्षेतरेऽतिव्याप्तिः , द्रव्यत्वाद्यवच्छिन्नसाध्यव्यापकत्व-तदवच्छिन्नसाधनाव्यापकत्वज्ञानस्य तत्रापि सम्भवात् । पक्षेतरस्य उपाधित्वं तु नाभ्युपगन्तुं शक्यम् । तथा सति सर्वत्रैव तादृशोपाधिसम्भवेन अनुमानमात्रोच्छेदे व्यभिचारानुमानाधीनस्य दूषकत्वस्यापि उपाधौ दुर्वचतापातात् इति वाच्यम् । तत्रानुकूलतर्काभावेन यद्धर्मावच्छिन्नसाधनाव्यापकत्वं तद्धर्मावच्छिन्नसाध्य-व्यापकत्वस्यानिश्चयात् । यदा तु तन्निश्चयसद्भावः , तदा बाधोन्नीतपक्षेतरे तन्निश्चयवत् पक्षेतरनिष्ठतन्निश्चयस्यापि दोषत्वात् । सहचारदर्शनादिकं च अनुकूलतर्काभावे संशयाधायकम् । बाधोन्नीतपक्षेतरे तु अनुकूलतर्कः भवत्येव । उपाधिशून्ये पक्षे साध्याभावनिश्चयस्यैव अनुकूलतर्कत्वात् । तस्य तथात्वं च व्यभिचारसंशयप्रतिबन्धकत्वात् ।

पर्वतवृत्त्यन्यत्वेऽपि नोपाधित्वनिश्चयसम्भवः , अनुकूलतर्काभावेन तत्र तादृशसाध्यव्यापकतानिश्चयासम्भवात् । व्यापकताग्राहकानुकूलतर्कसत्त्वादेव च धूमे साध्ये आर्द्रेन्धनप्रभववह्निमत्वस्य उपाधित्वं निश्चीयते । एवं द्रव्यबहिरिन्द्रियप्रत्यक्षत्वे उद्भूतरूपवत्त्वस्य, मित्रातनयश्यामत्वे शाकपाकजत्वस्य, जन्यानित्यत्वे भावत्वस्य च उपाधित्वनिश्चयः । आर्द्रेन्धनप्रभववह्न्युत्कर्षेण धूमोत्कर्षात् प्रथमे , द्रव्यबहिरिन्द्रियप्रत्यक्षं प्रति उद्भूतरूपस्यानन्यथासिद्धान्वयव्यतिरेकात् द्वितीये, नरीयश्यामत्वं प्रति शाकपाकस्य जनकत्वबोधकवैद्यकात् तृतीये , अप्रमाणिकानन्तध्वंसप्रतियोगिनिष्ठतत्कारणत्व-कल्पनामपेक्ष्य ध्वंसानन्तत्वकल्पनायां लाघवात् चतुर्थे च साध्यव्यापकतानिश्चयात् । द्रव्यं जलत्वादित्यत्र च कार्यकारणभावग्रहोपजीवी अनुकूलतर्कः एव व्याप्तिग्राहकः । जलत्वं यदि द्रव्यत्वव्यभिचारि स्यात् तदा संयोगव्यभिचारि स्यात् संयोगत्वावच्छिन्नं प्रति द्रव्यत्वेन समवायिकारणत्वादित्येवं परम्परया संयोगत्वावच्छिन्नद्रव्यत्वावच्छिन्नयोः कार्यकारणभावग्रहमुपजीव्यतर्कप्रसरात् ।

नन्वेवं सति यत्र हेतुसाध्ययोः साध्योपाध्योश्च सहचारग्रहः व्यभिचारग्रहश्च वर्तते, न तु अनुकूलतर्कः, तत्रोपाधौ साध्यव्यापकतानिश्चयासम्भवात् उपाधित्वज्ञानं न दोषः स्यादिति चेत्, न, तत्र व्यभिचरसंशयाधायकत्वेन संदिग्धोपाधित्वोपगमात् । यदा च हेतौ अनुकूलतर्कोऽवतरति तदा हेतौ साध्यव्याप्यत्वम्, यदा च साध्ये तर्कावतारः तदा उपाधौ साध्यव्यापकत्वं निश्चीयते । उपाधिमात्रस्य दूषकत्वव्याघातप्रसङ्गेन न पक्षेतरस्य हेतुव्यभिचारसंशयाधायकत्वम् । अतो न सन्दिग्धोपाधिरपि सः ।

वस्तुतस्तु विशेषदर्शनविरहदशायामुपाध्यन्तरस्य यथा उपाधित्वसंशयो भवति तथा पक्षेतरस्य उपाधित्वसन्देहदशायामपि न व्याप्तिग्रहोत्पादः । तथापि कथकसम्प्रदायानुरोधात् कथायां सन्दिग्धोपाधित्वे पक्षेतरस्य नोद्भावनम् ।

केचित्तु उपाधिलक्षणे साधनाव्यापकत्वं न निवेशनीयम्, सत्प्रतिपक्षोत्थापकतायामनुपयोगात् , करका पृथ्वी कठिनसंयोगादित्यत्र साधनव्यापके अनुष्णाशीतस्पर्शवत्त्वेऽव्याप्तिकरत्वाच्च । उपाधेश्च सत्प्रतिपक्षोन्नायकत्वेन दूषकत्वमित्यभिप्रयन्ति ।

उपाधेः किमनुमितिकारणप्रतिबन्धकज्ञानप्रयोजकत्वमुत साक्षादनुमिति-प्रतिबन्धकज्ञानप्रयोजकत्वमिति चेत्, अत्र कालभेदेन व्यवस्थितविकल्पः । स्वव्यतिरेकलिङ्गकसाध्याभावानुमितिप्रयोजकतारूपसत्प्रतिपक्षतया हेतुविशेष्यक-व्याप्त्यभावप्रकारकज्ञानप्रयोजकतया तदितररूपेण वा भवतु दोषत्वमुपाधेः , सर्वथा साध्यव्यापकताग्रहः अपेक्षणीय एव । तमन्तरेण तेषामभावात् । अतः उपाधिनिश्चयात् व्यभिचारप्रत्यक्षप्रयोजकतया व्यभिचारनिश्चयः तत्संशयात् सत्संशयः इति मानसव्यभिचारप्रत्यक्षप्रयोजकतया, स्वनिष्ठसाध्यव्यापकतावच्छेदकरूपावच्छिन्नाव्याप्यत्वेन हेतुना हेतौ साध्यव्याप्तिविरहानुमितिप्रयोजकतया वा निश्चीयमानोपाधेः दूषकत्वम् । उपाधित्वसंशयस्य तु साध्यव्यभिचारवत् साध्यव्याप्तिविरहस्यापि संशयं प्रत्येव क्वचित् प्रयोजकत्वम् ।

अथवा साध्यव्यापकोपाध्यभाववद्वृत्तित्वेन साध्यव्यभिचारित्वं हेतोः अनुमेयम् । तथा च क्वचित् साध्यव्यभिचारानुमितिप्रयोजकतयापि उपाधेः दूषकत्वम् । इदञ्च पर्यवसितसाध्यव्यापकत्वे सति साधनाव्यापकत्वरूपोपाधित्वज्ञानस्य दूषकताबीजम् । पक्षवृत्तिधर्मावच्छिन्नसाध्यव्यापकत्वे सति पक्षावृत्तित्वरूपोपाधित्वज्ञानस्य तु सत्प्रतिपक्षोन्नायकत्वं क्वचिच्च बाधोन्नायकत्वं दूषकताबीजम् । सत्प्रतिपक्षोन्नायकत्वं नाम पक्षे साध्याभावव्याप्योपाध्यभाववत्तानिश्चयप्रयोजकत्वम् । बाधोन्नायकत्वञ्च पक्षे

साध्याभावानुमितिप्रयोजकत्वम् । तच्च तुल्यबलयोः साध्यव्याप्य-हेतुमत्तानिश्चययोरभावदशायां पक्षे साध्याभावव्याप्योपाध्यभाववत्तानिश्चयद्वारा सम्भवति । उक्तार्थे उपाधिशब्दप्रवृत्तिः कथमिति चेत्, इत्थम् – स्वसमीपस्थे स्वधर्माधायकः उपाधिः । स्वगतायाः साध्यव्याप्तेः हेतौ अवभासकः इति यावत् । नन्वेवमुपाधिशब्दार्थस्य व्याप्तिघटितत्वे कथमुपाधिलक्षणे साध्यव्याप्यत्वत्यागः इति चेत् , सत्यम्, साध्यव्याप्यस्यैव मुख्योपाधित्वम् । तथापि यादृशाकारमादाय साध्यव्याप्यस्योपाधेः हेतुदूषकत्वम्, तादृशाकारमादाय साध्याव्याप्यस्यापि तत् सम्भवति । अतः मुख्योपाधिसादृश्यात् सोऽपि उपाधिशब्दस्य गौणोऽर्थः । एवञ्च साध्यव्याप्यत्वस्य उपाधिशब्दमुख्यव्यवहारनिमित्तत्वेऽपि उपाधिनिष्ठहेतुदूषकतानियामकत्वाभावात् दूषकतानियामकांशमात्रघटनया गौणमुख्यसाधारणमुपाधिलक्षणं साध्यव्यापकत्वे सति साधनाव्यापकत्वरूपं ग्रन्थेषूक्तमिति निर्वाहः न्यायकुसुमाञ्जलिविस्तरे प्रदर्शितः ।
दोषाः सद्भिः विपश्चिद्भिः क्षन्तव्याः इति शम् ।

**उपाधितत्त्वसारस्यानुपधिप्रतिपादनात् ।**

**निरुपाधिगुणग्रामशेवधिः प्रीयतां हरिः ॥**

# न्यायदर्शने अपवर्गविमर्शः

**डा. नवीनहोळ्ळः**
नव्यन्यायविभागः
रा.सं.सं. राजीवगान्धीपरिसरः, श्रृङ्गेरी

दुःखानाम् आत्यन्तिकी निवृत्तिः एव अपवर्ग इति नैयायिकसिद्धान्तः। तदुक्तं – 'बाधनालक्षणं दुःखम्। तदत्यन्तविमोक्षोऽपवर्गः' (न्या.सू. १.१.२१-२२) इति। सोऽयमपवर्गः आत्मतत्त्वसाक्षात्कारादेव भवति। तत्साधनं दर्शयामास सूत्रकारः 'समाधिविशेषाभ्यासात्' (१.२.३८) इति। समाधिश्च इन्द्रियेभ्यः प्रत्याहृतस्य मनसो धारकेण प्रयत्नेन धार्यमाणस्य आत्मना संयोगः तत्त्वबुभुत्सावशिष्टः।(न्यायभाष्यम्)। अस्य योगस्य अनुष्ठानाय साधनानि अपि निरदिक्षत् सूत्रकारः 'अरण्यगुहापुलिनादिषु योगाभ्यासोपदेशः'(४.२.४२) तदर्थं यमनियमाभ्याम् आत्मसंस्कारो योगाच्च अध्यात्मविध्युपायैः(४३), ज्ञानग्रहणाभ्यासः तद्विद्यैश्च सह संवादः(४७) इति।

अत्रायं पूर्वपक्षः – जातमात्रस्य पुरुषस्य देवर्षिपितृणैःत्रिभिः अनुबन्धात् ऋणापनोदनाय वेदविहितकर्मणां जरां प्रायणं वा यावत् आचरणीयत्वात् अपवर्गसाधनानाम् अनुष्ठानकालविरहात् अपवर्गो नैव घटते।श्रूयते हि –'जायमानो ह वै ब्राह्मणस्त्रिभिः ऋणैः ऋणवान् जायते, ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्यः'॥ 'जरामर्यं वा एतत्सत्रं यदग्निहोत्रं दर्शपूर्णमासौ च। जरया ह वा एष तस्मात् सत्राद् विमुच्यते मृत्युना ह वा' इति। स्मर्यते च-

**'ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत्।**
**अनपाकृत्य मोहेन मोक्षमिच्छन् व्रजत्यधः।' इति।**

अयमत्र सिद्धान्तः – गार्हस्थ्यात् पूर्वावस्था तावद् ऋणानुबद्धा न भवति, एवमुत्तरावस्थापि। अतः तत्र अपवर्गसाधनानुष्ठानं सम्भवति। तथाहि- यदा कुमारः मातृतो जायते तदा स न कर्मभिः अधिक्रियते। शक्तस्य अर्थिनः एव वेदोक्तकर्मणि अधिकारात्। यदा तु गृहस्थो जायते तदा कर्मभिः अधिक्रियते। गृहस्थास्यापि यदा अर्थित्वं विपरिणतं भवति तदा अनेन अग्निहोत्रादि कर्म संन्यसनीयम्। 'जरया ह वा एष एतस्माद् विमुच्यते' इति श्रुतौ जराशब्देन आयुषः तुरीय भागस्य प्रव्रज्यायुक्तस्य विवक्षितत्वात्। अशक्तस्य अर्थिनः गृहस्थस्य बाह्यशक्तिप्रदर्शनात् 'अन्तेवासी वा जुहुयात्' ब्रह्मणा स परिक्रीतः, क्षीरहोता वा जुहुयात् धनेन स परिक्रीतः' इति श्रुतेः। अर्थित्वशून्यस्य गृहिणः काम्यकर्मपरित्याग इव नित्यकर्मपरित्यागोऽपि सम्भवति 'प्राजापत्यामिष्टिं निरुप्य तस्यां

सार्ववेदसं हुत्वा आत्मन्यग्नीन् समारोप्य ब्राह्मणः प्रव्रजेत्' इति श्रुतेः। इत्थञ्च अपवर्गसाधनानुष्ठानसम्भवात् अपवर्गो घटत एव।

अपवर्गसाधनम् आत्मतत्त्वज्ञानं चतुर्विधं श्रवणं मननं निदिध्यासनं साक्षात्कार इति। तत्र प्रथमं तावत् आगमात्। द्वितीयं तु श्रुतस्य परीक्षा न्यायेनैव अवस्थापनम्। अत्र आन्वीक्षिकी उपयुज्यते। तत्र प्रतिपादितानां संशयप्रयोजनदृष्टान्तसिद्धान्तादीनां चतुर्दशानां तत्त्वज्ञानेन प्रमाणानां प्रत्यक्षानुमानोपमानशब्दानां तत्त्वज्ञानम्। तेन द्वादशविधप्रमेयान्तर्गतानां शरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलानां दशानां तत्त्वज्ञानम्। तेन आत्मापवर्गयोः उपादेयप्रमेययोः तत्त्वज्ञानं भवति। इत्थम् आन्वीक्षिकीविद्यया अवधृतप्रमेयतत्त्वोऽपि मुमुक्षुः न परितुष्यति, पूर्ववदेव आत्मविषयकविपर्ययवासनायाः अनुवृत्तेः। तस्मात् ध्यान- निदिध्यासनादिशब्दवाच्यं तृतीयम् आत्मतत्त्वज्ञानम् आदरनैरन्तर्याभ्यां दीर्घकालं मुमुक्षुणा सेवनीयम्। अथ परिनिष्पन्नध्यानोपायः आत्मगोचराशेषविपर्ययवासनाशमनं चतुर्थमात्मतत्त्वज्ञानं साक्षात्कारात्मकं प्राप्य निर्मुक्तसकलक्लेशजातः धर्माधर्मसाधनेषु अप्रवर्तमानः विरुद्धानागतधर्माधर्मप्रबन्धोत्पादो भूतेन्द्रियविजयी प्रज्ञाज्योतिः जीवन्नेव मुक्त इत्युच्यते। इत्थमुत्पन्नतत्त्वसाक्षात्कारस्य मुमुक्षोः रागद्वेषमोहाणां दोषाणाम् अभावात् प्रवृत्त्युपरमे योऽनागतापूर्वानुत्पादः तद् अपरं निश्श्रेयसम् जीवन्मुक्तिरित्युच्यते, तत्त्वसाक्षात्कारानन्तरं भवति। तद्वान् मुनिः शास्त्रप्रणेता।

एवमवस्थो वीतरागोऽपि सः सहसा देहादिभिः न वियुज्यते। प्रागुपात्तस्य धर्माधर्मप्रचयस्य भुज्यमानस्य अभुक्तस्य च अक्षीयमाणत्वात्। अदत्तफलानां कर्मणां नाशः प्रायश्चित्तेन इव तत्त्वज्ञानेन भवितुं न अर्हति, "नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि" इति स्मृत्या कर्मणामशेषाणाम् अन्त्यसुखदुःखसंविज्ञानविरोधस्य अवधाराणात्, भोगैकनाश्यत्वे पर्यवसानात्। औत्सर्गिकवचनस्यास्य क्वचित् प्रायश्चित्तादौ विशेषवचनबलादेव अपवादसम्भवात्। "क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे" इत्यनया श्रुत्यापि अपवाद इति तु न युज्यते। 'तावदेवास्य चिरं यावन्न विमोक्ष्येऽथ सम्पत्स्ये' इति श्रुत्या अभुक्तभुज्यमानफलकर्मप्रक्षयावधिप्रदर्शनात्। उत्पन्नतत्त्वसाक्षात्कारस्य योगर्धिवशात् युगपदुत्पादितानेकविधदेहैः तावतां कर्मणामुपयोगेनैव क्षयसम्भवात्। योगर्धिवशाच्च अनियतनिपतविपाकफलान्यपि दीर्घकालफलान्यपि कर्माणि पिण्डीकृत्य भूतेन्द्रियविजयितया युगपदेव भुङ्क्ते। योगर्धिप्रभावत् विनैव उपभोगं कर्माशयान् प्रक्षयिष्यतीति तु न युक्तम्। दृष्टानुसारेण

उपपत्तौ अत्यन्तादृष्टकल्पनायाः अयुक्तत्वात्। इत्थं योगसमाधिप्रभवसम्पदा युगपदुपभोगेन कर्माशयस्य प्रक्षयात् सर्वदुःखोपरम एव परं निश्श्रेयसं विदेहमुक्तिरिति।

आत्मतत्त्वज्ञानेन आत्यन्तिकदुःखनिवृत्तिरूपस्य अपवर्गस्य प्राप्तौ क्रमं दर्शयामास सूत्रकारः महर्षि गौतमः 'दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानाम् उत्तरोत्तरापाये तदनन्तरापायाद् अपवर्गः'(१.१.२) इति। दुःखादिषु पञ्चसु उत्तरोत्तरं पूर्वपूर्वस्य कारणम्। तद्यथा मिथ्याज्ञानं दोषस्य कारणम्। दोषः प्रवृत्तेः कारणम्, प्रवृत्तिः जन्मनः कारणम्, जन्म दुःखस्य कारणम्। अतः उत्तरोत्तरस्य नाशेन पूर्वपूर्वस्य नाशो भवति। कारणनाशेन कार्यनाशनियमात्।

मिथ्याज्ञाने नष्टे सति, दोषाः रागद्वेषमोहाः विनश्यन्ति। कारणनाशे सति कार्यनाशस्य अवश्यंभावात्। रागद्वेषमोहानां विरहात् मुमुक्षोः सुकृते दुष्कृते च कर्मणि क्वापि प्रवृत्तिर्न जायते। प्रवर्तकानां रागद्वेषमोहाणां नष्टत्वात्। प्रवृत्त्यभावेन कर्मणः धर्माधर्मयोश्च अनुत्पादात् जन्मान्तरं शरीरान्तरप्राप्तिरूपं न भवति। प्रारब्धाधीनम् ऐहिकं जन्म भोगेन नश्यति। इत्थं जन्माभावत् दुःखम् अत्यन्तं निवर्तते।

सुखमिव दुःखनिवृत्तिरपि पुरुषार्थ एव। यद्यपि दुःखहानौ सुखम्, सुखे च दुःखहानिर्नियता तथापि परस्परनिरपेक्षमेव अनयोः पुरुषार्थत्वम्। सुखेन दुःखाभावस्य पुरुषार्थत्वनिराकरणे दुःखाभावेन सुखस्यापि पुरुषार्थत्वनिराकरणसम्भवात्। तद्यथा सुखं दुःखाभावे सत्येव भवतीति सुखसाधनान्तरवद् दुःखाभावोऽपि मृग्यते। न तु स एव पुरुषस्य समीहित इति चेत्, तर्हि भोजनादिसुखे सत्येव हि बुभुक्षादिदुःखं निवर्तते इति दुःखनिवृत्त्यर्थमेव भोजनादिसुखं मृग्यते। न पुनः सुखमेव तस्य समीहितमिति।

दुःखनिवृत्तिः पुनः अननुभूयमानापि पुरुषार्थ एव। यद्यपि विषादिजन्यमूर्छाद्यवस्थायां दुःखनिवृत्तिसत्त्वेऽपि तत्र प्रेक्षावन्तो न प्रवर्तन्ते, तथापि व्याध्यादिपरिपीडिताः प्रयागवटप्रपातानशनादिना देहं त्यजन्तः प्रेक्षावन्तो दृश्यन्ते। न हि कश्चिद् दुःखनिवृत्तिमनुभविष्यामि इति तत्साधने प्रवर्तते, अपि तु दुःखं हास्यामीति। अत एव पुत्रादि वियोगजन्यदुःखहानिमिच्छन्तः केचन विषशस्त्रोद्बन्धनादौ प्रवर्तन्ते। प्रेक्षावतां तत्राप्रवृत्तिस्तु शास्त्रगर्हितत्त्वात्, न तु पुरुषार्थसाधनत्वाभावात्। तत्र हि अल्पीयसोऽनर्थस्य निवृत्तावपि महीयसोऽनर्थस्य प्रवृत्तिः भविष्यतीति ज्ञातम्। इयमेव हि प्रेक्षा, यत् लोकशास्त्रविरोधपरामर्शः। किञ्च दुःखनिवृत्तेरनुभूयमानतामात्रं विवक्षितं चेत् सम्भवत्येव, चरमे जन्मनि समाधिप्रभावेण दुःखनिवृत्तेरनुभूयमानत्वात्। दुःखनिवृत्तिसत्तावधि अनुभूयमानत्वं विवक्षितं चेत् सम्भवत्येव, चरमे जन्मनि समाधिप्रभावेण

दुःखनिवृत्तेरनुभूयमानत्वात्। दुःखनिवृत्तिसत्तावधि अनुभूयमानत्वं विवक्षितं चेत् कण्टकादिहेतुकदुःखनिवृत्तेरपि अपुरुषार्थत्वप्रसङ्गः। सर्वदा अननुभूयमानत्वात्। तस्मात् सर्वदा अननुभूयमानापि यथा कण्टकादिजन्यदुःखनिवृत्तिः पुरुषार्थतया पुरुषं प्रयोजयति तथा शास्त्रार्थभूतापि आत्यन्तिकी दुःखनिवृत्तिः पुरुषार्थतया पुरुषं प्रयोजयति।

ननु यथा दुःखशबलतया संसारसुखम् अनादेयम्। तथा सुखबलतया सांसारिकदुःखमपि उपादेयं किं न स्यात्। दृश्यन्ते हि सुखार्थिनो यागादिदुःखमनुभवन्तः।

**यस्य दुःखमुपादेयं हेयं तस्य किमुच्यताम्।**

**हेयहीनस्य का मुक्तिः केन वाप्युपदिश्यते॥** इति चेत्,

अत्रैवं समाधीयते –

**असत्यानि दुरन्तानि समव्ययफलानि च ।**

**अशक्यानि च कार्याणि नारभेत विचक्षणः॥** इति॥

यथा मधुविषसंपृक्तान्नभोजने अनर्थस्य भूयस्त्वम् अर्थस्य क्षुद्रत्वम्, तथा संसारेऽपि दुःखभूयस्त्वं सुखस्य क्षुद्रत्वम्। अपवर्गे तु न तथा, तत्र दुःखस्यैव अभावात् इति।

यद्यपि रागादिमतां जनानां नात्र प्रवृत्तिः, ते हि मधुविषसंपृक्तमप्यन्नं 'मधुमधुरतया आपातरमणीयं विषविषङ्गान्मारयतु, को हि हस्तगतं सुखं पादगतं करोति'इति आपततः विचिन्त्योपभुञ्जते। विवेकिनस्तु आयतिम् आलोचयन्तः स्वर्गमपि कुपितफणिफणामण्डलच्छायाप्रतिममिति अपजहति। तेन माभूदत्र रागादिमतां प्रवृत्तिः, विवेकिनां तु भविष्यति। यस्तु घनतरदुःखतिमितिरनिरन्तरात् संसारकान्तारात् सुखखद्योतिकासु द्योतमानास्वापि बिभेति तं प्रति अयं निरस्ततमस्कतया सुगमो मार्गः उपदिश्यत इति।

**आकरग्रन्थाः –**


१.न्यायभाष्यम्

२.न्यायवार्तिकम्

३.न्यायवार्तिकतात्पर्यटीका

४.न्यायवार्तिकतात्पर्यटीकापरिशुद्धिः

# धेनुपदशक्तिविचारः

**विद्वान् श्यामसुन्दरः ए.**
नव्यन्यायविभागः
रा.सं.सं. राजीवगान्धीपरिसरः, श्रृङ्गेरी

धेनुशब्दत् धानकर्मत्व-गोत्वोभयधर्मावच्छिन्नस्य बोधोदयेन धेनुशब्दस्य तादृशोभयधर्मावच्छिन्ने एव शक्तिरङ्गीकरणीया, यथा स्वर्गपदस्य दुःखासंभिन्नत्व-सुखत्वोभयधर्मावच्छिन्ने । तत्र स्वर्गपदस्य दुःखासम्भिन्नत्वं-सुखत्वमिति धर्मद्वयमिव धेनुपदस्यापि धानकर्मत्वं-गोत्वमितिधर्मद्वयं प्रवृत्तिनिमित्तम् । स्वर्गपदस्य केवलसुखत्वावच्छिन्नतात्पर्येण इव धेनुपदस्य गोत्वमात्रावच्छिन्नतात्पर्येणापि प्रयोगस्तु लक्षणयैव भवितुमर्हति, न तु शक्त्या । (विशेषवाचकपदानां सामान्यपरत्वे लक्षणैव न शक्तिः इति नियमात् )। पदशक्त्या च प्रवृत्तिनिमित्तैकदेशं परित्यज्य शाब्दबोधस्तु नानुभवसिद्धः । तन्निर्वाहाय च तद्धर्मनिष्ठप्रकारतानिरूपिततदन्यधर्मनिष्ठ-प्रकारत्वानिरूपितविशेष्यताशालिशाब्दबोधं प्रति तद्धर्मावच्छिन्नत्वावच्छिन्नतदितर-धर्मावच्छिन्नत्वानवच्छिन्नस्वजन्यबोधविषयतात्वावच्छिन्नेच्छीयप्रकारतानिरूपितविशेष्यता सम्बन्धेन "धेनुपदवती गौः" इति ज्ञानं कारणम् इति कार्यकारणभावोऽङ्गीकार्यः। तथा च धानकर्मत्व-गोत्वात्मकनानाधर्मावच्छिन्नैकधर्मिवाचकधेनुपदप्रमातः एकधर्मं परित्यज्य अपरधर्मप्रकारेण धर्मिबोधो न भवत्येव।

प्राभाकरमते तावत् धेनुपदस्य धानकर्मताविशिष्टे एव शक्तिरङ्गीक्रियते, न तु पुनः गोत्वविशिष्टेऽपि। "धेनुपदं धानकर्मताविशिष्टे शक्तम्" इत्येव शक्ति ज्ञानं शाब्दबोधं प्रति कारणम् । तत्र धानं च वत्सकर्तृकं दुग्धपानं । दुग्धपानं च दुग्धप्रतियोगिकविभागजनकत्वविशिष्टदुग्धप्रतियोगिकगलाधःसंयोगानुकूलव्यापारः । कर्मत्वं च दुग्धप्रतियोगिकविभागानुयोगित्वात्मकं फलं, तद्विशिष्टे धेनुपदस्य शक्तिः इत्यर्थः॥

ननु धानकर्मत्वमात्रविशिष्टे एव धेनुपदस्य शक्तिश्चेत्, माहिष्यादावपि तादृशधानकर्मत्वस्याबाधितत्वात्, धेनुपदात् महिष्यादीनामपि बोधापत्तिः । अतः गोत्वविशिष्टेऽपि शक्तिस्वीकरणमावश्यकमिति चेत्, न, गोत्वस्य धेनुपदाशक्यत्वेऽपि शक्यतावच्छेदकत्वेन शक्त्युपाधित्वात् शक्तिनियन्त्रकत्वं सम्भवति । तथा च शक्त्युपाधेः गोत्वस्य गोनिष्ठशक्तिनिरूपितविषयतायाः गोनिष्ठशाब्दबोधीयविषयत्वनियन्त्रकत्वात्, धेनुपदजन्यशाब्दबोधे गोरव भानं भवति, न तु महिष्यादीनामपि । अशक्यः सन् शक्यतावच्छेदकः शक्त्युपाधिः इत्युच्यते, स च शाब्दबोधविषयो भवति ।

शक्यतानवच्छेदकः सन् प्रतियोगिनियन्त्रकः प्रयोगोपाधिरित्युच्यते, स च शाब्दबोधाविषयः । तथा च धेनुमानय इति वाक्यात् तादृशधानकर्मता-विशिष्टगोकर्मकानयनानुकूलकृतेः शाब्दबोधो जायते ।

ननु जातिशक्तिवादिनां मीमांसकानां गवादिपदानां गात्वादाविव धेनुपदस्य धानकर्मत्वे एव शक्तिकल्पनमुचितं, तत्कथं धानकर्मत्वविशिष्टे शक्तिकल्पनमिति चेत्, न, "यद्येन विना न भासते, तद्भासकसामग्री एव तद्भासयति, न तु तद्भानार्थं सामग्र्यन्तरमपेक्षते, जातिस्तु व्यक्तिं विना न भासते इति जातिभासकसामग्री एव व्यक्तिमपि भासयति । अतः तत्र व्यक्तिभानार्थं सामग्र्यन्तरं न कल्प्यते । यथा –गोपदशक्तिस्थले । परन्तु जातिभिन्नस्य धानकर्मत्वस्य तदाश्रयीभूतव्यक्तिं विनापि भानसम्भवात् धानकर्मत्वभासकसामग्र्याः व्यक्तिभासकत्वं न सम्भवतीति तत्र व्यक्तिभानार्थं धानकर्मताविशिष्टे शक्तिकल्पनमावश्यकमेव ।

ननु धेनुपदशक्तिप्रमातः गोत्वप्रकारकबोधस्य सर्वानुभवसिद्धत्वात्, एवं धानकर्ममहिष्यादिमति प्रदेशे 'धेनुर्नास्ति' इति विशेषदर्शिनां प्रयोगस्य मुख्यत्वाच्च धेनुपदजन्यशाब्दबोधे गोत्वभानमवश्यमङ्गीकरणीयमेव । यदि धेनुपदस्य गोत्वे शक्तिं विनापि तत्पदजन्यबोधे परं प्रकारतया भानमङ्गीक्रियेत, तर्हि अशक्यानां द्रव्यत्वप्रमेयत्वाद्यनन्तधर्माणां शाब्दबोधे प्रकारतया भानापत्तिः। अतः गोत्वविशिष्टेऽपि धेनुपदस्य शक्तिरावश्यकी इति चेत्, न, अशक्यस्यापि धर्मस्य शाब्दबोधे प्रकारतया भानं प्रति, तस्मिन् धर्मे शक्यतावच्छेदकत्वं नियामकं भवति । प्रकृते गोत्वस्य धेनुपदाशक्यत्वेऽपि धेनुपदनिरूपितशक्यतायामवच्छेदकत्वात्मकसम्बन्धविशेषोपगमात् तस्य धेनुपदजन्यशाब्दबोधे भानं सम्भवति । द्रव्यत्व-प्रमेयत्वादेस्तु शक्यतावच्छेदकत्वानुपगमान्न शाब्दबोधे भानापत्तिः।

ननु गोत्वस्य धेनुपदनिरूपितशक्यत्वाभाववति वृषभादौ वृत्तित्वेन शक्यतां प्रति अतिप्रसक्तत्वेन अनतिप्रसक्तत्वाभावात् कथं तस्य धेनुपदशक्यतावच्छेदकत्वसभवः, तदन्यूनानतिप्रसक्तधर्मस्यैव तदवच्छेदकत्वनियमात् इति चेत् , न, प्रकृते अवच्छेदकत्वस्य अनतिप्रसक्तत्वानियतत्वात् , अतिप्रसक्तस्यापि गोत्वस्य धेनुपदशक्यतावच्छेदकत्वम् अङ्गीक्रियते । यदि अवच्छेदकत्वस्यानतिप्रसक्तत्वं नियतमेवेत्याग्रहः, तर्हि धानकर्मतासहितस्यैव गोत्वस्यानतिप्रसक्तत्वादवच्छेदकत्वं स्वीक्रियते , अतो न दोषः ।

ननु धेनुपदस्य धानकर्मत्वे एव शक्तिः, गोत्वे तु शक्त्युपाधित्वं इति कुतः, गोत्वमेव धेनुपदशक्यं धानकर्मत्वं शक्त्युपाधिः इति वैपरीत्यमेव कुतो नास्ति । धानकर्मत्वापेक्षया गोत्वस्य लघुधर्मत्वेन शक्यत्वस्योचितत्वात् । गोत्वस्य धेनुपदशक्यतां प्रति

अतिप्रसक्तत्वात् जातिभिन्नस्य धानकर्मत्वस्य च धानकर्मव्यक्तिभेदेन भिन्नतया, गोनिष्ठस्य तस्यानतिप्रसक्तत्वात् धानकर्मत्वमेव शक्यं न गोत्वम्, इति तु न चिन्तनीयम् । गोत्वस्यातिप्रसक्तत्वेऽपि शक्यत्वाभ्युपगमे न कापि क्षतिः। धेनुपदाद्वृषभबोधस्य धानकर्मत्वस्य शक्त्युपाधित्वास्वीकारादेव वारणात् ।

एवं गोत्वस्य धेनुपदशक्यत्वे जातिशक्यैव गवादिव्यक्तिभानसम्भवात्, गोरन्यलभ्यतया गवादिपदवत् धेनुपदस्यापि व्यक्तौ शक्यसिद्ध्या व्यक्तिशात्त्युच्छेदप्रसङ्गः। धानकर्मत्वस्य गोत्वनिष्ठशक्यत्वसामानाधिकरण्यविरहेण धेनुपदनिरूपित-गोत्वनिष्ठशक्यतावच्छेदकत्वासम्भवेन, शक्तिनियन्त्रकत्वासम्भवात्, धेनुपदात् वृषभादिबोधो दुर्वारः स्यात् । अतः धानकर्मत्वविशिष्टे एव शक्तिस्वीकारः उचितः इत्यपि नाशङ्कनीयम्, एतदनुरोधेनापि केवलजातौ शक्तिं परित्यज्य जातिविशिष्टव्यक्तावेव शक्तिस्वीकार आवश्यकः ।

यद्धर्मविशिष्टे पदानां शक्तिः तद्धर्माश्रयस्य सर्वस्यापि तत्पदशक्यत्वम् इति नियमः । यथा घटपदस्य घटत्वविशिष्टे शक्तिरिति, घटत्वाश्रयनिखिलघटानामेव घटपदशक्यत्वम्। तथा च गोत्वावच्छिन्नस्य धेनुपदशक्यत्वे गोत्वाश्रयवृषभादेरपि धेनुपदशक्यत्वापत्तिः। धानकर्मताविशिष्टस्य शक्यत्वे तु धानकर्मता व्यक्तीनां नानात्वेन गोनिष्ठधानकर्मता-व्यक्तीनामेव विशेषणतया तासाञ्च महिष्यादिव्यावृत्ततया अतिप्रसङ्गविरहादिति प्राभाकराणामाशयः।

तन्मते अनन्तानां गोव्यक्तिभेदेन भिन्नानां धानकर्मताव्यक्तीनाम् अनतिप्रसक्तानुगतरूपाभावात् धेनुपदशक्यत्वं न सम्भवति । वह्नित्वसहितं महानसीयत्वं यथा महानसनिष्ठवह्नीनामनुगमकं तथा सामानाधिकरण्यसम्बन्धेन धानकर्मतायां विद्यमानं तेन सम्बन्धेन धानकर्मत्वविशिष्टं गोत्वमेव गोनिष्ठधानकर्मताव्यक्तीनां अनुगमकं प्रसिद्धमेवेति न चिन्तनीयम् । यतो हि एवं रीत्या अशक्येन गोत्वादिना शक्यानां धानकर्मत्वानामनुगमे सति सर्वत्र विशेषणांशे शक्त्युच्छेदप्रसङ्गः। अतिप्रसक्तिस्तु केनचिद्धर्मविशेषेणापि शक्यते वारयितुम् । अतिप्रसक्तेनापि धानकर्मतात्वेन विशिष्टे धानकर्मताविशेषे शक्त्यपेक्षया लाघवात् गोत्वविशिष्टे गोविशेषे एव शक्तिस्वीकारः उचितः। धानकर्मत्वस्य शक्त्युपाधित्वं स्वीकृत्य वृषभादिबोधवारणसम्भवात् ।एवम् अननुगतेन तत्तद्धानकर्मतात्वेन रूपेण तत्तद्धानकर्मताव्यक्तौ शक्तिस्वीकारे च व्यवहारेण यद्यद्धानकर्मताव्यक्तौ धेनुपदस्य शक्तिर्गृहीता ततद्धानकर्मताव्यक्तेरेव धेनुपदघटितवाक्यात् स्मरणेन, अपूर्वधानकर्मताव्यक्तीनां योग्यताविरहेण शाब्दबोधे अभानप्रसङ्गश्च । अतः धेनुपदस्य धानकर्मत्वविशिष्टगोत्वावच्छिन्ने एव शक्तिस्वीकरः आवश्यकः॥ इति शम्॥

# आत्मनः अदृष्टसाधनत्वविचारणम्

**डा. नवीनः आर्.**
नव्यन्यायविभागः
रा.सं.सं. राजीवगान्धीपरिसरः, शृङ्गेरी

न्यायकसुमाञ्जलौ उदयनाचार्यैः प्रथमस्तबके अलौकिकस्य परलोकसाधनस्यादृष्टादेः साधनपूर्वकं अदृष्टाधिष्ठातृत्वेन ईश्वरः व्यवस्थाप्यते। तत्र धर्माधर्मयोः आत्मनः कारणत्वमस्ति न वेति विचारः अस्मिन्निबन्धे उपस्थाप्यते । प्रथमस्तबके एतावता प्रबन्धेन क्षणभङ्गवादं निरस्य भावानां स्थिरत्वं स्थापितम्।**'न च गत्यन्तरं स्थिरे'**1 इत्यस्मिन् व्यवस्थिते भूतानां चैतन्यासम्भवात् भूतव्यतिरिक्तश्चेतन इति सिद्धम्। ननु भवतु भूतानां स्थिरत्वं, मा भूच्चैतन्यं, तथापि चेतनत्वेन भवदभिमतस्य नित्यविभोरात्मनः कारणत्वं नोपपद्यते। तथा च अलौकिकस्य परलोकसाधनस्य सिद्धिर्न सम्भवति धर्माधर्मौ प्रत्यात्मनः कारणत्वाभ्युपगमात्। तथा च आत्मनः भोक्तृत्वमित्यादिकं सर्वमनुपपन्नम्।

ननु नित्यविभोरात्मनः कारणत्वं किमिति नोपपद्यते इति चेदुच्यते। अन्वयसहचारव्यतिरेकसहचाराभ्यां कारणत्वं निश्चीयते। कारणसत्वे कार्यसत्वमन्वयसहचारः, कारणाभावे कार्याभावो व्यतिरेकसहचारः। यथा दण्डसत्वे घटसत्वमन्वयसहचारः। दण्डाभावे घटाभावो व्यतिरेकसहचारः। आभ्यां दण्डस्य घटकारणत्वमवधार्यते। तत्र आत्मनो नित्यत्वात् कालिकव्यतिरेकः, अत्मनो विभुत्वेन व्यापकत्वाद्दैशिकव्यतिरेकश्च न सम्भवति।तेन 'आत्माभावे अदृष्टाभावः' इति व्यतिरेकसहचारस्य तत्र असम्भवात् तस्य कारणत्वग्रहो न सम्भवति। अन्वयसहचारमात्रेण कारणत्वग्रहे तु नित्यविभूनामात्माकाशादीनां कार्यमात्रं प्रति कारणत्वप्रसङ्गात्। तथा च कार्याभावप्रयोजकाभावप्रतियोगित्वमेव कारणत्वं, तच्च नित्यविभूनामात्मादीनां न सम्भवतीति तेषां समवायिकारणत्वमशक्यमेव। समवायिकारणाभावे च असमवायिकारणनिमित्तकारणाभ्यामपि कार्योत्पत्तिर्न सम्भवति। समवायिकारणप्रत्यासन्ने एव असमवायिनिमित्तकारणे कार्योत्पत्तौ प्रभवतः। न च अदृष्टस्य अन्यत्समवायिकारणमस्ति। तथा च अदृष्टस्य निर्हेतुकत्वेन नित्यत्वान्न यागादिजन्यत्वं नाऽपि भोगनियामकत्वम्। ननु केवलस्यात्मनो व्यतिरेकाभावेऽपि शरीरविशिष्टात्मनो व्यतिरेकः शरीरशून्यदेशकालावच्छेदेन सम्भवतीति चेन्न। व्यतिरेकाप्रतियोगिनः नित्यविभोरात्मनो यथा कारणत्वं न सम्भवति तथा शरीराद्युपाधिसम्बन्धोऽपि न सम्भवति।

अयोग्यत्वात्। तथाहि, तेनात्मना स उपाधिर्जनितो वा स्यात्, नित्यो वा। यदि स शरीररूप उपाधिस्तेनात्मना जनित इति स्वीक्रियते तदा यदद्दृष्टेन यच्छरीरं जनितं तदेव तस्योपाधिर्वक्तव्यः अन्यथाऽतिप्रसङ्गात्। तथा च भवेदेवं यद्यदृष्टं प्रत्यात्मनः कारणत्वं स्यात्तदेव तु नास्ति नित्यविभुत्वेन व्यतिरेकाभावेन जनकत्वासम्भवात्। यद्युपाधिर्नित्य इत्यभ्युपगम्यते तर्हि उपाधिविशिष्टस्यात्मनः पूर्ववत्कालतो व्यतिरेको नास्ति। ननूपाधिविशिष्टस्यात्मनः क्वचिद्देशेऽभावाद्दैशिकव्यतिरेकादेव कारणत्वग्रहोऽस्तु इति चेत् अयं दैशिकव्यतिरेकोऽपि उपाधेर्विभुत्वे पूर्ववदेव न सम्भवति। यद्युपाधिर्नित्यः अव्यापकश्च तर्हि स व्यतिरेक उपाधेरेव नाऽऽत्मनः। ननूपधिमतो व्यतिरेकेण कारणताग्रहो भवतीति वक्तव्यम्। तेन विशेषणस्योपाधेर्व्यतिरेक विशेषणाभावाद् विशिष्टाभावात् कारणताग्रहः सुलभ इति चेन्न। उपाधिमानुपाधिश्चैतद्द्वयान्यस्य विशिष्टस्य पदार्थान्तरस्य नैयायिकैरनङ्गीकारात्। उपाधिमतः पदार्थान्तरस्य भावेऽपि व्यितरेकवतस्तस्य विशिष्टस्यैवकारणत्वं न केवलस्यात्मनः व्यतिरेकाभावादिति चेदत्रोच्यते –

**पूर्वभावो हि हेतुत्वं मीयते येन केनचित्।**
**व्यापकस्यापि नित्यस्य धर्मिधीरन्यथा न हि॥**

कार्यव्यतिरेकप्रयोजकव्यतिरेकप्रतियोगित्वरूपं व्यतिरेकगर्भकारणत्वं न स्वीकुर्मः। किन्तु अनन्यथासिद्धनियतपूर्ववर्तित्वरूपम्। तच्च हेतुत्वं क्वचिदन्वयव्यतिरेकाभ्यां क्वचिद्धर्मिग्राहकप्रमाणेन नीर्णीयते । बुद्ध्यादिकं समवायिकारणवत् भावकार्यत्वात् घटवत् इत्यनुमानेन पक्षताबलादात्मा सिद्ध्यन् बुद्ध्यादिकारणत्वेनैव सिद्ध्यति। अनेनैव धर्मिग्राहकप्रमाणेन आत्मा सिद्धः । अन्यथा आत्मनः असिद्धौ व्यतिरेकप्रतियोगितया कस्य कारणत्वाभावःसाधनीयः ।

अन्वयव्यतिरेकाभ्यामेव कारणत्वग्रहस्वीकारे धूमादिकार्यव्यक्त्या वह्न्यादिकारणव्यक्त्यनुमानं क्वापि न भवेत् । कार्यव्यक्त्या अनुमेयकारणव्यक्तेर-न्वयव्यतिरेकानुविधानादर्शनात् । कार्यकारणव्यक्तोरन्वयव्यतिरेकोपलम्भे तु कार्येण लिङ्गेन कारणानुमितेरनुत्पादात् । प्रत्यक्षत एव सिद्धेर्थे किमनुमानेन ।

ननु यद्यपि कार्यकारणव्यक्त्योरन्वयव्यतिरेकयोरनुपलम्भस्तथापि तज्जातीयेषु अन्वयव्यतिरेकोपलम्भात् अन्यत्रापि तज्जातीयकार्यदर्शनेन तज्जातीयकारणविशेषानुमानं सम्भवतीति चेत्तर्हि अन्वयव्यतिरेकाभ्यां घटादिकं प्रति कपालादेः समवायिकारणत्वे सिद्धे 'यद्विशेषयोः कार्यकारणभावः असति बाधके तत्सामान्ययोः कार्यकारणभावः' इति न्यायेन

समवेतकार्यमात्रं प्रति द्रव्यस्य द्रव्यत्वेन हेतुत्वकल्पनात् पृथिव्यादिबाधे परिशेषेण सुखादृष्टादेः समवायिकारणत्वेनात्मानुमानं सुकरम् ।

ननु यद्यप्यनुपलब्धान्वयव्यतिरेकस्यापि कारणस्यानुमानं स्यात्तथापि वस्तुगत्याऽनुविहितान्वयव्यतिरेकमेव कारणं कार्यादनुमीयते रूपज्ञानादिना चक्षुराद्यनुमाने तथा दर्शनादिति चेन्न । अन्वयव्यतिरेकवतः कारणत्वमिति व्याप्तेरदृष्टचरस्य धर्मिणः अनुमितिर्न स्यादिति बाधकतर्केण नित्यविभुकारणव्यतिरिक्तविषयत्वेन सङ्कोचात् । न केवलं व्याप्तेः सङ्कोचस्तादृशी व्याप्तिरेवनास्ति व्यतिरेकविरहिणः कारणत्वे बाधकाभावात् । तथा च कार्येण कारणस्यैवानुमानात् । अन्वयव्यतिरेकशालित्वस्य प्रकृतसाध्यकोटिप्रवेशाभावात् ।

ननु व्यतिरेकविरहिणः कारणत्वस्वीकारे बाधकमस्ति ।नित्यविभूनाम् आकाशादीनां घटपटादिकार्यमात्रं प्रतिकारणत्वप्रसङ्गः अन्वयमात्रस्य विशेषाभावात् । तेन व्यतिरेकप्रयोगिनः एव कारणत्वमिति व्याप्तिः सिद्ध्यतीति चेन्न । घटादिकं प्रति आकाशादीनां न तावत् समवायिकारणत्वं सम्भवति, पृथिवीत्वावच्छिन्नं प्रति पृथिवीत्वावच्छिन्नस्यैव समवायिकारणत्वस्यान्वयव्यतिरेकसिद्धत्वात् । नाप्यसमवायिकारणत्वं, द्रव्ये असमवायिकारणत्वासम्भवात् । नाऽपि निमित्तकारणत्वम्, अन्यथासिद्धत्वात् । रूपादिकार्यं प्रतियज्जातीयं कारणं घटाद्यन्वयव्यतिरेकवद् दृष्टं , ज्ञानादिकार्यस्यापि तजातीयमेव नाम समवायिकारणजातीयमेव कारणमनुमीयते । यद्वा अन्वयव्यतिरेकवतिकारणे सहकारिसमवधानासमवधानाभ्यां कार्यकरणाकरणे दृष्टे । तद्वदत्राप्यन्वयव्यतिरेकवज्जातीयत्वम् । तत्र समवायिकारणं द्रव्यमेव न गुणादिरिति ज्ञानादीनां द्रव्याश्रिततत्वं सिद्ध्यति । तस्मात् यदाशङ्कितं पूर्वं धर्माधर्मौ प्रत्यात्मनः अकारणत्वं अन्वयव्यतिरेकविरहादिति। निरुक्तकारणत्वस्वीकारेण क्वाप्यनुपपत्तेरभावात्।

# ध्वनिकाव्यानुमितिसिद्धान्तः

**डा. रामकुमारशर्मा**
आचार्यः, साहित्यविभागः
रा.सं.सं.जयपुरपरिसरः

काव्यशास्त्रे काव्यस्यात्मस्थानीयं प्रधानं तत्त्वं किमिति विचाराय प्रवर्तितेषु रसालंकाररीतिप्रभृतिषु सिद्धान्तेष्वानन्दवर्धनप्रवर्तितो ध्वनिसिद्धान्तोऽन्यतमः प्रायेण सर्वैरादृतश्च। अस्य विरोधिषु श्रीशङ्कुकसूचितो महिमभट्टेन प्रतिष्ठापितः काव्यानुमितिसिद्धान्तः प्रसिद्धः। रुय्यकेण व्यक्तिविवेकव्याख्याने काव्यानुमितिसिद्धान्तो निराकृतो ध्वनिसिद्धान्त एव प्रतिष्ठापितश्च। इह समासेन ध्वनिसिद्धान्तः, काव्यानुमितिसिद्धान्तः, काव्यानुमितेर्निरासश्च क्रमेण प्रतिपाद्यते। विचारणीयविषयबिन्दव इमे सन्ति-

1. **ध्वनिसिद्धान्तः**
2. **काव्यानुमितिसिद्धान्तः**
3. **काव्यानुमितेर्निरासः**

एतत्त्रयं क्रमेण प्रदर्श्यते-

## 1. ध्वनिसिद्धान्तः

अस्य सिद्धान्तस्य मूलं स्फोटवाद आभासवादश्च। स्फोटवादिभिर्वैयाकरणैर्ध्वनिशब्दः स्फोटस्य व्यञ्जकेषु वर्णात्मकेषु शब्देषु, शब्दजशब्देषु, स्वाभाविकप्रसिद्धोच्चारणव्यापारभिन्नेषु द्रुतादिव्यापारेषु च प्रयुक्तः, ततो ध्वनिवादिना क्रमेण व्यञ्जकत्वेन, जन्यत्वेन, अप्रसिद्धव्यापारत्वेन च सामान्येन व्यञ्जके शब्दे, व्यञ्जकेऽर्थे, व्यङ्ग्यार्थे, व्यञ्जनाव्यापारे च 'ध्वनति, ध्वन्यते, ध्वननम् ' इति व्युत्पत्त्या, उक्तध्वनिपदार्थ-चतुष्टयस्याधिकरणत्वेन 'ध्वन्यते अस्मिन्' इति व्युत्पत्त्या च काव्यविशेषे चापि प्रयुज्यते। एवं ध्वनिपदार्थाः पञ्चेति **' प्रथमे हि विद्वांसो वैयाकरणा व्याकरणमूलत्वात् सर्वविद्यानाम्। ते च श्रूयमाणेषु वर्णेषु ध्वनिरिति व्यवहरन्ति। तथैवान्यैस्तन्मतानुसारिभिः सूरिभिः काव्यतत्त्वार्थदर्शिभिर्वाच्यवाचकसंमिश्रः शब्दात्मा काव्यमिति व्यपदेश्यो व्यञ्जकत्वसाम्याद् ध्वनिरित्युक्तः'** इति समासेन ध्वन्यालोके सूचितम्, तल्लोचने सप्रपञ्चं प्रतिपादितं च। ध्वन्यालोके संमिश्रपदेन "**संमिश्र्यते विभावादिसंवलनया**" इति व्युत्पत्त्या व्यङ्ग्यार्थः शब्दात्मेति पदेन च व्यञ्जना विवक्ष्यते। तत्र व्यङ्ग्यार्थरूपो ध्वनिपदार्थस्त्रिधा- वस्तु, अलंकारः, रसश्च। तत्राद्यौ वाच्यावपि भवतः, किन्तु रसो ध्वनिसिद्धान्ते व्यङ्ग्य एव मन्यते

ध्वनिसिद्धान्त उद्भटादिस्वीकृता रसस्य वैकल्पिकी वाच्यता निराकृता, वाच्यतायां तु प्रत्युत स्वपदवाच्यत्वनामा दोष एव स्वीकृतः। । उद्भटेन हि

**"रसवद्दर्शितस्पष्टश्रृङ्गारादिरसोदयम्।**
**स्वशब्दस्थायिसंचारिविभावाभिनयास्पदम्।।"**

इत्यत्र रसवल्लक्षणे स्वशब्दपदस्य,

**"इति भावयतस्तस्य समस्तान् पार्वतीगुणान्।**
**संभृतानन्तसंकल्पः कन्दर्पः प्रबलोऽभवत्।।"**

इत्यत्रोदाहरणे च कन्दर्पपदस्य प्रयोगेण रसस्य वाच्यताऽपि स्वीकृता। ध्वनिसिद्धान्ते रस एव काव्यात्मत्वेन स्वीकृतः। "**काव्यस्यात्मा ध्वनिः**" इति कथनेन यद्यपि त्रिविधस्यापि व्यङ्ग्यस्य काव्यात्मता सामान्येनाभिहिता तथापि "**काव्यस्यात्मा स एवार्थः**" इत्यादिवचनै रसस्यैव काव्यात्मता वस्त्वलंकारव्यङ्ग्ययोरुद्दीपनविभावत्वेन रसं प्रत्यङ्गता च स्वीकृता। यद्यपि "**न हि रसादृते कश्चिदर्थः प्रवर्तते**" इति भरतेन रसस्यैव प्राधान्यं प्रतिपादितं तथापि रसस्य वाच्यताया निरसनं व्यङ्ग्यताया एव साधनं च ध्वनिसिद्धान्तस्य विशेषः।

उक्तेषु पञ्चस्वप्यर्थेषु व्यक्तिपदवाच्या व्यञ्जना सूत्रस्थानीया समग्रध्वनिव्यवहारस्य मूलं च। सा स्वोपरक्तार्थान्तरस्य स्वज्ञानेन सहैव प्रकाशकस्य प्रकाशनरूपो व्यापारः, यथा प्रदीपस्य घटादिप्रकाशनम्। **'स्वज्ञानेनान्यधीहेतुः सिद्धेऽर्थे व्यञ्जको मतः। यथा दीपोऽन्यथाभावे को विशेषोऽस्य कारकात्।।'** इति ध्वनिकार आह। व्यक्तिविवेके व्यञ्जनाया लक्षणमेवमभिहितम्- **'तथा हि सतोऽसत एव वार्थस्य प्रकाशमानस्य सम्बन्धस्मरणानवेक्षिणा प्रकाशकेन सहैव प्रकाशविषयतापत्तिरभिव्यक्तिरिति तल्लक्षणमाचक्षते।'** अत्र सम्बन्धस्मरणानवेक्षिणेति पदेनानुमानेऽतिप्रसङ्गो वारितः। एतादृश्या व्यक्तेः स्वीकारे काश्मीरप्रसिद्धशैवागमसिद्धान्त आभासवादोऽपि। तत्र हि शिवादीनि षट्त्रिंशत् तत्त्वानि स्वीकृतानि। परमेश्वरः शिव एव शक्त्यादीनि तत्त्वानि आभासयति। यथा शिव आत्मानम् आभासयन्नेव शक्त्यादीनि तत्त्वानि आभासयति, यथा शक्तिरात्मानमाभासयन्त्येव सदाशिवादीनि तत्त्वान्याभासयति, यथा सदाशिवादीनि पूर्वपूर्वतत्त्वान्यात्मान आभासयन्त्येवोत्तरोत्तराणि ईश्वरादीनि तत्त्वानि आभासयन्ति तथैव संविद्रूपेण शिवेनाभिन्नाः शब्दास्तद्बोध्या वाच्यादयोऽर्थाश्चात्मानं प्रकाशयन्त एव वाच्यलक्ष्यभिन्नान् अर्थान् प्रकाशयन्ति। अत एव ध्वन्यालोकस्य तृतीयोद्योते "**स्वरूपं प्रकाशयन्नेव परावभासको व्यञ्जकः, नहि व्यङ्ग्ये प्रतीयमाने वाच्यबुद्धिर्दूरीभवति**" इत्यादि

ISSN 2249-538X

कथितम्। इह वाच्यपदं व्यञ्जकमात्रस्योपलक्षणम्। एवं प्रकाशकेन सहैवान्यार्थस्य प्रकाशकत्वं व्यञ्जना शक्तिरिति फलितं भवति। यद्यप्येवं स्वीकारेऽभिधालक्षणयोर्विलोपस्यापत्तिरिति वक्तुं शक्यते, यतो हि शब्दे स्वरूपेण सहैव वाच्यस्य प्रकाशकत्वं वाच्ये च प्रवाहादौ स्वरूपेण सहैव तटादिलक्ष्यस्य प्रकाशकत्वं कथं न स्वीकरणीयम्?, तत् प्रकाशकत्वं व्यञ्जनैव सिद्ध्यति, तथाप्येवं वक्तुं न शक्यते। नायं दोषो वस्तुतः, एतादृशी व्यञ्जना व्यापिका। सैवाऽभिधा लक्षणा च। यदा सा व्यञ्जना प्रसिद्धं संकेतितमर्थं गोचरीकरोति तदाऽभिधा, यदा च व्यवहारे मुख्यार्थबाधादौ सति प्रसिद्धवाच्यभिन्नमर्थं विषयीकरोति तदा लक्षणा व्यपदिश्यते, यदा तु वाच्यलक्ष्यभिन्नमर्थं प्रकाशयति तदा व्यञ्जना व्यपदिश्यत इत्यवश्यमेव स्वीकरणीयं भवति, अन्यथा ध्वनिकृदादिसिद्धान्ते विरोधः स्यात्। सखण्डायां चर्वणायामभिधादयः, अखण्डायां तु व्यञ्जनैवेति न काचन क्षतिः। सखण्डां चर्वणामाश्रित्य शब्दार्थगतं शब्दार्थादिज्ञानेन सहैव वाच्यलक्ष्यभिन्नार्थप्रकाशकत्वं व्यञ्जनेति व्यञ्जनाविषयकः साहित्यशास्त्रीयः सिद्धान्तो वक्तुं शक्यते। नियतिदशायां भवतु नामाभिधादीनामपि सत्ता स्वीकृतेत्यत्र न कश्चन विवादः।

ध्वनिशब्दस्योक्ताः पञ्चाऽप्यर्था अनया कारिकया ध्वनिताः, किन्तु मुख्यरूपेण काव्यविशेषरूप एव ध्वनिपदार्थ उक्तः-

**यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ।**
**व्यङ्क्तः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः।।**

अत्र "ध्वनिरिति सूरिभिः कथितः" इत्यस्यार्थेन, शब्देन, व्यङ्ग्यार्थेन, व्यञ्जनया, काव्यविशेषेण य सम्बन्धः करणीयः। तेनास्या ध्वनिकारिकायाः " उपसर्जनीकृतस्वो योऽर्थो व्यनक्ति स ध्वनिरिति सूरिभिः कथितः, उपसर्जनीकृतार्थो यः शब्दो व्यनक्ति स ध्वनिरिति सूरिभिः कथितः, तावर्थशब्दौ यमर्थं व्यङ्क्तः स ध्वनिरिति सूरिभिः कथितः, तावर्थशब्दौ यद् व्यङ्क्तः स व्यञ्जनाव्यापारो ध्वनिरिति सूरिभिः कथितः, यत्रोपसर्जनीकृतस्वार्थौ तं प्रतीयमानमर्थं व्यङ्क्तः स व्यङ्ग्यप्रधानः काव्यविशेषश्च मुख्यरूपेण ध्वनिरिति सूरिभिः कथितः" इत्यर्थः कार्यः। उपसर्जनीकृतेत्यत्र च्विप्रत्ययेन वाच्यप्रतीयमानयोर्गुणप्रधानभाव आरोपित एवेति ध्वन्यते, नह्यखण्डचर्वणायां सोऽवभासते। उक्तायां ध्वनिकारिकायां व्यङ्क्त इति पदेन बोध्या व्यक्तिरेव सर्वत्रानुस्यूतत्वेन ध्वनिव्यवहारस्य मूलमिति ध्वनितम्, नहि तामन्तरेण रसस्यापि रसत्वम्। अतो ध्वनिसिद्धान्तभव्यभवनस्य मूलस्तम्भः स्वज्ञानेन सहैव स्वोपरक्तस्यार्थान्तरस्य प्रकाशनलक्षणा व्यक्तिरेव। अस्या उल्लासस्स कारणं वक्तृबोद्धव्यादिवैशिष्ट्यस्य ज्ञानम्।

2. **काव्यानुमितिसिद्धान्तः**

महिमभट्टेन ध्वनिसिद्धान्तस्य निराकरणाय तत्स्थाने काव्यानुमितेः स्थापनाय च व्यक्तिविवेकनामा ग्रन्थः प्रणीतः। अत्र तेनानन्दवर्धनस्य ध्वनिलक्षणे-

**अर्थस्य विशिष्टत्वं शब्दः सविशेषणः तदः पुंस्त्वम्।**
**द्विवचनवाशब्दौ च व्यक्तिर्ध्वनिनाम काव्यवैशिष्ट्यम्।**
**वचनं च कथनकर्तुः कथिता ध्वनिलक्ष्मणीति दश दोषाः।**

इति वचनेन दश दोषा दर्शिताः, दूषितपदानि निरस्य ध्वनिस्थाने-

**वाच्यस्तदनुमितो वा यत्रार्थोऽर्थान्तरं प्रकाशयति।**
**सम्बन्धतः कुतश्चित् सा काव्यानुमितिरित्युक्ता।। ....**
**अन्यतोऽन्यस्य हि ज्ञानमनुमानैकसमाश्रयम्।**

इति काव्यानुमितिः लक्षिता,

**यार्थान्तराभिव्यक्तौ वः सामग्रीष्टा निबन्धनम्।**
**सैवानुमितिपक्षे नो गमकत्वेन सम्मता।।**

इति वचनेन व्यक्त्युल्लासकारणं वक्तृबोद्धव्यादिवैशिष्ट्यस्य ज्ञानं काव्यानुमितेरुल्लासकत्वेन स्वीकृतम्,

**ध्वनेः शक्त्यन्तराभावाद् व्यक्तेश्चानुपपत्तितः।**
**प्राणभूता ध्वनेर्व्यक्तिरिति सैव निरूपिता।**

इति कथनेनेदमपि सूचितं च यद् ध्वनेः प्राणभूता व्यक्तिरेव समालोचितेति व्यक्तिविवेक इति ग्रन्थस्यान्वर्थं नाम, न तु ध्वनिविवेक इति। ध्वनिलक्षणस्थानां दशानां दोषाणां प्रदर्शनस्य काव्यानुमितेश्चेदं सारमुच्यते। ध्वनिलक्षण इमे दश दोषाः सन्ति-

अर्थस्योपसजर्नीकृतस्वत्वरूपं विशेषणं नोपादेयम्, अर्थपदविवक्षितस्य वाच्यविशेषस्य प्रतीयमानं प्रति साधनत्वेन क्वचनापि व्यभिचाराभावात्। अवाच्यस्य वचनादवाच्यवचनं दोषः। कथितं महिम्ना-

**उक्तं गुणीकृतात्मत्वं यदर्थस्य विशेषणम्।**
**गमकत्वान्न तत् तस्य युक्तमव्यभिचारतः।।**

1. शब्दे व्यञ्जनाव्यापारस्यासंभवेन शब्दस्य व्यङ्क इति व्यक्तिक्रियाकर्तृत्वेनोपादाने ध्वनिलक्षणेऽसंभवनामा लक्षणदोषः।

2. शब्दस्यार्थबोधं प्रति साधनत्वेनोपसर्जनत्वमेव। नह्यनुकरणव्यतिरिक्तः शब्दोऽर्थं कदाचनाप्युपसर्जनीकर्तुं प्रभवति। एवमनुकरणातिरिक्ते शब्द उपसर्जनीकृतार्थत्वस्यासंभवेन स एवासंभवलक्षणदोषः।

3. तमिति पूर्वपरामर्शिनस्तदः पुंस्त्वेन निर्देशो न समाचीनः, पूर्वं ' प्रतीयमानं पुनरन्यदेव' इत्यादौ प्रतीयमानस्य क्लीबत्वेन निर्देशात्।

4. वाशब्दस्य विकल्पकार्थकत्वे शब्देऽभिधातिरिक्तव्यापारस्यासंभवेन च **व्यङ्क्त** इत्यत्र द्विवचनं न संगच्छते।

5. वाशब्दस्य विकल्पसमुच्चययोः कश्चनाप्यर्थो न संगच्छते। विकल्पस्य स्वीकारे कथितद्विवचनविरोधः, समुच्चयस्याङ्गीकारे यत्राविवक्षितवाच्ये शब्दस्यैव व्यञ्जकत्वं तत्र, यत्र च विवक्षितान्यपरवाच्येऽर्थस्यैव व्यञ्जकत्वं तत्राऽव्याप्तिरूपो लक्षणदोषः।

6. स्वरूपेण सह स्वोपरक्तस्यान्यस्य प्रकाशनरूपा घटप्रदीपन्यायेन स्वीकृता व्यक्तिः शब्दार्थरूपे काव्ये न संभवति। शब्दोऽर्थो वा स्वरूपेण सहैव प्रतीयमानं न प्रकाशयति, अपितु क्रमेणैव, वाच्यज्ञानकाले न शब्दस्य ज्ञानम्, एवं प्रतीयमानज्ञानकाले न वाच्यस्य ज्ञानम्। वाच्यप्रतीयमानज्ञानयोः क्रमं स्वीकृत्यैव ध्वनिकृता ध्वनेर्लक्ष्यालक्ष्यक्रमत्वं व्यवस्थापितम्। यत्र प्रदीपादौ व्यक्तिः संभवति तत्र काव्यत्वमेव न भवति। एवं वाच्यादौ व्यक्तेरसंभवेनासंभवलक्षणदोषः।

**वाच्यप्रत्येययोर्नास्ति व्यङ्ग्यव्यञ्जकतार्थयोः।**
**तयोः घटप्रदीपवत् साहित्येनाऽप्रकाशनात् ।**

7. ध्वनिपदवाच्ये श्रूयमाणवर्णात्मकशब्दे स्फोटे च कार्यकारणभावमूलः साध्यसाधनभाव एव विद्यते, न तु व्यङ्ग्य-व्यञ्जकभावः, श्रूयमाणशब्दस्फोटज्ञानयोर्हि क्रमिकत्वमेव। अतः श्रूयमाणे शब्दे व्यञ्जकत्वस्य स्फोटे व्यङ्ग्यत्वस्य चाभावेन व्यञ्जकत्वसमान्येन शब्दार्थरूपस्य काव्यस्य ध्वनिरिति नाम कर्तुं न शक्यते। उक्तम्-

**अत एव श्रूयमाणानां शब्दानां ध्वनिव्यपदेश्यानामन्तःसंनिवेशिनश्च स्फोटाभिमतस्यार्थस्य व्यग्यव्यञ्जकभावो न संभवतीति व्यञ्जकत्वसाम्याद् यः शब्दार्थात्मनि काव्ये ध्वनिव्यपदेशः सोऽप्यनुपपन्नः, तत्रापि कार्यकारणमूलस्य गम्यगमकभावस्योपगमात्।**

वाक्यपदीये स्फोटस्योच्चारणकरणस्थवायुसंयोगविभागजन्यत्वस्य ध्वनि-जनकत्वस्य च वचनेन ध्वनिस्फोटयोः कार्यकारणभाव उक्तः-

**यः संयोगविभागाभ्यां करणैरुपजन्यते।**

**स स्फोटः शब्दजाः शब्दा ध्वनयोऽन्यैरुदाहृताः।।**

8. निरतिशयसुखास्वादरूपे काव्यात्मनि रसे विशेषस्याभावेन काव्येऽपि न विशेषस्य संभवः। काव्यमेकविधमेव, नहि तस्य विशेषः। पराभिमते गुणीभूतव्यङ्ग्येऽपि प्रतीयमानस्य रसस्यैव प्राधान्यम्। रसाभावे न काव्यत्वम्। एवं व्यावर्त्यस्याभावेन विशेषपदोपादानं व्यर्थमेव। यदि ध्वनिसंज्ञा कार्या तदा काव्यमात्रस्य कार्या, न तु काव्यविवशेषस्य।

9. सूरिभिरिति कथनक्रियाकर्तुरुपादानमपि व्यर्थम्। क्रियायाः कर्तारं विनाऽसंभवेन कथनक्रियाकथनादेव कर्तृ-सामान्यस्य ध्वनिलक्षणकरणप्रकरणादेव कर्तृविशेषस्य वा बोधो हि संभवति। अतः कथनक्रियाकर्तुरुपादानमवाच्यवचनदोषमावहति।

एवं व्यक्तिविवेककृता ध्वनिसामान्यलक्षणं दशदोषप्रदर्शनेन संदूष्य निर्दुष्टं काव्यानुमितिलक्षणं विहितं यद् यत्र वाच्यस्तेनानुमितो वार्थोऽर्थान्तरं केनापि सम्बन्धेन प्रतिपादयति सा काव्यानुमितिरुच्यते। ध्वनिकारेण काव्यस्य नवं ध्वनिनामात्रं कृतम्, न किञ्चिदन्यत्। एषा काव्यानुमितिः तार्किकानुमानविलक्षणा। एषा ह्यसताऽपि साधनेन भवति चमत्कारिणी च भवति। विभावादिजन्यैषाऽप्रमारूपाऽपि "**भ्रान्तिरपि सम्बन्धतः प्रमा**" इति नयेन विनेयव्युत्पत्तिरूपस्य फलस्य जनकत्वेन प्रमा। अतः काव्यमार्गे सत्यासत्यत्वविचार उपहासायैव सम्पद्यते।

### 1. काव्यानुमितेर्निरासः

पश्चात्तनैः काव्यानुमितिरेषा निरस्ता। एषा मम्मटेन वाच्यस्याऽसद्धेतुत्वं रुय्यकेण वाच्यप्रतीयमानयोः तादात्म्यतदुत्पत्तेरभावं च स्वीकृत्य क्रमेण काव्यप्रकाशेऽलंकारसर्वस्वादौ च निराकृता। तत्र वाच्यस्याऽसद्धेतुत्वमाश्रित्य निरसनं न समीचीनम्। महिमभट्टेन हि वाच्यस्याऽसद्धेतुत्वं स्वयमेव स्वीकृतम्, व्यक्तिश्च वाच्यप्रतीयमानयोः सहभावेनाऽप्रतीत्या निराकृता। काव्यानुमितेर्निरासे व्यक्तेः स्थापने च रुय्यकस्यैव मुख्यमवदानम्। रुय्यकेण व्यक्तिविवेकव्याख्याने ध्वनिलक्षणे महिमभट्टप्रदर्शिता दश दोषा निराकृता व्यक्तिं संस्थाप्य ध्वनिसिद्धान्तः समर्थितश्च। अस्य सारमत्रैवं द्रष्टुं शक्यते-

1. वाच्यस्य प्रतीयमानं प्रत्युपसर्जनीभावस्त्रिधा- साधनत्वेन, अचारुत्वेन, स्वविश्रान्तत्वेन अर्थान्तरानुपकार्यत्वेन च। तत्रार्थान्तरानुपकार्यत्वमेव ध्वनिकृतो विवक्षितं यद् गुणीभूतव्यङ्ग्ये व्यभिचरति। गुणीभूतव्यङ्ग्ये हि वाच्ये स्वस्मिन्नविश्रान्तेन प्रतीयमानेनोपकार्यत्वं भवति। उक्तम्-

**गुणीकृतात्मतार्थस्य न प्रतीतावुपायता।**

**न चारुत्वमपित्वर्थैर्बौद्धैरनुपकार्यता।**

2. शब्देऽपि व्यक्तिः "**द्विविधो हि प्रकाशकोऽर्थ उपाधिरूपः स्वतन्त्रश्चेति। तत्र ज्ञानशब्दप्रदीपादिरुपाधिरूपः। तदुक्तम्- त्रयः प्रकाशाः स्वपरप्रकाशाः।**" इति वदता स्वयमेव सूचिता। शब्दो ज्ञानं प्रदीपादिश्चेति त्रयः उपाधिरूपाः प्रकाशकाः स्वं परं च स्वोपरक्तमेव पदार्थं सहैव प्रकाशयन्ति। शब्दः स्वरूपं प्रकाशयन्नेवार्थं प्रकाशयतीति तत्रापि व्यक्तेः सत्त्वेन ध्वनिलक्षणे शब्दस्योपादानं समीचीनमेव। उक्तं वाक्यपदीयेऽपि-

**"न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते।**
**अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते।।**
**ग्राह्यत्वं ग्राहकत्वं च द्वे शक्ती तेजसो यथा।**
**तथैव सर्वशब्दानामेते पृथगिव स्थिते।।**"

इत्यादिना शब्देऽपि प्रदीपादिवद् व्यञ्जकत्वं सूचितमेव।

3. शब्दे यद्यपि स्ववाच्यापेक्षयोपसर्जनीकृतार्थत्वं न संभवति, किन्तु प्रतीयमानापेक्षया संभवति। प्रतीयमानेनोपसर्जनीकृतो वाच्यरूपोऽर्थो यस्य स उपसर्जनीकृतार्थः शब्द इत्यर्थकरणे नासंभवदोषः। न हि शब्देन वाच्यस्योपसर्जनीकरणं विवक्षितम्, अपितु प्रतीयमानेन।

4. "**तद्वत् सचेतसां सोऽर्थो वाच्यार्थविमुखात्मनाम्**" इत्यव्यवहितकारिकायां सोऽर्थ इत्यत्र पुल्लिङ्गनिर्देशेन ध्वनिलक्षणे तमित्यत्र तदः पुंस्त्वेन निर्देशे न क्षतिः।

5. वापदं विकल्पार्थकमेव। तेनार्थशव्दगतव्यञ्जकत्वस्य गुणप्रधानभावयोर्विकल्पो विवक्षितः, न त्वर्थशब्दयोः। क्वचनार्थो गुणरूपेण प्रधानरूपेण वा व्यञ्जको भवति, एवमर्थोऽपि। अर्थशब्दयोरुभयोरपि व्यञ्जकत्वस्य सत्त्वेन न द्विवचनस्यासंगतिः।

6. उक्तरीत्या वाशब्दस्य विकल्परूपार्थस्य स्वीकारे न काचन क्षतिः।

7. शब्देऽर्थे च व्यक्तिर्घटप्रदीपन्यायेन संभवति। शब्दः स्वरूपं प्रकाशयन्नेव वाच्यं प्रकाशयति, वाच्यमप्यात्मानं प्रकाशयन्नेवार्थान्तरं प्रकाशयति। वाच्यस्य द्वे ज्ञाने भवतः। प्रथमे ज्ञाने वाच्यमेव विषयो भवति। यदा वाच्यं प्रतीयमानं प्रकाशयति तदा तस्मिन् द्वितीये ज्ञाने प्रतीयमानेन सह वाच्यमपि विषयो भवति। एवं प्रथमं ज्ञानं वाच्यमात्रविषयकं भवति, द्वितीयं तु वाच्यसंवलितप्रतीयमानविषयकम्। अनयोर्ज्ञानयोः क्रमस्य लक्ष्यालक्ष्यत्वे स्वीकृत्य ध्वनेः लक्ष्यालक्ष्यक्रमत्वव्यवस्था ध्वनिसिद्धान्ते स्वीकृता। यथा प्रदीपज्ञाने घटो नापेक्षितः, किन्तु घटज्ञाने प्रदीपोऽपेक्ष्यत एव, तथा व्यञ्जकवाच्यादिज्ञाने व्यङ्ग्यं नापेक्ष्यते, किन्तु व्यङ्ग्यज्ञाने व्यञ्जकवाच्यादिकमपेक्ष्यत एव। एवं व्ययङ्ग्यव्यञ्जकयोर्ज्ञानं सह भवति।

वाच्येन सहैवार्थान्तरस्य प्रकाशनेनेदं निराकृतं भवति यत् साहित्येनाऽप्रकाशनाच्छब्दार्थयोर्व्यक्ति- र्नास्तीति। प्रकाशकेन प्रकाश्ये स्वोपरागार्पणं साहित्येन प्रकाशनं च वाक्यपदीयस्यानयाऽपि कारिकया ध्वनितम्-

**प्रकाशकानां भेदाँश्च प्रकाश्योऽर्थोऽनुवर्तते।**

**तैलोदकादिभेदे तत् प्रत्यक्षं प्रतिबिम्बके।।**

8. स्फोटस्य नित्यत्वं श्रूयमाणे ध्वनिपदव्यपदेश्ये शब्दे व्यञ्जकत्वं च पतञ्जलिभर्तृहरिप्रभृतिभिः स्वीकृतमिति तदाश्रित्य काव्ये प्रवर्तितो ध्वनिव्यवहारः समीचीन एव। "यः संयोगवियोगाभ्याम्" इत्यत्र "उपजन्यते" इति पदस्य व्यज्यत इत्यर्थः।

9. गुणीभूतव्यङ्ग्यमप्यनादिव्यवहारसिद्धमिति तत्र ध्वनित्वस्य वारणाय स्पष्टीकरणाय वा विशेषपदं सार्थकम्।

10. व्यङ्ग्यस्फोटवादिनां वैयाकरणानां मतं येऽनुसरन्ति तेषामालंकारिकविशेषाणां बोधनाय तेन ध्वनिसिद्धान्तस्य प्रामाण्यस्य प्रकाशनाय च सूरिभिरिति कर्तृपदोपादानं साभिप्रायत्वेन सप्रयोजनमिति नावाच्यवचनदोषः।

एवं ध्वनिलक्षणे धूलिवत् प्रक्षिप्ता दोषा निरस्ताः, ध्वनिसिद्धान्तः प्रतिष्ठापितश्च। ततश्च ध्वनिवाक्यस्यायं निर्गलितोऽर्थः- यत्रोपसर्जनीकृतात्माऽर्थः प्राधान्येनाऽप्राधान्येन वा, प्रतीयमानोपसर्जनीकृतार्थः शब्दश्च प्राधान्येनाऽप्राधान्येन वा तं ललनालावण्यसदृशं स्वोपरक्तं चमत्कारिणमर्थं स्वरूपेण सह प्रकाशयतः स काव्यविशेषो वैयाकरणमतानुसारिभिः काव्यतत्त्वविद्भिर्व्यञ्जकत्वसामान्येन ध्वनिरुक्त इति शम्।

# साधर्म्यमुपमा भेदे इत्युपमालक्षणविचारः

**डा. राघवेन्द्रभट्टः**
साहित्यविभागाध्यक्षः
रा.सं.सं. राजीवगान्धीपरिसरः, शृङ्गेरी

अथ काव्यप्रकाशोक्तमुपमालक्षणं विचार्यते । काव्यसौन्दर्यसाधनम् अलङ्काराः। ते च शब्दार्थधर्मवत्तया द्विधा । अनुप्रासादयः शब्दधर्मा उपमादयोऽर्थधर्माः सन्तः काव्यसौन्दर्यादायका भवन्ति । शब्दधर्माः शब्दालङ्का इति अर्थधर्मा अर्थालङ्कारा इति च कथ्यन्ते । तत्र अर्थालङ्काराः सादृश्यमूलाः, विरोधमूलाः, न्यायमूलाः, शृङ्खलामूलाश्च भवन्ति । उपमेयोपमानन्वयप्रतीपस्मरणादयः सादृश्यमूलाः । उपमा च सादृश्यरूपा । स्वरूपतया तत्सम्बन्धवत्वादस्या अपि सादृश्यमूलेष्वन्तर्भावः । अस्या उदाहरणम् 'तस्या मुखं चन्द्र इव सुन्दरम्' इति । अत्र मुखे चन्द्रस्य सादृश्यमुच्यते । सौन्दर्यरूपसमानधर्मवत्तया मुखचन्द्रयोरुपमानोपमेययोर्यत्सादृश्यं सा उपमेति लक्षणसमन्वयः।

काव्यप्रकाशे दशमोल्लासे अर्थालङ्कारनिर्णयाख्ये आदौ उपमालङ्कारो निरूपितः । तल्लक्षणं तावत् 'साधर्म्यमुपमा भेदे' इति । भेदे उपमानोपमेययोः भेदे सति साधर्म्यम् समानधर्मेण सम्बन्धः उपमा । साधर्म्यम् उपमानोपमेययोर्भवतीत्यतः तयोरेव समानधर्मेण सम्बन्धः तथात्वेनाभिमतः। कार्यकारणादिकयोस्तु कार्यकारणभावसम्बन्धः न साधर्म्यसम्बन्धः। लक्षणवाक्ये भेदग्रहणम् अनन्वयव्यावर्तनार्थम् । अनन्वये तु 'इन्दुरिन्दुरिव' इत्यत्र एकस्यैव पदार्थस्य उपमानत्वमुपमेयत्वञ्चेति न तत्रोपमानोपमेयभेदः । लक्षणे भेदग्रहणाभावे अनन्वये उपमानोपमेयत्वसत्त्वात् अतिव्याप्तिः स्यात् । उपमायां भिन्नयोः पदार्थयोरुपमानोपमेयत्वस्य विवक्षितत्वात् भेदे इत्यनेन अनन्वयव्यावृत्तिः।

**साधर्म्यपदार्थविचारः**

समानः एकः तुल्यो वा धर्मः गुणक्रियादिरूपः ययोः उपमानोपमेययोः तौ सधर्माणौ तयोर्भावः साधर्म्यम् । उपमानोपमेययोः समानधर्मेण सह सम्बन्धः इत्यर्थः। स च सादृश्यरूपः । केचित् साधर्म्यसादृश्ययोः भेदमिच्छन्ति । आदौ तन्मतमुच्यते । तथा हि उपमानोपमेययोः समानधर्मेण सह सम्बन्धः साधर्म्यम् । कृत्तद्धितसमासेभ्यः सम्बन्धाभिधानं भावप्रत्ययेन इति नियमात् साधर्म्यं भाववाचितद्धितप्रत्ययवत्वेन सम्बन्धार्थमभिधत्ते । स सम्बन्ध एव उपमालङ्कारः । साधर्म्यं साधारणधर्मवत्वम् । तच्च साधारणसम्बन्धरूपं तद्धितप्रत्ययस्य सम्बन्धार्थप्रतिपादकत्वात्। एवञ्च

उपमानोपमेययोर्यत्सादृश्यं तत्प्रयोजकः साधारणधर्मसम्बन्धः एवोपमा । साधर्म्यस्य सम्बन्धरूपत्वे तस्य प्रतियोग्यनुयोगिनौ भवेताम्। विशिष्टबुद्धौ प्रकारतया भासमानं सम्बन्धस्य प्रतियोगि विशेष्यतया भासमानं सम्बन्धस्यानुयोगीत्युच्यते। साधारणधर्मः सम्बन्धस्य प्रतियोगी, उपमानोपमेयौ अनुयोगिनौ । एवञ्च साधारणधर्मप्रतियोगिकः उपमानोपयानुयोगिकः सम्बन्धः साधर्म्यम् । सादृशञ्च उपमानप्रतियोगिकः उपमेयानुयोगिकः सम्बन्धः । साधारणधर्मसम्बन्धप्रयोज्यो धर्मः सादृश्यम् इत्यतः साधर्म्यसादृश्ययोर्भेदः । तदुक्तम् उद्योते 'सादृश्यप्रयोजकसाधारणसम्बन्धो ह्युपमा, सादृश्यञ्च अतिरिक्तः पदार्थः' इति। सादृश्यस्य अतिरिक्तपदार्थत्वं वैयाकरणैरप्यङ्गीक्रियते। परिभाषेन्दुशेखरस्य व्याख्यानावसरे

'अत्र परिभाषायां सादृश्यं साधारणधर्मसम्बन्धप्रयोज्यं सदृशादिपदशक्यतावच्छेदकतया सिद्धं सदृशदर्शने संस्कारोद्बोधकत्वस्य सर्वसम्मतत्वेन तत्कारणतावच्छेदकतया च सिद्धमखण्डमतिरिक्तः पदार्थः' इति।

किञ्च उपमायाः आर्थी शाब्दी च भेदः सादृश्यस्य अतिरिक्तत्वे एव उपपद्यते। तथा हि इवादिशब्दसत्त्वे साधारणसम्बन्धरूपा उपमा वाच्या, सादृश्यप्रतीतिस्तु आर्थी । सदृशादिपदप्रयोगे सादृश्यप्रतीतिः शाब्दी, उपमात्वार्थी । सादृश्यं साधारणधर्मातिरिक्तमित्यत एव अनेनायं सदृशः इत्युक्ते केन धर्मेणानयोः सादृश्यमिति जिज्ञासा उदीयमाना सङ्गच्छते। किञ्च सादृश्यस्य साधारणसम्बन्धातिरिक्तत्वे एव 'उपमानानि सामान्यवचनैः' इति सूत्रभाष्ये उभयोरुभयं वर्तते, सादृश्यमूलाभेदाध्यवसायेनोपमानस्योपयेऽभेदेनान्वयः, इत्युक्त्वा सिद्धान्ततया 'एवमपि सादृश्यनिमित्तं गुणो न निर्दिष्टः' इति शङ्का, सन्निधानात् 'श्यामत्वमेव गुणः' इति समाधानञ्च सङ्गच्छते । तुल्ययोगिताया निरूपणावसरे रसगङ्गाधरे जगन्नाथेनाऽपि 'औपम्यञ्चात्र गम्यम् । तत्प्रयोजकस्य समानधर्मस्योपादानात् वाचकाभावाच्च । अत एवालङ्कारिकाणामपि सादृश्यं पदार्थान्तरम्, न तु साधारणरूपमिति विज्ञायते अन्यथा औपम्यस्यात्र गम्यत्वोक्तेरनुपपत्तेः इत्युक्तम् । एतावत्परिशीलनेन सादृश्यं साधारणधर्मप्रयोज्यं पदार्थान्तरमेवेति स्पष्टम् । नव्यन्यायविदस्तु सादृश्यं न पदार्थान्तरं साधारणधर्मसम्बन्धरूपं साधर्म्यं सादृश्यञ्च एकमेव इति वदन्ति। सादृश्यस्य अतिरिक्तपदार्थत्वे सप्तभ्यः पदार्थेभ्यः अतिरिक्तपदार्थत्वाङ्गीकारप्रसङ्गः। अतस्तन्मतरीत्या सादृश्यं तद्भिन्नत्वे सति तद्गतभूयो धर्मवत्वम् । तस्माद्भिन्नत्वे सति तत्र विद्यमाना ये भूयांसो गुणक्रियारूपा धर्माः तद्वत्वमित्यर्थः। 'चन्द्रवन्मुखम्' इत्यत्र चन्द्रभिन्नत्वे सति

चन्द्रगताह्लादकत्ववत्वं मुखे सादृश्यम् । अत्र भूयोधर्मवत्वं धर्म एव न तु धर्मसम्बन्धः। स च धर्मः गुणरूपश्चेद्गुणे क्रियारूपश्चेत्क्रियायामन्तर्भावः इति सादृश्यस्य अतिरिक्तपदार्थत्वं नाङ्गीकृतम्। अत्र शङ्का -साधर्म्यं सादृश्याद्भिन्नमित्युच्यते चेत् दशमोल्लासस्यान्तिमे असादृश्याख्योपमादोषस्य अनुचितार्थतायामन्तर्भावकथनावसरे 'ग्रथ्नामि काव्यशशिनं वितथार्थरश्मिम्' इत्युदाहरणस्य 'काव्यस्य शशिना अर्थानाञ्च रश्मिभिः साधर्म्यं कुत्रापि न प्रतीतम्' इति वृत्तिग्रन्थेन सह विरोधः स्यात् । तत्र काव्यार्थयोरनुयोगित्वम्, शशिरश्म्योश्च प्रतियोगित्वम् । साधर्म्यशब्दस्य उपमानोपमेययोः काव्यशशिनोरर्थरश्म्योश्च सादृश्यार्थबोधकत्वमेव इति । तन्न, 'ग्रथ्नामि काव्यशशिनं वितथार्थरश्मिम्' इत्यत्र शशिसहितस्य काव्यस्य रश्मिसहितस्यार्थस्य च साधारणसम्बन्धरूपं साधर्म्यं न प्रसिद्धम् । अतः काव्यशिशिनोरर्थरश्म्योश्च अनुयोगित्वमेव, न तु काव्यार्थयोरनुयोगित्वं शशिरश्म्योश्च प्रतियोगित्वम् । किञ्च 'समानेन धर्मेण सम्बन्धः' इत्यादिवृत्तिरपि साधर्म्यस्य सम्बन्धरूपतया सादृश्यातिरिक्तत्वं गमयति। इति साधर्म्यं सादृश्यातिरिक्ततया उपमामभ्युपगच्छन्ति केचित् ।

वस्तुतस्तु साधर्म्यं न सादृश्यातिरिक्तम्। तथा हि साधर्म्यं साधारणधर्मसम्बन्धनिरूपितः उपमेयानुयोगिकः उपमानप्रतियोगिकः उपमानोपमेययोः सम्बन्ध एव । न पुनरुपमानोपमेयानुयोगिकः साधारणधर्मप्रतियोगिकः सम्बन्धः । यदि उपमानोपमेयानुयोगिक- साधारणधर्मप्रतियोगिकसम्बन्ध उच्यते, स धर्मधर्मिणोः सम्बन्ध इति समवाय एव न तु साधर्म्यम् । किञ्च उपमानोपमेययोरेव साधर्म्याख्यसम्बन्धः सर्वस्वकारादिभिरपि स्वीकृतः। सर्वस्वकारेण 'उपमानोपमेययोः साधर्म्ये भेदाभेदतुल्यत्वे उपमा' इति, अन्यैरप्यालङ्कारिकैः व्याख्याकारैश्च उपमानोपमेययोः सम्बन्ध एव साधर्म्यमिति परिगृहीतम् । लक्षणकारैश्चानेकैः सादृश्यपर्यायतयैव साधर्म्यपदं प्रयुक्तम् । इत्येवं बहुभिः प्रमाणैः साधर्म्यसादृश्ययोरभिन्नत्वं स्पष्टमेव । अतः मम्मटाचार्यस्यापि साधर्म्याख्यः उपमानोपमेययोरेव सम्बन्धः सम्मतः। तत्सम्मतिश्च असादृश्याख्योपमादोषस्य अनुचितार्थतायामन्तर्भावकथनावसरे ग्रथ्नामि काव्यशशिनं विततार्थरश्मिमित्यत्र 'अत्र काव्यस्य शशिना अर्थानाञ्च रश्मिभिः साधर्म्यं कुत्रापि न प्रतीतमित्यनुचितार्थत्वम्' इति वृत्तिग्रन्थेन ज्ञायते। पुनश्च 'उपमानोपमेययोरेव साधर्म्यं भवतीति तयोरेव समानधर्मेण सम्बन्ध उपमा' इति वृत्त्यापि उपमानोपमेययोरेव सम्बन्धः साधर्म्यं तदेव सादृश्यम् इत्यपि निर्विवादम्। सादृश्यस्य अतिरिक्तपदार्थत्वे तु न विवादः ।

अन्यथा दीपकादौ सादृश्यस्य व्यङ्ग्यता नोपपद्येत इत्येतेषामपि तत्सम्मतम् । तत्र साधारणधर्मस्य वाच्यत्वेऽपि सादृश्यस्य व्यङ्ग्यत्वात् ।

इति शम्।

सहायकग्रन्थाः


| | | | |
|---|---|---|---|
| १. | काव्यप्रकाशः – प्रदीपव्याख्या | ५. | साहित्यदर्पणः |
| २. | काव्यप्रकाशः – उद्योतव्याख्या | ६. | रसगङ्गाधरः |
| ३. | काव्यप्रकाशः – बालबोधिनीव्याख्या | ७. | अलङ्कारसर्वस्वम् |
| ४. | लघुशब्देन्दुशेखरः | ८. | काव्यालङ्कारसूत्रवृत्तिः |

## सहृदयः

**डा. चन्द्रकला आर्. कोण्डी**
साहित्यविभागः
रा.सं.सं. राजीवगान्धीपरिसरः, श्रृङ्गेरी

लोकोत्तरवर्णनानिपुणेन कविना विरचितस्य काव्यस्य रसास्वादयिता 'सहृदय'-शब्देनाभिधीयते काव्यलोके । कविसमानं हृदयं यस्य इति प्रत्येकमपि कविः स्वविरचितकाव्यस्य सार्थक्यसम्पादकं रसज्ञं योग्यं सहृदयमपेक्षते । कश्चन कविः प्रार्थयते प्रजापतिम्-

इतर कर्मफलानि यदृच्छया वितर तानि सहे चतुरानन ।
अरसिकेषु कवित्वनिवेदनं शिरसि मा लिख मा लिख मा लिख ॥

इति । तेन सहृदयस्यावश्यकता कवेः कीदृशी वर्तते इति स्पष्टं ज्ञायते । भारतीयकाव्यमीमांसायां सहृदयस्य कृते यत् प्राशस्त्यं दत्तमस्ति तदन्यत्र कुत्रापि न दृश्यते । सहृदयस्याभावे कवेः काव्यं निरर्थकम् । किं बहुना ? काव्यस्य काव्यत्वमेव सहृदयायत्तम् । अत एव कैश्चिदुक्तम्-सहृदयहृदयाह्लादकारिशब्दार्थमयत्वमेव काव्यलक्षणम् इति । अत एव राजशेखरः काव्यमीमांसायां काव्यसम्बद्धां प्रतिभां द्विधा विभजते-कारयित्री, भावयीत्री चेति । काव्यं कर्तुं यया प्रभवति कविः सा कारयित्री, कविकृतं यथावज्ज्ञातुमपि काचिद्विशिष्टा प्रतिभा आवश्यकी । सैव भावयित्री सहृदयस्था । तेनोक्तम्-**भावकस्योपकुर्वाणा भावयित्री । सा हि कवेः श्रममभिप्रायं च भावयति । तया खलु फलितः कवेर्व्यापारतरुः । अन्यथा सोऽवकेशी स्यात्** इति।

एवं काव्यं कवि-सहृदयाभ्यां उभाभ्यामपि मिलित्वैव सार्थक्यं प्राप्नोति । एकस्यैव सारस्वततत्त्वस्य अङ्ग इति अभिनवगुप्तपादाचार्यः ध्वन्यालोकलोचनस्य आदिमश्लोके एवं प्रशंसति- **सरस्वत्यास्तत्त्वं कविसहृदयाख्यं विजयते** इति ।

काव्यस्य अनेकानि प्रयोजनानि सन्ति । तेषु यशः अर्थः इत्यदीनि कानिचन कवेः, शिवेतरक्षत्यादीनि कानिचन च उभयोः । किन्तु काव्यस्य परमं चरमं च प्रयोजनं "सकलप्रयोजनमौलिभूतः रसास्वादनसमुद्भूतः विगलितवेद्यान्तरानन्दः" सहृदयस्यैव । अत एव काव्ये सहृदयस्यानिवार्यता । तस्याभावे काव्यस्य प्रधानं प्रयोजनमेव निर्वर्तितं न स्यात् ।

'सहृदय'शब्दस्य सर्वाधिकः प्रयोगः अथर्ववेदे वर्तते । नाट्यवेदस्य निर्माता ब्रह्मा रसं तत एव स्वीकृतवान् । तत्र-'सहृदयं साम्मनस्यमदिवेषं करोमि' इत्यस्ति वाक्यम् । अस्य उपवेदे आयुर्वेदे रससम्बद्धा अनेकाः सामग्र्यः लभ्यन्ते ।

परवर्तिन आलङ्कारिकाः 'सहृदय'शब्दस्य 'सुमनस्' , 'सचेतस्' इत्याद्यनेकान् पर्यायान् कल्पितवन्तः [१]। तथापि 'सहृदय' इत्येव स्थिरतया प्रयुक्तो वर्तते । 'सहृदय'पदं व्याख्याकाराः 'समानहृदय'मित्येव व्याख्यान्ति-

**'नायकस्य कवेः श्रोतुः समानोऽनुभवस्ततः'** ।

नायकस्तु कवेः सृष्टिः । अतः समानता रचयितृ-ग्राहकयोर्हृदयस्यैव भवति। हृदयस्य समानतायाम् अनुभवोऽपि समानो भवति । अनुभवस्य समानतैव तन्मयीभावः । कविः काव्यं रचयति, सहृदयः भावनाद्वारा पुनः सृजति ।

'सहृदय' स्य स्वरूपं प्रथमतया आनन्दवर्धनेन एवं विवृतम्-

**तद्वत्सचेतसां सोऽर्थो वाच्यार्थविमुखात्मनाम् ।**
**बुद्धौ तत्त्वार्थदर्शिन्यां झटित्येवावभासते** ॥ [२]

शब्दस्य सङ्केतितार्थं सर्वेऽपि ज्ञातुं शक्नुवन्ति । परन्तु सहृदयशब्दः सर्वेषु नान्वेति । तर्हि को विशेषः शब्दार्थज्ञातुः सहृदयस्य च इति चेत्, सहृदयाः वाच्यार्थविमुखाः भवन्ति इत्येव । अत्र सहृदयानां वाच्यार्थविमुखत्वं नाम न सर्वथा वाच्यार्थानादरः इति । किन्तु यस्मिन्नर्थे कवेरभिप्रायो नास्ति तस्मिन्नर्थे इत्येव ज्ञातव्यम् । यतः सहृदयानां मनः कवेरभिप्राययुक्ते अर्थे रमते । स चार्थः यदि गुणीभूतव्यङ्ग्यादिष्विव वाच्यार्थ एव तर्हि तत्रैव सहृदयः आस्वादं करोति। अतः आनन्दवर्धनस्याभिप्रायः व्यङ्ग्यार्थः सहृदयविशेषः, अर्थात् सहृदयत्वाभावे व्यङ्ग्यार्थज्ञानं न भवति इत्येव, न तु चारुत्वयुक्ते वाच्यार्थे न रमते, चारुत्वाभावयुक्ते व्यङ्ग्यार्थे रमते इति । किन्तु तत्रापि वाच्यार्थस्य चारुतायाः व्यङ्ग्यसंस्पर्श एव कारणमिति विशेषः । महाकवीनां कालिदासादीनां काव्यानि व्यङ्ग्यार्थप्रधानान्येव । तादृशकाव्ये वाच्यार्थस्तावत् व्यङ्ग्यार्थस्योपस्कारक एव भवति, न तु प्रधानः । तादृशस्थले आनन्दवर्धनस्यायमभिप्रायः यथार्थतामेति । कविविवक्षितं यथावत् हृदयेन गृहीतुं य शक्नोति स सहृदय इति पर्यवसितोऽर्थः । एतत्सर्वमपि अभिप्रायमाकलय्य आचार्य अभिनवगुप्तपादेन सहृदयस्य स्वरूपम् एवं निरूपितमस्ति-

**'येषां काव्यानुशीलनवशात् विशदीभूते मनोमुकुरे वर्णनीयतन्मयीभवनयोग्यता, ते हृदयसंवादभाजः सहृदयाः'** [३] इति ।

अभिनवगुप्तपादैः सहृदयः बहुधा व्याख्यातः । तैर्विरचितेषु साहित्यशास्त्रीयटीकासु, [१] दार्शनिकग्रन्थेषु [२] च सहृदयस्य स्वरूपं त्रिभिः कोणैः

---

[१] तद्वत्सचेतसां सोऽर्थो वाच्यार्थविमुखात्मनाम् । ध्वन्यालोक-प्रथमोद्योतः

[२] ध्वन्यालोकः-प्रथमोद्योतः

[३] ध्वन्यालोकलोचनम्-प्रथमोद्योतस्य टीकायाम् ।

परामृष्टम् । तच्च- चितिः, चेत्यं चित्तं च । 'चिति'दृष्ट्या यदि पश्यामस्तर्हि सहृदयत्वं भवति 'स्वहृदयसंवादभाजकत्वम्' । 'चेत्य'दृष्ट्या तदेव सहृदयत्वं 'वर्णनीयतन्मयीभवनयोग्यता'रूपेण गृह्यते । 'चित्त'दृष्ट्या यदि विचार्यते तदा तद्भवति 'तादात्म्यसम्प्रतिपत्तियोग्यता' ।

एतेषु स्वहृदयसंवादभाजकत्वस्य व्याख्यानद्वयं तैः दत्तम्-

१. संवादक्षेत्रे यः स्वस्य हृदयं प्रमाणं करोति सः सहृदयः, तस्य भावः सहृदयता इति ।

२. स्वस्य हृदयं कविहृदयेन सह संवादे भाजनं करोति यः सः सहृदयः, तस्य भावः सहृदयत्वम् । इति ।

चेत्यमित्यस्मिन् पक्षे काव्यस्य वर्ण्यसामग्री भावनायाः चेतनायां सङ्क्रामति । सा च चेतना तन्मयी भवति । अथवा, वर्ण्यसामग्री एव तन्मयं प्रकाशमयं च भवति । यस्य हृदये सा योग्यता वर्तते सः सहृदयः, वर्णनीयतन्मयीभवनयोग्यतैव सहृदयता । वर्ण्यसामग्री प्रकाशमयी भूत्वा चितेः महाविस्फारं करोति ।

चित्तमित्यस्मिन् पक्षे, यस्य चित्तं वर्ण्यसामग्र्या सह तादात्म्यं प्राप्नोति सः सहृदयः, तस्य भावः ।

सहृदयतायाः अन्यां कामपि व्याख्यां प्रस्तुतवन्तः अभिनवगुप्तपादाः परात्रिंशिकायाम् । तत्र तैरुक्तम्-**"वीर्यविक्षोभात्मा हि सहृदयता"** इति । शुक्रक्षोभ एव सहृदयता । शरीरस्तरे शुक्र एव शक्तिः । अस्य च शुक्रस्य तिस्रः दशाः भवन्ति-अक्षुब्ध, क्षुब्ध उत्तेजितश्चेति । सुन्दररूपादिविषयसम्पर्केणापि यस्य शुक्रस्य क्षोभः न भवति, सः जड इत्युच्यते । यदि तादृशानां दर्शनमात्रेण उत्तेजितं भवति तर्हि सः पशुः । एतदतिरिक्ततया स्पन्दात्मकक्षोभः यस्य जायते, सः सहृदयः । यतः सः स्पन्दात्मकक्षोभः संयमवशादागच्छतीति हेतोः । सौन्दर्यं संयतस्यैव योग्यम्। अत एव कालिदासः शिवं संयमिनामग्रगण्य इति वदति । पार्वत्याः सौन्दर्यं संयतेन तेन निरवधिकं भुज्यते । शक्त्या सह शिवः उत्तेजितः कदापि न भवति । यदि भवति तर्हि तस्य शिवत्वमेव नश्येत् ।

'सहृदय'शब्दे 'हृदय'शब्दस्य लाक्षणिकार्थोऽपि गृह्यते । यस्य हृदयम् उत्कृष्टं भवति, मानवीयमौल्यैः युक्तं भवति, सः सहृदय इति । अस्य हृदयगत-उत्कर्षस्य पञ्च कारणानि भवन्ति-सुकुमारता, काव्यानुशीलनम्, प्राक्तनपुण्यपरिपाकः, विमलप्रतिभानशीलता नैर्मल्यं चेति । तत्र-

---

[1] ध्वन्यालोकलोचनम् अभिनवभारती च ।

[2] तन्त्रालोक, परात्रिंशिका ईश्वरप्रत्यभिज्ञाविमर्शिनी च ।

१. चित्तगतसुकुमारतया परेषां सुखदुःखानि स्वकीयं मन्यते ।

२. तेन काव्यानुशीलनद्वारा कवेः भावनाः अनेन ज्ञातुं शक्यन्ते ।

३. प्राक्तनपुण्यपरिपाकात् (पूर्वजन्मनः संस्कारबलात्)

४. शुद्धप्रतिभायाः कारणात्

५. निर्मलमनसा काव्यरसास्वादं कर्तुं समर्थो भवतीति

तादृशहृदययुक्त एव सहृदय इत्युच्यते ।

लोकः भिन्नरुचिर्भवति । तेन सहृदयोऽपि भिन्नरुचिरेव । समेषां सहृदयानां विषयः समानः न भवति काव्ये । केचन शब्दचमत्कारमिच्छन्ति, केचनालङ्कारसौन्दर्यम्, केचन वक्रोक्त्यादिवैचित्र्यम् । किन्तु कवेः भावस्य रमणीयताम् आत्मसात्कर्तुं केचन एव प्रभवन्ति । काव्यस्य समस्तं सौन्दर्यमपि स्वीकृत्य, एकमप्यंशमविहाय तथापि अखण्डरूपेणैव स्वारस्यं ये आस्वादयन्ति ते विरला एव ।

स्वस्य आनन्दस्य अभिव्यक्तिरपि सर्वैः सहृदयैः समानतया न क्रियते । केचन वाग्भिः, केचन नृत्यादिभिः, केचन अप्रदर्शितरूपेण । किन्तु केचन तथा भवन्ति सहृदयाः रोमाञ्चिताः फुल्ललोचनाश्च सन्तः मौनेनैव अभिव्यञ्जयन्ति स्वानन्दम् । एते राजशेखरेण एवमुल्लिखिताः-

**वाग्भावको भवेत् कश्चित् कश्चित् हृदयभावकः ।**
**सात्त्विकैराङ्गिकैः कश्चित् अनुभावैश्च भावकः ॥** [1]

एतेषु चतुर्थे भावक एव कवेः समादरः । एतादृशं भावकं 'विज्जिका'नामिका कवयित्री एवं प्रशंसति-

**कवेरभिप्रायमशब्दगोचरं स्फुरन्तमार्द्रेषु पदेषु केवलम् ।**
**वदद्भिरङ्गैः कृतरोमविक्रियैः जनस्य तूष्णीं भवतोऽयमञ्जलिः ॥**

इति ।

वाचकस्य वाचः सारं गृहीत्वा कविसृष्टेः अनुसृष्टिः सहृदयेन क्रियते । कवेर्वचसः अन्तरार्थं स्वस्यान्तर्दृष्ट्या वीक्ष्य विज्ञाय तान् मनसि चित्रयति सहृदयः । उदाहरणार्थम्- कुमारसम्भवमहाकाव्यस्य पञ्चमसर्गे पार्वत्याः तपः, पार्वती-ब्रह्मचारिणोः संवादसन्दर्भः सहृदयेन अन्तर्दृष्ट्या प्रचलितरूपेण यदि न दृश्यते तर्हि काव्यं ग्रन्थगतं रेखामात्रं भवति । यस्य तादृशी अन्तर्दृष्टिर्भवति स एव सहृदयः रसास्वादस्याधिकारी भवति । आचार्य अभिनवगुप्तपादेन स एवं निरूपितः-"अधिकारी चात्र विमलप्रतिभानशाली सहृदयः" इति ।

---

[1] काव्यमीमांसा

साहित्यशास्त्रे षट् प्रस्थानानि वर्तन्ते । तत्र अलङ्कार-रीति-रस-ध्वनि-वक्रोक्ति-औचित्यरूपाणि काव्यतत्त्वानि प्रधानतया परिगणितानि । तथापि अन्तिमनिर्णयः 'रसः काव्यस्यात्मा' इत्येव । अस्यापि आधारः भवति सहृदयः । काव्यस्य परमप्रयोजनं विगलित-वेद्यान्तरानन्दः रसजन्य एवेति रस एव अन्यतत्त्वानामपेक्षया सहृदयैरास्वाद्यत इति सिद्धम् ।

काव्यस्य काव्यत्वं कवि-सहृदयाभ्यामुभाभ्यां निर्वर्त्यते इति ज्ञातम् । अत्रैकः सन्देहः भवति यत् कविः केवलं काव्यस्य कर्ता एव भवति वा ? सहृदयोऽपि भवति वा ? इति । यतः काव्योपनिबद्धाः रसभावादयः काव्यनिर्माणावसरे कवेर्मनस एव अभिव्यज्यन्ते । तदा सहृदय इव कविरपि तान् आस्वादयति खलु ? तर्हि सः सहृदयोऽपि भवतीति वक्तव्यमिति । किन्तु कवेरेव सहृदयत्वाङ्गीकारे केचनान्तरायाः सन्ति । ते एवं वक्तुं शक्यन्ते ।

१. कविः यदा काव्यं लिखति तदा तन्मनसा अभिव्यज्यमानानां रसभावादीन् सः परिपूर्णतया आस्वादयितुं न शक्नोति । यतः तदा सः रस-गुणा-लङ्कारादीनामौचित्यपूर्वसंयोजने लेखनादि कविकर्मणि च व्यापृतो भवति । अर्थात् सहृदयस्य विगलितवेद्यान्तरत्वं तस्य न भवति ।

२. यदि स्वरचितकाव्यं निर्माणानन्तरं स एव पठित्वा रसास्वादं करोति तर्हि तत्सन्दर्भे सः कविर्न भवति, किन्तु सहृदय एव । अत तथारीत्यापि सहृदयस्यैव रसास्वाद इति वक्तुं शक्यम् ।

३. स्वस्यैव काव्यस्य रसास्वादेन कविः सहृदयोऽपि भवतीति यद्यपि अङ्गीकर्तुं शक्यते, तथापि शतांशेन न । यतः स्वकाव्यपठनावसरे 'इदं मदीयं काव्यम्' इति अभिमानः रसास्वादे विघ्नमुत्पादयेत् । स्वकाव्यमित्यभिमानः तस्य मनसि जागृतः सन् अन्यकवेः साधुकाव्यस्यापि रसास्वादे अन्तरायं जनयति । अतः कविभिन्नस्य सहृदयस्य यथा ममत्व-मात्सर्यादि न भवति, अत एव यः विगलितवेद्यान्तरमानन्दमनुभवितुं शक्नोति तादृशमानन्दं कवेः न लभ्यत एव । अपि च तस्य ममत्व-मत्सरादयः अन्यकवीनां मनस्यपि कष्टं जनयन्ति । एतत्तु कीदृशं भवतीति राजशेखरः पद्यरूपेण एवं वदति-

**कस्त्वं भोः कविरस्मि काप्यभिनवा सूक्तिः सखे पठ्यतां**
**त्यक्ता काव्यकथैव सम्प्रति मया कस्मादिदं श्रूयताम् ।**
**यः सम्यग्विविनक्ति दोषगुणयोः सारं स्वयं सत्कविः**
**सोऽस्मिन् भावक एव नास्त्यथ भवेद्दैवान्न निर्मत्सरः ॥**

एतत्सर्वमपि सम्भवतीत्यस्य काव्येषु निदर्शनानि सन्ति । किन्तु एते व्यक्तिगतदोषाः भवन्ति । कविरपि कश्चन मानवः । अतः मानवसहजा दोषाः तस्मिन्नपि भवन्तीत्यत्र आश्चर्यं नास्ति । तथापि स्व-परकाव्येषु रसास्वादशक्तिः कविवर्गस्यैव नास्तीति वक्तुं न शक्यते । अन्तिमरूपेण एवमेव निर्णयः वक्तुं शक्यते यत् कविर्यदि भावको भवति तर्हि तस्य प्रतिभा द्विधा विभक्ता भवति । किन्तु यः केवलं सहृदयः भवति तस्य प्रतिभा सम्पूर्णतया भावयित्री एव भवतीति तस्यैव सहृदयत्वं वक्तुं युक्तम् इति ।

४. काव्यरसास्वादयितुः सहृदयस्य व्युत्पत्तिर्भवति 'कविहृदयेन समानं हृदयं यस्य' इति । किन्तु कवौ वर्तमानस्य सहृदयस्य इयं व्युत्पत्तिर्न सङ्गच्छते । यतः समानत्ववचने न्यूनातिन्यूनं द्वयोरावश्यकता भवति । कवेः सहृदयत्वस्य आश्रयः कविरेव भवतीति तस्य तेन सहैव समानत्वोक्तिः नोचिता । अतः कविगतस्य सहृदयस्य 'सुष्ठु हृदयं यस्य' इत्येव व्युत्पत्तिर्वक्तुं शक्या, उत्तमोत्तमविचारा यत्र उत्पद्यन्ते तदितिरीत्या ।

कवि-सहृदययोरुभयोरपि कार्यं भिन्नम् । कुन्तकेन तदेवं सुन्दरतया निरूपितम्-

**लीनं वस्तुनि येन सूक्ष्मसुभगं तत्त्वं गिरा कृष्यते**
**निर्मातुं प्रभवेन्मनोहरमिदं वाचैव यो वा बहिः ।**
**वन्दे द्वावपि तावहं कविवरौ वन्देतरां तं पुनः**
**यो विज्ञातपरिश्रमोऽयमनयोर्भारावतारक्षमः ॥** [१]

अत्र कविः 'वस्तुनि लीनं सूक्ष्मसुभगं तत्त्वं गिरा यः कृष्यति' सः, 'वाचैव बहिः जगति नूतनं मनोहरं रूपं निर्मातुं प्रभवति' सः चेति द्विधा उक्तः । द्वावपि प्रशंसनीयावेव । किन्तु अनयोरुभयोरपि श्रमम् अवगम्य तयोः भारं यः अवतारयति सः भावकः एताभ्यामुभाभ्यामपि अधिकः ।

एवं सृष्टिकर्ता कविः, अनुसृष्टिकर्ता सहृदयः-इति उभयोरपि स्थानं समानमेव । किन्तु कवेरभावे सहृदयस्य काऽपि हानिर्नास्ति, किन्तु सहृदयस्याभावे कविकर्म वैफल्यं विन्दतीति हेतोः भारतीयकाव्यमीमांसायाम् अत्यन्तं महत्त्वपूर्णं स्थानं दत्तमस्ति सहृदयस्य । इति शम् ।

[१] वक्रोक्तिजीवितम्

# वीररसविवेचनम्

**डा. कोम्पेल्लि विनयकुमारः**
साहित्यविभागः
रा.सं.सं. राजीवगान्धीपरिसरः, शृङ्गेरी

व्यासर्षेः '**वाग्वैदग्ध्यप्रधानेऽपि रस एवात्र जीवितम्**', भरतमुनेः - '**न हि रसादृते नान्यत् कश्चिदर्थः प्रवर्तते**', विश्वनाथाचार्यस्य '**वाक्यं रसात्मकं काव्यम्**', इत्येतैः काव्यलक्षणैः ज्ञायते यत् काव्यस्य रसात्मकत्वं स्फुटं प्रतिपादितमिति। तैत्तिरीयोपनिषदि '**रसो वै सः**' '**रसं ह्येवायं लब्ध्वाऽऽनन्दी भवति**' इति ब्रह्म रसरूपेण प्रतिपाद्यते, तत्प्राप्तिसाधनत्वेन काव्यमपि रसात्मकमिष्यते। विश्वनाथेन साहित्यदर्पणे रसस्वरूपं प्रतिपादितं यत् रसः ब्रह्मानन्दसहोदरः इति । भण्यते च यथा -

**वेद्यान्तरस्पर्शशून्यो ब्रह्मास्वादसहोदरः।**
**स्वाकारवदभिन्नत्वेनायमास्वाद्यते रसः।।**इति।।

रसस्य आस्वाद्यत्वम् अनुभूतिविषयत्वं च मम्मटेन वर्णितं यत् - '**पानकरसन्यायेन चर्व्यमाणः, हृदयमिव प्रविशन्, अन्यत्सर्वमिव तिरोधत्, ब्रह्मास्वादमिवानुभावयन्, अलौकिकचमत्कारकारी शृङ्गारादिको रसः**' इति। '**रस्यते आस्वाद्यते इति रसः**' इति लक्षयन् आचार्यो भरतमुनिः काव्यम् आस्वादनीयं मनुते। अतः काव्यं नवरसरुचिरम् आनन्दानुभूतिसाधनं च। आनन्दानुभूतिश्च रसास्वादमूला। रसास्वादनादेव आनन्दावाप्तिः। तदनु आलङ्कारिकैः जीवनस्य परमोद्देश्यभूताः अलौकिकाः चिदानन्दचमत्कारात्मकाः शृङ्गार-हास्य-करुण-रौद्र-वीर-भयानक-बीभत्स-अद्भुत-शान्ताः नव रसाः साहित्यशास्त्रे निरूपिताः। अत्र तावत् पण्डितराजजगन्नाथविरचितस्य रसगङ्गाधरस्य प्रथमानने प्रतिपादितेषु नवसु रसेषु वीररसविवेचनं क्रियते। वीरो नाम वीरयतीति। अस्य स्थायिभाव उत्साहः। तल्लक्षणं तु - '**परपराक्रमदानादिस्मृतिजन्मा औन्नत्याख्य उत्साहः**' इति। प्राञ्चो मम्मटविश्वनाथप्रभृतयो दान-दया-युद्ध-धर्मैः चतुर्भिः वीररसोपाधेः उत्साहस्य चतुर्विधत्वात् वीररसं चतुर्विधं प्राहुः। तत्रादौ -

1. **दानवीरः** - विप्रवेषेण याचमानाय इन्द्राय अदेयकवचादिदानाङ्गीकारमाकलय्य चकितान् सभ्यान् कर्णः ब्रवीति यत् -

**कियदिदमधिकं मे द्विजायार्थयित्रे**
**कवचमरमणीयं कुण्डले चार्पयामि।**
**अकरुणमवकृत्य द्राक् कृपाणेन निर्य-**

**द्वहलरुधिरधारं मौलिमावेदयामि**।।इति।।

यस्मै कस्मैचिदपि याचकाय महर्घस्यापि वस्तुनः सदा सोल्लासं वितरणात् प्रसिद्धस्य कर्णस्य मम याचमानाय विप्राय चर्मरूपत्वात् असुन्दरम्, सुवर्णनिर्मितत्वात् साधारणीकुण्डले च ददामि। इदं तु प्रत्युत क्षुल्लकमेव, अपि तु खङ्गेन छित्वा निःस्त्रवद्विपुलरक्तधारं मन्मस्तकमपि समर्पयामि। (पित्रा भगवता भास्करेण कर्णस्य रक्षार्थं कवचादीनां दत्तत्वात् अदेयानामपि दानोद्यमेन सभ्यानामाश्चर्यम् ।)

अत्र याचमानः अर्थी द्विजवेषः इन्द्रः आलम्बनम्, तदुदीरिता स्तुतिः उद्दीपिका, (याचककृतप्रशंसा), कवचादिवितरणं तत्र लघुत्वबुद्ध्यादिकं च अनुभावः, ( कवचादिषु लघुत्वबुद्धिस्तुच्छत्वज्ञानम्) 'मे' इत्यर्थान्तरसङ्क्रमितवाच्यध्वन्युत्थापितः गर्वः, स्वकीयलोकोत्तरपितृजन्यत्वादिस्मृतिश्च सञ्चारिणौ भावौ।

मे इत्यस्मच्छब्दस्य उच्चारयित्रभिन्नेऽभिधा । अर्थात् निश्शङ्कं समस्तैश्वर्यदानदक्षत्वादिधर्मविशिष्टस्वार्थे अजहत्स्वार्था प्रयोजनवती लक्षणा, स्वकीयाद्वितीयदानशौण्डत्वादिप्रयोजने च व्यञ्जना इत्यर्थान्तरसङ्क्रमितवाच्यध्वनिः। तेन व्यज्यमानः गर्वः, आत्मनः अमर्त्यादित्यजन्यत्वस्मृतिभावश्च व्यभिचारिभावौ विभावादिभिः सम्भूय दानोत्साहं दानवीररसत्वं प्रापयतः इति हृदयम्।

काव्यप्रकाशविवृतौ सारबोधिनीटीकायां श्रीवत्सलाञ्छनभट्टाचार्येण उल्लिखितं दानवीरोदाहरणं खण्डयति यत् जगन्नाथः -

**उत्पत्तिर्जमदग्नितः स भगवान् देवः पिनाकी गुरुः**
**वीर्यं यत्तु, न तत् गिरां पथि, ननु व्यक्तं हि तत् कर्मभिः।**
**त्यागः सप्तसमुद्रमुद्रितमहीनिर्व्याजदानावधिः**
**सत्यब्रह्मतपोनिधेर्भगवतः किं किं न लोकोत्तरम्।**। इति।।

परशुरामं प्रति श्रीरामचन्द्रस्य वचनानि एतानि तव जन्म तावत् जमदग्नेः, तव गुरुस्तावत् भगवान् महादेवः पिनाकी, तव शौर्यं तावत् वर्णनातीतम्, कृतैः कर्मभिरेव ज्ञायते वचोभिः वक्तुं न शक्यते। तव त्यागस्तु सप्तसमुद्रमुद्रितसमस्तमहीमण्डलनिर्व्याजदानावधिः। क्षत्रब्रह्मतपोनिधेः भगवतः तव किं वा न लोकोत्तरम्, तत्सर्वं लोकोत्तरमेव इति श्लोकभावः।

अत्र परशुरामनिष्ठोत्साहस्थायिकवीररसस्य व्यङ्ग्यत्वेऽपि कविनिष्ठतद्विषयकरतौ गुणीभूतत्वेन तस्य उत्सहस्थायिकवीररसस्य अङ्गत्वात् गुणीभूतत्वम् । एतेन 'त्यागः

सप्तसमुद्रमुद्रितमहीनिर्व्याजदानावधिः' इति श्रीवत्सलाञ्छनोक्तमुदाहरणं परास्तम्, तस्य गुणीभूतव्यङ्ग्यत्वेन रसध्वनिप्रसङ्गे अनुदाहरणीयत्वात्।

पूर्वोक्ते 'कियदिदमधिकं मे' इति पद्येऽपि प्रतीयमानस्य दानवीरस्य कर्णस्तुत्यङ्गत्वात् गुणीभूत-व्यङ्ग्यत्वमेव, कथं रसध्वनित्वमिति तुल्यन्यायात् आक्षेप्तुराशयः।

उत्तरयति जगन्नाथः यत् - '**सत्यम्, अत्र कवेः कर्णवचनानुवादमात्रतात्पर्यकत्वेन कर्णस्तुतौ तात्पर्यविरहात्**' इति। अर्थात् नात्र तुल्यन्यायावसरः, उभयोः तौल्याभावात्। 'कियदिदमधिकम्' इति पद्ये कवेः दानवीरकर्णवचनानुवादमात्रे तात्पर्यम्, न तु कर्णस्य स्तुतौ, तेन कर्णस्तुतेः तात्पर्यविषयत्वाभावात् न अङ्गित्वम्, न वा वीररसस्य तदङ्गत्वम्।

ननु कवेरिह कर्णस्तुतौ तात्पर्याभावेऽपि, कर्णस्यैव चेत् आत्मस्तुतौ तात्पर्यम्। तर्हि कथं स्तुतेः न प्राधान्यमिति आशङ्कां निरस्यति जगन्नाथः यत् - '**कर्णस्य च महाशयत्वनात्मस्तुतौ तात्पर्यानुपपत्तेः स्तुतिरवाक्यार्थ एव**' इति। अर्थात् महाशयाः आत्मश्लाघिनो न भवन्ति। महाशयस्य कर्णस्य आत्मस्तुतौ तात्पर्यासम्भवात् अत्र स्तुतेः सत्त्वेऽपि तात्पर्यविषयत्वाभावात् न प्राधान्यसम्भावना इति वीररसस्य गुणीभावाभावात् रसध्वनेरेव उदाहरणमिति आकूतम्।

ननु 'कियदिदमधिकम्' इति पद्ये प्रतीयमाना स्तुतिः अपलपितुमशक्या, तात्पर्यविषयत्वविरहात् यदि न शाब्दधीविषयः, तर्हि का गतिरित्यत आह जगन्नाथः -

'**परन्तु वीररसप्रत्ययानन्तरं तादृशोत्साहेन लिङ्गेन स्वाधिकरणे सानुमीयते राजवर्णनपद्ये तु राजस्तुतौ तात्पर्यात् वाक्यार्थता एव तस्याः**' इति । अर्थात् नवीररसप्रधानक-शाब्दात्मकवाक्यार्थबोधे पर्यवसन्ने प्रतीतेन कर्णस्य उत्साहेन हेतुना, श्रोत्रात्मनि '**कर्णः स्तुत्यः** (विभावादिव्यक्तः) **दानविषयकोत्साहवत्त्वात्**' इत्याकारा अनुमितिः जायते इति प्रतीयमाना स्तुतिः अत्र अनुमितेः गोचरा न तु शाब्दबोधस्य इत्याशयः।

**2. दयावीरः** -

राजा शिबिः शरणापन्नं कपोतरूपं धर्मं वक्ति यत् -

**न कपोत ? भवन्तमण्वपि, स्पृशतु श्येनसमुद्भवं भयम्।**
**इदमद्य मया तृणीकृतं, भवदायुःकुशलं कलेवरम्।**।इति।।

हे कपोत ! श्येनात् उद्भवं भयं त्वाम् अण्वपि न स्पृशतु। (किञ्चिदपि गृध्रात् मा भैषीः।) यतः इदं भवदायुषः क्षेमकरं शरीरम् अद्य मया दीनदयाव्रतिना शिबिना तृणीकृतं भवद्रक्षणाय।

अत्र शिबेः दयालुतापरीक्षायै श्येनरूपेण इन्द्रेण आक्रम्यमाणः भीतः कपोतरूपः धर्मः प्राणपरित्राणाय शिबिं शरणमगात्। स च दयार्द्रचेताः शिबिः स्वशरीरसमर्पणेन श्येनात् कपोतमरक्षीत् इति पौराणिकमितिवृत्तम्।

अत्र दयाविषयकः शिबिवृत्तिरूपरुत्साहः स्थायी, कपोतः आलम्बनम्, तदीयव्याकुलत्वमुद्दीपनम्, शरीरार्पणमनुभावः, धृत्यादयश्च व्यभिचारिणः सम्भूय दयावीररसमास्वादपदवीं नयन्ति।

कपोतापेक्षया श्येनं प्रत्युक्त्या भूयो भयनिवृत्तेः सम्भवात् पाठान्तरं कल्पयति –

शिबिः श्येनं ब्रूते यत् - **न कपोतकपोतकं तव, स्पृशतु श्येन ! मनागपि स्पृहा।**
**इदमद्य मया समर्पितं भवते चारुतरं कलेवरम्।।**इति।।

हे श्येन (गृद्ध्र) ! तव स्पृहा (जिघत्सा) मनागपि कपोतकपोतकं न स्पृशतु, यतः इदं चारुतरं कपोतापेक्षया अधिकमांसलत्वात् अतिमनोरमं कलेबरम् अद्य मया भवते समर्पितम्। अत्र कपोतः आलम्बनम्, तद्गतं व्याकुलीभवनमुद्दीपनम्, तस्य कृते स्वकलेबरार्पणमनुभावः।

अत्र उदाहरणे दानवीरध्वनित्वमाशङ्क्य निराकरोति –

अत्र पद्ये कपोतरक्षायै शिबिकर्तृकश्येनोद्देश्यकशरीरदानं प्रतीयते इति पूर्ववत् दानवीरध्वनेरेव उदाहरणम् इति। तत्र समाधानं निगदति यत्, श्येनः भक्ष्यस्य कपोतशरीरस्य अर्थी, न तु अभक्ष्यस्य शिबिशरीरस्य, तस्मात् याचकस्य अभावे अत्र दानप्रतीतेः असम्भवात् न दानवीररसध्वनिः इत्युत्तरपक्षः।

ननु शिबिकृतं शरीरार्पणमेव दानमिति कुतो न दानप्रतिपत्तिः इत्याशङ्कायामभिदधाति पुनः यत् – **'श्येनशरीरनिवेदनस्य कपोतशरीरत्राणोपाधिकतया विनिमयपदवाच्यत्वात्'** इति। अर्थात् शिबिः कपोतशरीररक्षार्थं तत्परिवर्ते स्वशरीरम् आर्पिपत्। ततः द्रव्यस्य विनिमयः न तु दानं प्रतीयते। निरुपाधिकस्थले एव दानस्य प्रत्ययात् इत्याशयः।

3. **युद्धवीरः** –

समराङ्गणे सन्नद्धं रावणं श्रीरामो ब्रवीति यत् –

**रणे दीनान् देवान् दशवदन ! विद्राव्य वहति**
**प्रभावप्रागल्भ्यं त्वयि तु मम कोऽयं परिकरः।**
**ललाटोद्यज्ज्वालाकवलितजगज्जालविभवो**
**भवो मे कोदण्डच्युतविशिखवेगं कलयतु।।**इति।।

हे रावण ! दीनान् इन्द्रादीन् देवान् रणे विद्राव्य प्रभावप्रागल्भ्यं वहति। स्वल्पबलामरविजयात् वीरमानिनि त्वयि, मम त्रिभुवनैकवीरस्य (रामस्य) समराय समारम्भः कोऽयम् ? ललाटोद्यज्ज्वाला कवलितजगज्जालविभवः भवः (स्वयं भगवान् पिनाकी) मे कोदण्डच्युतविशिखवेगं कलयतु। (जानातु)

अर्थात् क्षुद्रवीर्यामरविजयमात्रेण प्रभुत्वगर्वाध्मातेन त्वया सह त्रिभुवनैकवीरस्य मे युद्धं नोचितम्, केवलमेकनेत्रोन्मीलनभस्मीकृताशेषभुवनेन भवेनैव मे युद्धमुचितम्। अत्र श्लोके भवः आलम्बनम्, रणदर्शनमुद्दीपनम्, दशवदनावज्ञा अनुभावः, गर्वः सञ्चारी।

इदमुच्यते यत् पद्येऽस्मिन् प्रतीयमानस्य वीररसस्य अवज्ञापात्रतया रावणः नालम्बनम्, तेन रावणालम्बनकवीररसस्य न प्रतीतिः इति। अत एव द्वितीयचरणे रावणस्य अमरविद्रावणसामर्थ्यसूचनाय यद्यपि उद्धता, किन्तु न प्रकृष्टोद्धता वृत्तिः। विश्वविदितपराक्रमः भगवान् भवस्तु सर्वथा आलम्बनत्वयोग्य इति तदालम्बनकवीररसप्रतीतिः।

**4. धर्मवीरः** -

अधर्मेणापि शत्रुविजयं विधेहीति वदन्तं प्रति युधिष्ठरो व्याहरति यत् -

**सपदि विलयमेतु राज्यलक्ष्मीरुपरि पतन्त्वथवा कृपाणधाराः।**
**अपहरतुतरां शिरः कृतान्तो मम तु मतिर्न मनागपैति धर्मात्।**।इति।।

मम राज्यलक्ष्मीः शीघ्रं विलयं प्राप्नोतु, अथवा मम उपरि खड्गस्य धाराः पतन्तु, अथवा यमः शिरः (मम) नितरां छिनत्तु नाम तथापि मम धर्मैकनिष्ठस्य युधिष्ठिरस्य बुद्धिः धर्मात् ईषदपि नापसरति।

अत्र धर्मविषयः आलम्बनम् **न जातु कामान्न भयान्न लोभात् धर्मं त्यजेज्जीवतस्यापि हेतोः** इत्यादिवाक्यालोचनमुद्दीपनम्, शिरश्छेदाद्यङ्गीकारः अनुभावः, धृतिः सञ्चारिणी।

इत्थं प्राचां मम्मटादीनाम् अनुरोधात् प्रपञ्चितस्य एतस्य वीररसस्य प्रकारचतुष्टयवत्त्वे अरुचिं सूचयति जगन्नाथः –

इत्थं दृश्यते चेत् - बहवो वीररसस्य प्रकाराः निरूपयितुं शक्यन्ते। यथा - 'सपदि विलयमेतु' इति धर्मवीरोदाहरणे **मम तु मतिर्न मनागपैति सत्यात्** इति चरमपादव्यत्यासेन पद्यान्तरतां प्रापिते सत्यवीरस्यापि सम्भवात्। एवं यदि किञ्चिद्वैलक्षण्यमात्रेण प्रकारभेदः स्यात्, तर्हि वीररसस्य भूयांसः प्रकाराः भवेयुः। तस्मान्नेदं प्रकारभेदकल्पनं युक्तम् इति स्वरसः।

प्राचीनपक्षपाती शङ्कते - **न च सत्यस्यापि धर्मान्तर्गतया धर्मवीररस एव तद्वीरस्याप्यन्तर्भावः** इति वाच्यम्। अर्थात् सत्यमपि धर्म एवेति धर्मवीरेणैव सत्यवीरस्यापि गतार्थतया नाधिकप्रकारकल्पानासम्भव इति। तर्हि समादधाति जगन्नाथः यत् - **दानदययोरपि तदन्तर्गततया तद्वीरयोरपि धर्मवीरात् पृथग्गणनानौचित्यात्** इति। यथा सत्यं धर्म एव, तथैव दानं दया चेति तुल्यन्यायात् सत्यवीरवत् दानवीर-दयावीरयोः अपि उपादानं पृथक् न सङ्गच्छते। तस्मात् प्राचां प्रकारपरिगणना नोचिता इति।

किञ्च सत्यवीररूपनवीनप्रकाराभ्युपगमेऽपि न निस्तारः इत्याचष्टे जगन्नाथः यत् - एवं पाण्डित्यवीरोऽपि प्रतीयते इति।

**पाण्डित्यवीरः –**

हयग्रीवोपासनालब्धसिद्धिः कश्चन पण्डितः सदसि ब्रूते यत् -

**अपि वक्ति गिरां पतिः स्वयं यदि तासामधिदेवताऽपि वा।**
**अहमस्मि पुरो हयाननस्मरणोल्लङ्घितवाङ्मयाम्बुधिः।।**इति।।

यदि स्वयं बृहस्पतिः शास्त्रार्थविचारे पूर्वपक्षमुपक्षिपतु, अथवा गिराम् अधिदेवता सरस्वती स्वयं शास्त्रार्थविचारे पूर्वपक्षमुपस्थापयतु नाम भगवतः हयग्रीवस्य स्मरणेन उत्तीर्णवाङ्मयाम्बुधिः (हयग्रीवध्यानासादितसकलशास्त्रतत्त्वावगमः) सम्मुखस्थोऽहं (पुरः) तदुत्तरदानाय अग्रे अस्मि। हयग्रीवोपासनालब्धपाण्डित्यसिद्धिरहं साक्षात् बृहस्पतिना सरस्वत्या वा शास्त्रार्थविचारे न मनागपि बिभेमि, किमुत अन्यैः सह इति सारः।

अत्र स्थायिनः उत्साहस्य बृहस्पतिः, सरस्वती च आलम्बनम्, सभा तद्घटकपण्डितमण्डली चेष्टा च उद्दीपनम्, सभास्थसकलविद्वत्तिरस्कारः अनुभावः, पाण्डित्यविषयकः गर्वः व्यभिचारीति वक्तृगतस्य पाण्डित्यवीररसस्य प्रतीतिः भवतीति शेषः।

पाण्डित्यवीरं युद्धवीरे प्रागुक्ते अन्तर्भाव्य आक्षेपपरिहारमाशङ्कते - **ननु चात्र युद्धवीरत्वम्, युद्धत्वस्य वादसाधारणस्य वाच्यत्वादिति चेत्** समादधाति - क्षमावीरे किं ब्रूयाः ? पाण्डित्यवीरस्य युद्धवीरे अन्तर्भावेऽपि क्षमावीररूपः प्रकारः नूतनः अपलपितुमशक्य एवेति प्राचां प्रकारपरिगणनम् असङ्गतमेवेति जगन्नाथस्याऽऽशयः।

**क्षमावीरः** -

कश्चित् क्षमावान् व्याहरति यत् -

**अपि बहलदहनजालं मूर्ध्नि रिपुर्मे निरन्तरं धमतु।**
**पातयतु वाऽसिधारामहमणुमात्रं न किञ्चिदाभाषे।।**इति।।

शत्रुः मम शिरसि भूयिष्ठम् अग्निजालं निरन्तरं धमतु, (वायुसंयोगेन वर्धयतु) असिधारां वा पातयतु, तथापि अहं तितिक्षुः, अणुमात्रमपि (ईषदपि) न किञ्चिदाभाषे। अत्र उत्साहस्य रिपुकृतापकारः आलम्बनम्, तटस्थप्रशंसाद्युद्दीपनम्, मौनमनुभावः, धृतिः व्यभिचारिभावः। क्षमावीरवत् बलवीररूपप्रकारस्यापि सम्भवात् परिगणनमयुक्तमेव इत्याह - बलवीरे वा किं समादध्याः ?

**बलवीरः -**

वैनतेयः वासवं ब्रवीति यत् -

**परिहरतु धरां फणिप्रवीरः सुखमयतां कमठोऽपि तां विहाय।**

**अहमिह पुरुहूत ! पक्षकोणे निखिलमिदं जगदण्डकं वहामि।।** इति।।

हे महेन्द्र ! सर्पश्रेष्ठः शेषः शिरसि धृतां वसुधां परित्यजतु, कूर्मोऽपि तां पृष्ठस्थां पृथ्वीं विहाय सुखं प्राप्नोतु। अहं वैनतेयः अत्र पक्षस्य कोणे (न तु समस्तपक्षे) इदं प्रत्यक्षगोचरं निखिलं ब्रह्माण्डमण्डलम् अनायासेन वहामि। अत्र शेषः शिरसा, कमठः पृष्ठेन कथञ्चन पृथ्वीं बिभर्ति, अहं पक्षकोणेनैव अखण्डब्रह्माण्डमण्डलं हेलया वोढुमलमिति शेषकमठापेक्षया आत्मनः व्यतिरेकः प्रतीयते।

उक्तोदाहरणत्रये वीररसध्वनेरभावमाशङ्कते - **ननु अपि वक्ति, परिहरतु धराम्** इति पद्यद्वये गर्व एव नोत्साहः। **अपि बहलदहनजालम्** इति मध्यस्थपद्ये तु धृतिरेव ध्वन्यते, अतः भावध्वनय एवैते न रसध्वनय इति चेत् - समादधाति जगन्नाथः यत् - **तर्हि युद्धवीरादिष्वपि गर्वादिध्वनितामेव किं न ब्रूयाः ? रसध्वनिसामान्यमेव वा किं न तद्व्यभिचारिध्वननेन**
**गतार्थयेः ?** इति।

अर्थात् व्यभिचारिप्रतीतेरेव भावध्वनित्वं तेषु उच्यते, तदा दानदयायुद्धवीरेष्वपि गर्वस्य, सत्यवीरे च धृतेः व्यभिचारिभावस्य प्रतीतेः भावध्वनित्वमुच्यताम्, वीररसध्वनेः उच्छेद एव क्रियताम्। अथवा इत्थं सर्वेषु रसध्वनिषु तत्तद्रसव्यभिचारिभावस्य अवश्यं प्रतीतेः सर्वत्र भावध्वनिरेव अङ्गीक्रियताम्, तेनैव रसध्वनिः गतार्थीक्रियताम्, इत्थं सकलरसतन्त्रव्याकुलीभावः स्यात् इति तव मूलच्छेदी पाण्डित्यप्रकर्ष इति समाधानपक्षाशयः।

ननु रसध्वनिषु व्यभिचारिभावापेक्षया स्थायिभावस्य उत्कटा प्रतीतिरिति तद्बलात् रसध्वनिव्यपदेशः, 'ननु **अपि वक्ति, परिहरतु धराम्, अपि बहलदहनजालम्'** इति उक्तोदाहरणेषु तु गर्वादिव्यभिचारिभावस्य उत्कटा प्रतीतिरिति भावध्वनित्वमेव उच्यते चेत्

न, उभयत्र उत्साहस्यैव स्थायिभावस्य उत्कटत्वेन प्रतीयमानत्वात्। किञ्च बलवीराद्युदाहरणेषु उत्साहस्य प्रतीतिः न भवति, दानदयायुद्धवीरोदाहरणेषु तु भवतीति कस्यचिदुक्तिरपि राजाज्ञा इव उपपत्तिविचारवञ्चिता एव, उभयत्र वैषम्याननुभवात्। तस्मात् प्राचीनानां वीररसप्रकारपरिगणनम् असङ्गतमेव। अतः वीररसः एक एव इति जगन्नाथस्य सिद्धान्तः।

**आधारग्रन्थाः -**


1. रसगङ्गाधरः
2. अग्निपुराणम्
3. साहित्यदर्पणः
4. तैत्तिरीयोपनिषत्
5. काव्यप्रकाशः
6. नाट्यशास्त्रम्

# रसविषये आनन्दवर्धन-अभिनवगुप्तयोः मतभेदविचारः

**डा. श्रीनिवासमूर्तिः**
साहित्यविभागः
रा.सं.सं. राजीवगान्धीपरिसरः, श्रृङ्गेरी

सामान्यतया भरतमुनेः रससूत्रव्याख्यानावसरे भट्टलोल्लट - श्रीशङ्कुकभट्टनायकानां व्याख्यानानि पूर्वपक्षरूपेण प्रदर्शय, अभिनवगुप्तस्य व्याख्यानं तावत् सिद्धान्तरूपेण प्रतिपाद्यमानं दृश्यते, सर्वेष्वपि सांप्रतिकालङ्कारशास्त्रग्रन्थेषु किन्तु आनन्दवर्धनेन अङ्गीकृतः रसध्वनिः अभिनवगुण्तेन सिद्धान्तीकृतश्च रसध्वनिः एक एव वा इति विषयः परिशीलनार्हः वर्तते । अतः 'रसविषये आनन्दवर्धनाभिनवगुप्तयोः मतभेदविचारः' इति विषयः यथामति यथाशक्ति चात्र मया संक्षेपेण विचार्यते –

आनन्दवर्धनाचार्यः प्रधानतया वस्तुध्वनिः अलङ्कारध्वनिः , रसध्वनिः इति ध्वनिं त्रिधा अङ्गीकृतवान् । अस्य प्रतिपादनपद्धतिपरिशीलनेन व्यज्यमानं रसादिकं रामादिगतम् इत्येव संदृश्यते ।

" भ्रम धार्मिक विस्रब्धः स........." इति श्लोकः ध्वन्यालोके आनन्दवर्धनेन वस्तुध्वनेः उदाहरणरूपेण प्रदर्शितः । श्लोकस्यास्य श्रोता वाच्यार्थं ज्ञात्वा अनन्तरं द्वितीयं भावञ्च विजानाति । अतः अत्र वस्तुध्वनिः इति नामधेयम् । अर्थात् श्लोकस्यास्य रचयिता कविः अथवा कविना सृष्टं पात्रं न केवलं वाच्यार्थम् अन्यार्थमपि च एतद्वाक्यद्वारा सूचयति इति पठिता जानाति इत्यर्थः ।

**"वीराणां रमते घुसृणारुणे न तथा प्रियास्तनोत्सङ्गे ।**
**दृष्टी रिपुगजकुम्भस्थले यथा बहलसिंधूरे ॥ "**

इत्ययं श्लोकः अलङ्कारध्वनेः उदाहरणतया प्रदत्तः । अत्र वाच्यार्थज्ञानानन्तरं पठिता, स्त्रीकुचकुम्भ-गजकुम्भयोः मध्ये उपमानोपमेयभावः गम्यते इत्यतः उपमाध्वनिः वर्तते इति जानाति इत्यर्थः । अर्थात् कविः उपमां न वाच्यरूपेण किन्तु ध्वनिरूपेण प्रतिपादयति इति पठिता जानातीत्यर्थः । एवमेव रसध्वनिस्थलेऽपि पठिता, वाच्याम् अथवा विभावादिप्रतिपादकान् अर्थान् विज्ञाय पश्चात् तदाधारेण दुष्यन्तस्य शकुन्तलायां रतिः वर्तते इति, अथवा भीमस्य दुर्योधनादीनां विषये क्रोधः विद्यते इति गृह्णाति । वाच्यार्थेन व्यज्यमानाः ते एवेत्यतः ते एव श्रृङ्गाररौद्रादयः इति आनन्दवर्धनस्य अभिप्रायः इति ज्ञातुं शक्यते ।

किन्तु रसः रामादिनिष्ठश्चेत् पठितुः अथवा सामाजिकस्य कथं आनन्दः जायते इति प्रश्नः। वस्तुध्वनेः, अलङ्कारध्वनेश्च ज्ञानेन, अहो! कविः कियत् सुन्दरं विषयमिमं प्रोक्तवान् ! इति पठितुः मनसि कश्चन चमत्कारः जायते । तद्वदेव दुष्यन्तादीनां भावज्ञानेन पाठके अथवा सामाजिके, सहजतया विद्यामानसहृदयत्वात्, इतरध्वन्यमानार्थज्ञानात् जायमानस्य चमत्कारस्य अपेक्षया अथवा आनन्दस्य अपेक्षया अधिकः चमत्कारः अथवा आनन्दः जायते । जागरूकतया परिशीलनेन आनन्दवर्धनस्य अङ्गीकार्यः रसध्वनिः अयमेव इति ज्ञायते । रसः नायकाद्याश्रितः एव अनया दृशा भट्टलोल्लट-श्रीशाङ्कुकयोः अभिप्रायेऽपि अनौचित्यं नास्त्येव ।

आनन्दवर्धनेन प्रतिपादितम् एतत् रसध्वनिस्वरूपम् अभिनवगुप्तः स्वसिद्धान्तानुगुणम् अनुक्त्वा परिवर्तयति स्म ।

ध्वन्यालोकलोचन-अभिनवभारत्योः अभिनवगुप्तेन प्रतिपादितं सिद्धान्तं पण्डितराजजगन्नाथः सुस्पष्टं विशदीकृतवान् । एकस्मिन् सुंदरे काव्ये समर्पितान् विभावानुभावव्यभिचारिभावान् सहृदयः वैयक्तिकसंबंधेन अगणयित्वा सामान्यरूपेण गृह्णाति, तत्र तस्य सहृदयत्वं, भवनाबलं च कारणम् । अस्यैव साधारणीकरणम् इति व्यवहारः भवति । स च व्यञ्जनाव्यापारः सहृदये सहजतया विद्यमानस्य आनन्दांशस्य अज्ञानावरणं निवारयति । तदा सहृदये वैयक्तिकभेदः ज्ञानपरिच्छिन्नत्वञ्च अपाक्रियते । अर्थात् तत्समये सहृदयः स्वस्य स्वस्य परिमितज्ञानभावं विस्मरति ।तदा स्वस्मिन् विद्यामानैः रत्यादिभावैः सह सम्मिलितं स्वरूपानन्दम् अनुभवति। सः अनुभव एव रसः । अस्मिन् संदर्भे जगन्नाथः एकम् उदाहरणं प्रादर्शयत् ।

कुम्भेन आवृतः दीपः प्रकाशमानः भूत्वा निगूहितः भवति । कुम्भस्य अपाकरणेन स्वयं प्रकाशमानो भूत्वा परितः विद्यमानानि वस्तूनि अपि प्रकाशयति । एवमेव विभावादिभिः व्यञ्जनाव्यापारः यदा अज्ञानावरणम् अपाकरोति तदा आनन्दस्वरूपं चैतन्यं प्रकाशमानं सत् पार्श्वे स्थितान् विभावदिसहितरत्यादीन् अपि प्रकाशयति । अत्र व्यञ्जनाव्यापारेण जायमाना व्यक्तिः अज्ञाननिवारणेन आत्मचैतन्यभानम् । संक्षिप्ततया अयमेव अभिनवगुप्तस्य सिद्धन्तः । अभिनवगुप्तस्यास्य सिद्धान्तस्य आनन्दवर्धनस्य सिहद्धान्तस्य च मध्ये महान् भेदो वर्तते ।

’कारणान्यथ कार्याणि सहकारीणि यानि च
रत्यादेः स्थायिनो लोके तानि चेन्नाट्यकाव्ययोः

विभावाश्चनुभावाश्च कथ्यन्ते व्यभिचारिणः ।' इति

कथनानुसारं लोके कार्यकारणसहकारीणि एव किल काव्ये विभावानुभावव्यभिचारिपदैः व्यवह्रियन्ते । लौकिकजीवनेऽपि द्वयोः स्त्रीपुरुषयोः केनचित् प्रवर्तनविशेषेण तयोः परस्परम् अनुरागः वर्तते इति द्रष्टारः जानन्ति ॥ कावपि द्वौ एकस्योपरि एकः परस्परम् उच्चैः गर्जतश्चेत् तयोः क्रोधः वर्तते इति ज्ञायते । तथैव काव्यनाटकादिगतविभावादिज्ञानवान् जनः, तत्र चित्रितानां पात्राणां मध्ये अनुरागः वा क्रोधो वा अस्तीति जानाति । पठितुः अथवा प्रेक्षकस्य प्रथमं जायमानं ज्ञानम् एतदेव । अत्र विभावादिभिः व्यज्यमानाः ते एव अनुरागक्रोधादयः कुत्र सन्तीति भाव्यते ?! तत्रत्येषु वर्ण्यमानेषु पात्रेषु । अयमेव आनन्दवर्धनेन प्रोक्तः रसध्वनिः ।

वस्तुध्वनिस्थले अलंकारध्वनिस्थले च यथा ध्वन्यमानविषयज्ञानानन्तरं कश्चन चमत्कारः आनन्दो वा सहृदयस्य मनसि जायते तथैव तत्रत्य पात्रगतभावज्ञानोदयानन्तरं तस्य मनसि कश्चन आनन्दः जायते इति आनन्दवर्धनस्य अभिप्रायः । किन्तु तेन अत्र विवरणं न दत्तम् ।

रत्यादिप्रतीतेः समनन्तरं सहृदयस्य मनसि जायमानं विकारं विशदीकृतवान् अभिनवगुप्तः । भट्टनायकेन प्रोक्तां साधरणीकरणप्रक्रियां स्वीकृत्य तद्द्वारा सहृदये जायमानाम् अनुभूतिं रसपदेन प्रोक्तवान् । अस्य मतानुसारं परिशील्यते चेत् वस्तुध्वनिविषये अलङ्कारध्वनिविषये च प्रोक्तायाः व्यञ्जनायाः, रसविषये प्रोक्तायाः च व्यञ्जनायाः मध्ये साम्यमेव न दृश्यते । अत्र व्यञ्जनाव्यापारेण जायमानायाः व्यक्तेः अर्थः – अज्ञानावरणच्छेदेन चैतन्यप्रकाशः – इति ।

आनन्दवर्धनस्य मतानुसारं व्यञ्जनाव्यापारः रामादिनिष्ठरसव्यञ्जनपर्यन्तं भवति । अभिनवगुप्तस्य मतानुसारं व्यञ्जनाव्यापारः रामादिनिष्ठरसव्यञ्जनपर्यन्तं भवति, अभिनवगुण्तस्य मतानुसारं सहृदये जायमानानुभूतिपर्यन्तम् अटति ।

एतद्भेदं विज्ञाय विद्यानाथेन कुमारस्वामिना च लौकिकरसः, अलौकिकरसः इति रसस्य द्वैविध्यम् अङ्गीकृतम् । आनन्दवर्धनेन अङ्गीकृतः व्यञ्जनावृत्तिगम्यः रामादिनिष्ठः रसः लौकिकरसः इति, अभिनवगुप्तेन प्रतिपादितः सामाजिकनिष्ठः रसः अलौकिकरसः इति ताभ्यां विशदीकृतम् ।

आनन्दवर्धनकालपर्यन्तं रसो नाम रामादिनिष्ठः व्यज्यमानरस एव । भट्टनायक-अभिनवगुप्ताभ्यां सामाजिकनिष्ठः रसः प्रतिपादितः । अत्र एतद्रसद्वयविषये भ्रान्तिं

निवारयितुं पण्डितराजः, व्यज्यमानरसं स्थायिभावपदेन प्रोक्त्वा, रस्यमानरसं तावत् रसशब्देन सूचयति, यथा-

"वाचो माङ्गलिकीः प्रयाणसमये..." इत्यादिश्लोकव्याख्यानसंदर्भे – 'अत्राप्यालम्बनस्य नायकस्य निश्वासाश्रुपातादेः अनुभावस्य विषादचिन्तावेगादेश्च व्यभिचारिणः संयोगात् रतिरभिव्यज्यमाना वियोगकालावच्छिन्नत्वात् विप्रलम्भरसपदव्यपदेशहेतुः' इति । रसविषये रसप्रधानकाव्यादिविषये च सर्वत्र जगन्नाथेन एवमेव व्याख्यातम् । किन्तु भेदममुम् अभिनवगुप्तः न जानातीति न, तेन ध्वन्यालोके मङ्गलश्लोकस्य व्याख्यानावसरे "नित्योद्योगिनश्च भगवतः असंमोहाध्यवसाययोगित्वेन उत्साहप्रतीतेः वीररसो ध्वन्यते" इत्युक्तत्वात् ।

# रससूत्रव्याख्याविचारः

**विद्वान् श्रीकर वि.**
साहित्यविभागः
रा.सं.सं. राजीवगान्धीपरिसरः, श्रृङ्गेरी

मुनिना भरतेन रससूत्रं लिखितम् "विभावानुभावव्यभिचारिसंयोगाद् रसनिष्पत्तिः" इति । अत्र निष्पत्तिसंयोगशब्दौ गृहीत्वा चतुर्षु व्याख्यातृषु मतभेदो दृश्यते । प्रथममतमस्ति भट्टलोल्लटस्य 'उत्पत्तिवादः' नाम्ना प्रसिध्दम् । द्वितीयमतं श्रीशङ्कुकस्य अनुमितिवादः । तृतीयमतं भट्टनायकस्य भुक्तिवादः। चतुर्थं व्याख्यानं सिद्धान्तभूतम् अभिनवगुप्तस्य 'अभिव्यक्तिवादः' अभिधानेन प्रसिद्धमस्ति । मम्मटस्य काव्यप्रकाशे रसोत्पत्तिविषये चत्वारि मतानि किन्तु रसगङ्गाधरे एकादशमतानि उल्लिखितानि ।

काव्यप्रकाशकारो मम्मटाचार्यो भट्टलोल्लटस्य मतमित्थं प्रस्तौति- *विभावैर्ललनोद्यानादिभिरालम्बनोद्दीपनकारणैः रत्यादिको भावो जनितः,अनुभावैः कटाक्षभुजक्षेपप्रभृतिभिः कार्यैः प्रतीतियोग्यः कृतः व्यभिचारिभिर्निर्वेदादिभिः सहकारिभिरुपचितो मुख्यया वृत्यारामादावनुकार्ये तद्रूपसंधान्नर्तकेऽपि प्रतीयमानो रसः इति भट्टलोल्लटप्रभृतयः ।*

रामादिपात्रादिगता रतिः नटे प्रतीयमानोपि सामाजिकानां हृदयेषु रसपदवीं धारयति । भट्टलोल्लटादीनां मते स्थायिभावैः सह विभावानां संयोगः अर्थात् उत्पद्योत्पादकभावसम्बन्धो अनुभावैः सह,गम्यगमकभावसम्बन्धो व्यभिचारिभावैः सह च पोष्यपोषकभावसम्बन्धोऽभिप्रेतः । एवमेव निष्पत्ति इत्यस्यापि त्रयोऽर्थो अभिप्रेताः । स्थायिभावानां विभावैः सह संयोगो अर्थात् उत्पाद्योत्पादकभावसम्बन्धे सति रसस्य निष्पत्ति अर्थात् उत्पत्तिर्भवति ।अनुभावैः सह संयोगो अर्थात् गम्यगमकभवसम्बन्धे सति रसस्य निष्पत्तिः अर्थात् प्रतीतिर्भवति । व्यभिचारिभावैः सह संयोग अर्थात् पोष्यपोषकभावसम्बन्धे सति रसस्य निष्पत्तिरर्थात् पुष्टिर्भवति ।

अस्मिन् मते रसो मुख्यरूपेण रामादौ अनुकार्ये तिष्ठति । रामादिरूपतानुसंधानबलाच्च नटेऽपि गौणरूपेण तस्य स्थितिर्भवति । सामाजिकेषु रसास्वादः कथं भवतीत्यस्मिन् विषये किमपि न कथितम् । मतमिदं मीमांसाशास्त्रमनुसरति ।अस्मिन् मते **दोषाः**-विभावैः रत्यादिको भावः उत्पद्यते इति

ISSN 2249-538X

लोल्लटमतम् ।तर्हि पूर्वं तस्याभावप्रसङ्गः स्यात् ।पूर्वमविद्यमानस्य आविर्भावः एव उत्पत्तिरित्युच्यते ।यदि रत्यादिः पूर्वं नास्ति तर्हि तस्य स्थायित्वमपि न भविष्यति ।परिपुष्टस्य एव रसत्वं यदि स्यात् तर्हि भरतेन हास्यस्य षड् भेदाः ये कथिताः ते न संभवन्ति ।अपि च अनुकार्याणां रामसीतादीनामविद्यमानत्वात् तेषु वर्तमानरसस्य अभिनयबलात् उत्पत्तिर्भवितुं न शक्नोति अतो अनिकर्तरि नटेऽपि च तस्यारोपो न सम्भवति ।

रसगङ्गाधरकारः पण्डितराजजगन्नाथः भट्टलोल्लटमतम् इत्थं प्रतिपादयति - "मुख्यतया दुष्यन्तादिगत एव रसो रत्यादिः कमनीयविभावाद्यभिनयप्रदर्शनकोविदे दुष्यन्ताद्यनुकर्तरि नटे समारोप्य, साक्षात्क्रियते" इति ।विभावैर्जनितः, अनुभावैः प्रकाशितः , व्यभिचारिभावैश्च पोषितश्च शकुन्तलविषयको दुष्यन्तादावनुकार्ये वास्तविकः अनुकर्तरि नटे च चारोपितःसहृदयैः पश्चाद् भावनारूपदोषजन्य आत्मनि साक्षात्क्रियमाणो रत्यादि स्थायी रसः इत्यर्थः ।

श्रीशङ्कुकेन अनुमितिवादे भरतनाट्यसूत्रस्य संयोगनिष्पत्तिपदयोर्व्याख्या इत्थं कृता- **संयोगाद्-** अनुमाप्यानुमापकभावसंबन्धात् , **निष्पत्तिः-** अनुमितिः ।रङ्गमञ्चे अभिनयं सम्पादयन् कुशलोऽभिनेता सामाजिकैः रामोऽयमिति कल्प्यते ।नटे या रामबुद्धिः सामाजिकेषु भवति सा सम्यक्-मिथ्या-संशय-सादृश्य प्रतीतिभ्यो भिन्ना एव भवति ।इयं प्रतीतिः वस्तुतः चित्रतुरगन्यायेन चित्रतुरगप्रतीतिः विद्यते ।चित्रे तुरगमवलोक्य यथा तुरगे असत्यपि तुरगोऽयमिति ज्ञानं विधीयते ,तथैव अभिनयकाले अविद्यमानेऽपि रामे अभिनेतुः अभिनयकौशलात् तस्मिन् सामाजिकस्य रामप्रतीतिर्भवति ।एवं सामाजिकेन यदाऽभिनेता एव रामरूपेण कल्प्यते, तदा शिक्षाभ्यासकौशलसामर्थ्येन अभिनेतुः विभावानुभावव्यभिचारिभावाः कृत्रिमा अपि न कृत्रिमाः कल्प्यन्ते । तद्वारेणैव तेन अभिनेतरि रत्यादिस्थायिभावा अनुमीयन्ते ।

कृत्रिमालम्बनरूपरामसीतादिषु नटैः शिक्षाभ्यासैः कृत्रिमरूपेण प्रकाशितस्मितकटाक्षादिभिः "अयं रामः सीताविषयकरतिमान्, विलक्षणस्मितकटाक्षादिमत्वात्" अनुमानेन रसप्रतिर्भवति ।

**दोषः**- अनुमानेन जायमाना रसानुभूतिः परोक्षात्मिका वर्तते । रसास्वादः प्रत्यक्षतया भवति । एषाअनुमितिश्च सम्पूर्णरूपेण कृत्रिमाऽपि भवति । अपि च

सामाजिकेषु रससस्य साक्षात्कारः वक्तव्यः आसीत् । अतः रसस्वादनस्य व्याख्याने श्रीशङ्कुकस्य अनुमितिवादोऽपि सफलो नास्ति ।

साहित्यदर्पणकारः अनुकार्ये रसस्य सद्भावं इत्थं निराकरोति यथा-

**पारिमित्याल्लौकिकत्वात्सान्तरायतया तथा ।**
**अनुकार्यस्य रत्यादेरुद्बोधो न रसो भवेत् ॥ सा द ३.१७ ॥**

रसः अपरिमितः अलौकिको निरन्तरायश्चेति न अनुकार्यगत इत्यर्थः । पुनः अनुकार्यगतोऽपि न इत्यपि वदति यथा-

**शिक्षाभ्यासादिमात्रेण राघवादेः स्वरूपताम् ।**
**दर्शयन्नर्त्तको नैव रसस्यास्वादको भवेत् ॥ सा द ३.१८ ॥** इति

तार्किक श्रीशङ्कुकमतं रसगङ्गाधरे एवं प्रकारेण वर्णितमस्ति यथा-

'दुष्यन्तादिगतो रत्यादिर्नटे पक्षे दुष्यन्तत्वेन गृहीते, विभावादिभिः कृत्त्रिमैरप्यकृत्रिमतया गृहीतैः भिन्ने विषयेऽनुमितिसामग्र्या बलवत्वादनुमीयमानो रसः'। इति

"दुष्यन्तोऽयं शकुन्तलविषयकरतिमान्, तद्विषयककटाक्षभुजविक्षेपादिचेष्टावत्त्वात्" इत्यनुमित्याकारः । अनुमेयवस्तुसौन्दर्यबलात् अस्यानुमानस्य इतरानुमानेभ्यो रमणीयत्वं भवति ।

**भट्टनायकस्य भुक्तिवादः**

भरतरससूत्रस्य तृतीयो व्याख्याकारोऽस्ति भट्टनायकः । भट्टनायकस्य मतमिदं भुक्तिवादनाम्ना अस्ति प्रसिद्धं साहित्यशास्त्रे । **संयोगाद्** शब्दस्य अर्थो भवति भोज्यभोजकभावसम्बन्धात्, **निष्पत्ति**शब्दस्यार्थो भवति भुक्तिः । भट्टनायकेन भुक्तिवादस्य स्थापनाय अभिधाव्यापारातिरिक्तं भावकत्वं भोजकत्वञ्चेति द्वौ नवीनौ व्यापारौ स्वीकृतौ । तत्र प्रथमम् अभिधाव्यापारेण शब्दार्थयोः ज्ञानं भवति द्वितीयेन भावकत्वव्यापारेण विभावदायः स्थायिभावाश्च साधारणीकृताः सन्तो बन्धमुक्ता उपयोग्याश्च भवन्ति । तदनन्तरं भोजकत्वव्यापारेण रसस्य भोगः भवति ।

साधारणीकरणप्रक्रियां कविराजविश्वनाथोऽपि इत्थं प्रतिपादयति । यथा-

**परस्य न परस्येति ममेति न ममेति च ।**
**तदास्वादे विभावादेः परिच्छेदो न विद्यते ॥ सा.द ३.१२॥**

**दोषः-** भट्टनायकेन भावकत्वभोजकत्वाख्यं व्यापारद्वयं नूतनतया स्वीकृतमस्तीति प्रमुखो दोषः । एतद्विनाऽपि रसं व्याख्यातुं शक्यते इति अभिनवगुप्तः ।

**अभिनवगुप्तस्य अभिव्यक्तिवादः**

अभिनवगुप्तपादाचार्यस्य मतम् अभिव्यक्तिवादनाम्ना प्रसिद्धमस्ति । अभिनवगुप्तपादाचार्यमते व्यङ्ग्यो रसः, विभावादयो व्यञ्जकाः व्यङ्ग्यव्यञ्जकभावलक्षणश्च सम्बन्धः । स च सम्बन्धः रससूत्रे संयोगशब्देनोक्तः,ततो रसस्य निष्पत्तिरभिव्यक्तिर्भवति । अभिव्यक्तिवादानुसारेण व्यञ्जनाव्यापारेणैव साधारणीकरणमपि संपाद्यते । मतेऽस्मिन् सामाजिकानां हृदयेषु वासनरूपेण स्थितो रत्यादिस्थायिभावो विभावादिभिः व्यङ्ग्यव्यञ्जकभावेन अभिव्यक्तो भवति ।

काव्येषु प्रयुक्तानां विभावादीनां साधारणीकरणं व्यञ्जनाव्यापारेण जायते । तेषां स्वकीयत्वपरकीयत्वभावाः तिरोहिता भवन्ति । तदा तेषु सामान्यांशो अवशिष्यते । सम्पन्ने साधारणीकरणव्यापारे प्रमातुः (सामाजिकस्य) चित्तसीमानो बन्धनरहिता भूत्वा चित्तवृत्तयोऽपरिमिता भवन्ति । अतो रत्यादीनामपि साधारणीकरणं भवति । साधारणीकरणप्रक्रिया इयं सहृदयैरनुभूयते । एवञ्चाभिव्यज्यमानः स्थायिभावः एव रसपदवाच्यो भवति ।

विभावादिविनाशेऽपि रसस्य संभवप्रसङ्गात् रसो न कार्यः । अयं विभावादिजीवितावधिर्भवति । विभावादेः कारणात् पूर्वं रसस्य असंभवात् अयं ज्ञाप्योऽपि नास्ति ।चर्वणानिष्पत्या रसो निष्पद्यत इति रसः कार्योऽपि भवितुं शक्यते ।लोके प्रसिद्धेभ्यः त्रिविधेभ्यः अपि ज्ञानेभ्यः विलक्षणोऽयं लोकोत्तरसंवेदनगोचर इति ज्ञाप्योऽपि भवितुं शक्यते । रसास्वादे विभावादिपरामर्षप्रधानत्वात् रसग्राहकं न निर्विकल्पकं ज्ञानम् । चर्व्यमाणस्य अलौकिकानन्दमयस्य अस्य स्वसंवेदनसिद्धत्वात् न सविकल्पकम् । उभयाभावस्वरूपत्वादिदम् उभयात्मकमपि वक्तुं शक्यत इति रसस्य अलौकिकत्वं निर्विवादसिद्धम् ।

**परिशीलितग्रन्थसूची**

१) काव्यप्रकाशः,मम्मटः,चौखम्बाप्रकाशन

२) रसगङ्गाधरः,पण्डितराजजगन्नाथः,चौखम्बाविद्याभवनप्रकाशन

३) साहित्यदर्पणम्, कविराजविश्वनाथः, चौखम्बाप्रकाशन

# चतुर्भिर्व्यवहारोऽत्र सौरचान्द्रार्क्षसावनैः

**डा. गोपालकृष्ण हेगडे**

निदेशकः, वेदसंस्कृत अकाडेमि (रि.)

हेगडे, कुमट

विदन्त्येव भवन्तः यज्ज्योतिषशास्त्रं सिद्धान्तसंहिताहोरेति स्कन्धत्रयात्मकं शोभते । एतेषु त्रिषु स्कन्धेषु दिग्देशकालानां भूनक्षत्रग्रहादीनां च ज्ञानं सोत्तराः प्रश्नाश्च यत्रोपवर्ण्यन्ते तत् सिद्धान्तज्योतिषमिति कथ्यते शास्त्रविद्भिः । प्रायशः सर्वे सिद्धान्तग्रन्थाः सोत्तरप्रश्नरूपेण वर्तन्ते । तेषु चतुर्दशाध्यायात्मकः सूर्यसिद्धान्तग्रन्थः अत्यन्तप्राचीनतमः । अस्यान्तिमः अध्यायः मानाध्यायरूपेण ख्यातिं प्राप्तः ।

ग्रन्थेऽस्मिन् मयासुरसूर्यांशपुरुषयोः संवादरूपेण विषयाः प्रस्तुताः । मयासुरः सूर्यांशपुरुषं प्रति मानानि कति, किं च तैः? इत्यादिरूपेण प्रश्नं करोति । सूर्यांशपुरुषः तस्य प्रश्नस्योत्तरं ददाति यथा -

**ब्राह्मं दैवं तथा पित्र्यं प्राजापत्यं च गौरवम् ।**
**सौरं च सावनं चान्द्रं आर्क्षं मानानि वै नव ॥**[१]

लक्षण-प्रमाणाभ्यां हि वस्तुसिद्धिः इति प्राज्ञाः प्रतिपादयन्ति । तदनुरोधेन इदानीं नवविधमानानां स्थूलरूपेण अर्थं परिशीलयामः ।

१. **ब्राह्मम्** - ब्रहणः इदं ब्राह्मं, ब्रह्मसम्बन्धि इत्यर्थः । ब्रह्मणो मानं ब्राह्मम् ।

२. **दैवम्** - दिवि भवं दैवम्, देवसम्बन्धि इत्यर्थः । देवानां मानं दैवम् ।

३. **पित्र्यम्** - पितृणाम् इदं पित्र्यम्, पितृसम्बन्धि इत्यर्थः । पितृणां मानम् ।

४. **प्राजापत्यम्** - प्रजापतेरिदम् प्राजापत्यम्, मनुसम्बन्धि इत्यर्थः । मन्वादीनां मानम् ।

५. **गौरवम्** - गुरोरिदं गौरवम्, गुरुसम्बन्धि इत्यर्थः । बार्हस्पत्यमानम् ।

६. **सौरम्** - सूर्यस्य इदं सौरम्, रविसम्बन्धि इत्यर्थः । सौरमानम् ।

७. **सावनम्** - भूसम्बन्धि । भानोरुदयादि वासरगणात्मकम् । इनोदयद्वयान्तररूपम् ।

८.**चान्द्रम्** - चन्द्रस्य इदम् । चन्द्रसम्बन्धि । तिथिभोगरूपम् । शुक्लप्रतिपदादितिथिसमूहः ।

९. **आर्क्षम्** - ऋक्षसम्बन्धि । ऋक्षं नाम नक्षत्रमिति । नक्षत्रोदयद्वयान्तररूपम् । ज्योतिश्चक्रभ्रमणादि नक्षत्रमानम् ।

---

[१] सूर्यसिद्धान्तः – 14अ. 1श्लो.

ISSN 2249-538X

एवं नवविधमानानाम् उद्दिश्य स्थूलरूपेण लक्षणं प्रतिपादितम् । परन्तु **चतुर्भिर्व्यवहारोऽत्र सौरचान्द्रार्क्षसावनैः** इत्युक्तत्वात् मानवलोके कार्यसञ्चालनं सौरचान्द्रनाक्षत्रसावनैः चतुर्भिः मानैश्चलति । अतः तानुद्दिश्य विशेषेण चिन्त्यते ।

१. **सौरमानम् -** रवेः चलनात् उतपत्स्यमानं मानं सौरमानं भवति - **एकराशौ रविर्यावत् कालं मासः स भास्करः** इत्युक्तत्वात् । **सङ्क्रान्त्या सौर उच्यते** इति सूर्यसिद्धान्तवाक्यम् । ग्रहकेन्द्रबिन्दोः सकाशात् राशिप्रवेशकालस्यैव सङ्क्रान्तिरिति नामधेयम् । इयं च सङ्क्रान्तिः सर्वेषामपि ग्रहाणां भवति । अत्र सङ्क्रान्तिशब्दात् सूर्यसङ्क्रान्तेरेव ग्रहणं भवति । अतः सूर्यकेन्द्रबिन्दोः प्रथमराशिप्रवेशकालात् अन्यराशिप्रवेशकालं यावत् एकः सौरमासः । यावता कालेन सूर्यराशिगतिः परिमीयते सः सौरः मासः । तथा तस्य त्रिंशत्तमो भागः सौरं दिनम् । यतः प्रतिराशौ त्रिंशदंशाः भवन्ति ।

**मासैः द्वादशभिर्वर्षम्** इत्यतः तादृशैः द्वादशभिः मासैः एकं सौरवर्षं भवति । मेषराशौ सूर्यस्य सञ्चलनकालं मेषमासः इति, वृषभे वृषभमासः, मिथुने मिथुनमासः, कर्के कर्कमासः, सिंहे सिंहमासः, कन्यायां कन्यामासः, तुलायां तुलामासः, वृश्चिके वृश्चिकमासः, धनुषि धनुर्मासः, मकरे मकरमासः, कुम्भे कुम्भमासः, मीने मीनमासः इति पृथक् पृथक् नाम्ना व्यवहारः अद्यापि दृश्यते ।

इदानीं सौरमानेन व्यवहारे किं किं ग्राह्यम् इति निरूप्यते -

**सौरेण द्युनिशोर्मानं षडशीतिमुखानि च ।**
**अयनं विषुवच्चैव सङ्क्रान्तेः पुण्यकालता ॥**[१]

दिनरात्र्योः मानं, षडशीतिमुखानि, याम्यं सौम्यं च अयनद्वयं, सायनमेषतुलादिमानं, सङ्क्रान्तेः पुण्यकालता च सर्वमेतत् सौरेण मानेन ग्राह्यम् इत्यर्थः । अत्र षडशीतिमुखं, अयनद्वयं, विषुवद्वयं च सङ्क्रान्तेः विशेषनामधेयम् इत्यवगन्तव्यम् ।

तत्र प्रथमं षडशीतिमुखस्य विवरणम् इत्थं प्रतिपादितं सिद्धान्तग्रन्थे । यथा -

**तुलादिषडशीत्यह्नां षडशीतिमुखं क्रमात् ।**
**तच्चतुष्टयमेव स्यात् द्विस्वभावेषु राशिषु ॥**
**षड्विंशे धनुषो भागे द्वाविंशेऽनिमिषस्य च ।**
**मिथुनाष्टादशे भागे कन्यायास्तु चतुर्दशे ॥**[२]

---

[१] सूर्यसिद्धान्तः – 14अ. 3श्लो.

[२] सूर्यसिद्धान्तः – 14अ. 4-5श्लो.

ISSN 2249-538X 

षडधिकाः अशीतिः षडशीतिः । शब्दार्थकौस्तुभे **धनुर्मिथुनकन्यासु मीने च षडशीतयः** इत्यस्ति । मिथुन-कन्या-धनु-मीनराशिषु रवेः प्रवेशकालस्यैव षडशीतिमुखम् इति व्यवहारः । अर्थात् सङ्क्रान्तिविशेषनामधेयम् इति सिध्यति । तद्यथा -
तुलासङ्क्रमणतः प्रत्येकस्मात् षडशीतिदिवसात् क्रमात् एकैकं षडशीतिमुखं भवति । तच्च चतुर्षु द्विस्वभावेषु धनुर्मीनमिथुनकन्याख्येषु राशिषु चतुष्टयं भवति ।

१) तुलायाः त्रिंशदंशः, वृश्चिकस्य त्रिंशदंशः, धनुषः षड्विंशोंऽशः, आहत्य षडशीत्यंशाः भवन्ति । एतत् प्रथमं षडशीतिमुखं भवति ।

२) धनुषः चतुरंशः, मकरस्य त्रिंशदंशः, कुम्भस्य त्रिंशदंशः, मीनस्य द्वाविंशदंशः - आहत्य षडशीत्यंशाः भवन्ति । एतत् द्वितीयं षडशीतिमुखं भवति ।

३) मीनस्य अष्टांशः, मेषस्य त्रिंशदंशः, वृषभस्य त्रिंशदंशः, मिथुनस्य अष्टादशोंऽशः - आहत्य षडशीत्यंशाः भवन्ति । एतत् तृतीयं षडशीतिमुखं भवति ।

४) मिथुनस्य द्वादशांशः, कर्कस्य त्रिंशदंशः, सिंहस्य त्रिंशदंशः, कन्यायाः चतुर्दशोंऽशः - आहत्य षडशीत्यंशाः भवन्ति । एतत् चतुर्थं षडशीतिमुखं भवति ।

अत्र षडशीतिमुखस्य समाप्तिः धनुर्मीनमिथुनकन्याख्येषु राशिषु भवति इति हेतोः एते धनुर्मीनमिथुनकन्याख्याः राशयः द्विस्वभावराशयः इति कथिताः दृश्यन्ते फलितज्योतिषे । एवं द्वादशराशिमध्ये धनुर्मीनमिथुनकन्याराशिचतुष्के क्रमेण १६, २२, १८, १४ अंशैः षडशीतिमुखचतुष्टयं भवति । अतः चतुर्षु षडशीतिमुखेषु (४ x ८६ = ३४४) चतुश्चत्वारिंशदुत्तरत्रिशतानि सौरदिनानि भवन्ति । षष्ठ्युत्तरशतत्रये चतुश्चत्वारिंशदुत्तरत्रिशतं ऊनीक्रियते तदा एकस्मिन् सौरवर्षे षोडशसौरदिनानि अवशिष्यन्ते । तान्येव कन्यायाः षोडशांशाः सौराः अवशिष्यन्ते । तेषां सौरदिनानां माहात्म्यं उपवर्णयति । यथा -

**ततः शेषानि कन्यायाः यान्यहानि तु षोडश ।**
**क्रतुभिस्तानि तुल्यानि पितॄणां दत्तमक्षयम् ॥**[1]

कन्याराशेः चतुर्दशदिवसानन्तरं यानि दिनानि वर्तन्ते तानि षोडशदिनानि यज्ञतुल्यफलदानि भवन्ति । तेषु षोडशदिनेषु पितॄणां कृते यत् श्राद्धतर्पणादिकं दत्तं तत् अमृततुल्यम्, अनश्वरम्, अनन्तफलदञ्च भवति ।

[1] सूर्यसिद्धान्तः – 14अ. 6श्लो.

अद्यतने काले पूर्णिमान्तमासगणनाक्रमात् आश्विनकृष्णपक्षे, अमान्तमासगणनाक्रमात् भाद्रपदकृष्णपक्षे एतानि षोडशदिनानि भवन्ति । चान्द्रमानानुसारेण अस्य **पितृपक्षः** इति कथ्यते ।

इदानीं श्लोकघटितस्य अयनपदस्य, विषुवत्पदस्य च विवरणं क्रियते । यथा -

**भचक्रनाभौ विषुवद् द्वितयं समसूत्रगम् ।**
**अयनद्वितयं चैव चतस्रः प्रथितास्तु ताः ॥**
**तदन्तरेषु सङ्क्रान्तिद्वितयं द्वितयं पुनः ।**
**नैरन्तर्यात्तु सङ्क्रान्तेः ज्ञेयं विष्णुपदीद्वयम् ॥** [1]

भचक्रस्य दक्षिणोत्तरकीलरूपौ यौ दक्षिणोत्तरध्रुवौ ताभ्यां तुल्यान्तरितौ नाडीक्रान्तिवृत्तयोः सम्पातौ विषुवसंज्ञौ भवतः । तच्च विषुवद्वयं समसूत्रगं एकव्यासरेखासङ्गतं भवति । गोलकेन्द्रात् पूर्वसम्पातरूपमेषादि गतं प्रथमविषुवं भवति । परसम्पातरूपतुलादिगतं द्वितीयं विषुवं भवति । एवम् अयनद्वितयं च समसूत्रगम् इति सिद्धम् । अर्थात् विषुवद्वयचिह्नात् त्रिभान्तरे ध्रुवद्वयसंलग्नवृत्तं क्रान्तिवृत्ते यत्र यत्र लग्नं भवति तदयनद्वयम् । तदपि एकव्याससूत्रगतं भवति । तत्र प्रथमं कर्कादिगतं, द्वितीयं मकरादिगतम् इति ज्ञेयम् । तथा च विषुवद्वय-अयनद्वयभेदेन ताः चतस्रः सङ्क्रान्तयः लोके प्रसिद्धाः सन्ति । **मेषतुले विषुवाख्ये । कर्कमकरौ अयनौ** इति । एकैकविषुवायनमध्ये सङ्क्रान्तिद्वितयं द्वितयं भवति । यथा - मेषाख्यविषुव-कर्काख्य-अयनयोर्मध्ये वृषमिथुनसङ्क्रान्ती भवतः । कर्कायन-तुलाविषुवयोर्मध्ये सिंहकन्यासङ्क्रान्ती भवतः । तुलाविषुव-मकरसङ्क्रान्त्योर्मध्ये वृश्चिकधनुसङ्क्रान्ती भवतः । मकरायन-मेषविषुवयोर्मध्ये कुम्भमीनसङ्क्रान्ती भवतः । एवं विषुव-अयनसङ्क्रान्त्योर्मध्ये यत् सङ्क्रान्तिद्वितयं भवति तत्र प्रथमसङ्क्रान्तेः **विष्णुपदीसङ्क्रान्तिः** इति व्यवहारः शास्त्रे दृश्यते । अर्थात् विषुवद्वयानन्तरं विष्णुपदीद्वयम् । अयनद्वयानन्तरं विष्णुपदीद्वयम् । एवं वृष-सिंह-वृश्चिक-कुम्भाः विष्णुपदीसंज्ञकाः भवन्ति ।

तथा च इदं सिद्धं यत् सर्वे स्थिरराशयः वृषभ-सिंह-वृश्चिक-कुम्भाः (२-५-८-११) विष्णुपदीसंज्ञकाः इति, द्विस्वभावराशयः मिथुन-कन्या-धनु-मीनाः (३-६-९-१२) षडशीतिमुखसंज्ञकाः इति, चरेषु (१-७) मेषतुलाराशिद्वयं विषुवसंज्ञकम्, कर्कमकरराशिद्वयं अयनसंज्ञकम्(४-१०) इति प्रसिद्धिं प्राप्नोति ।

इदानीम् अयन-ऋतु-मास-वर्षादीनां मानं सौरमानेन भवितव्यमिति प्रतिपादयति । यथा -

[1] सूर्यसिद्धान्तः – 14अ. 7-8श्लो.

**भानोर्मकरसङ्क्रान्तेः षण्मासा उत्तरायणम् ।**
**कर्कादेस्तु तथैव स्यात् षण्मासा दक्षिणायनम् ॥**
**द्विराशिनाथा ऋतवः ततोऽपि शिशिरादयः ।**
**मेषादयो द्वादशैते मासास्तैरेव वत्सरः ॥**[१]

सूर्यस्य मकरसङ्क्रान्तेः सकाशात् सौरषण्मासाः उत्तरायणम् । अर्थात् मकरादितो मिथुनान्तं यावत् रवेः राशिषड्कभोगकालः **उत्तरायणं** भवति । तावत् रविः नाडीवृत्तादुत्तरे भ्रमतीत्यतः तस्य उत्तरायणमिति संज्ञा । तथैव कर्कादितो धनुरन्तं यावत् षड्राशिभोगकालः सौराः षण्मासाः **दक्षिणायनं** स्यात् । तावत् कालं रविः नाडीवृत्तात् दक्षिणतः एव भ्रमतीति हेतोः अस्य दक्षिणायनमिति नामधेयम् अन्वर्थकमेव ।

मकरादितः एव राशिद्वयभोगात्मकाः शिशिरादयः षड् ऋतवः भवन्ति । यावत् रविः मकरकुम्भराशिद्वयं भुङ्क्ते तावदेकः शिशिरऋतुः । मीनमेषयोः वसन्तः । वृषमिथुनयोः ग्रीष्मः । कर्कसिंहयोः वर्षा । कन्यातुलयोः शरत् । वृश्चिकधनुषोः हेमन्तः । एवं रविसङ्क्रान्त्युपलक्षिताः मेषादयो द्वादशराशयः एव द्वादशसौरमासाः भवन्ति । तैरेव द्वादशभिः सौरमासैः एकं सौरवर्षं भवति ।

- **सङ्क्रान्तौ पुण्यकालनिर्णयः -** इदानीं सङ्क्रान्तौ पुण्यकालनिर्णयमपि प्रतिपादयति । यथा -

**अर्कमानकलाः षष्ट्या गुणिता भुक्तिभाजिताः ।**
**तदर्धनाड्यः सङ्क्रान्तेः अर्वाक् पुण्यं तथा परे ॥**[२]

पूर्वराशिमतीत्य रवेः अग्रिमराशौ गमनं सङ्क्रान्तिशब्देन उच्यते । तत्र यदा रविकेन्द्रं राश्यादिबिन्दुगतं भवति सः सङ्क्रान्तेः मध्यः कालः । पूर्वाभिमुखं गच्छतो रवेः पूर्वपाली यदा राश्यादिबिन्दुगता भवति तदा सङ्क्रान्तेः आरम्भः । यदा च रवेः पश्चिमपाली राश्यादिबिन्दुगता भवति तदा सङ्क्रान्तेः अवसानः इति ज्ञातव्यः । मध्यकालात् रविबिम्बार्धचलनकालतुल्यमेव पूर्वं पश्चाच्च सङ्क्रान्तेः पुण्यकालो ज्ञायते । तदर्थं गणितानुपातः करणीयः । यथा सूर्यस्य याः बिम्बप्रमाणकलाः ताः षष्ट्या गुणिताः, स्पष्टरविगति कलाभिर्भक्ताः, तया यल्लब्धं तदर्धनाड्यः मध्यसङ्क्रान्तिकालात् पूर्वं तथा

---

[१] सूर्यसिद्धान्तः – 14अ. 9-10श्लो.

[२] सूर्यसिद्धान्तः – 14अ. 11श्लो.

पश्चात् सङ्क्रान्तिपुण्यकालः भवति । गणिते कृते सामान्येन षोडशनाडिकाः भवन्ति । तथैव प्रतिपादितं गणितग्रन्थे । यथा -

**सङ्क्रान्तिकालादुभयत्र नाडिकाः पुण्या मताः षोडश षोडशोष्णगोः ॥**[1] इति रामाचार्यः उवाच । किमर्थं पुण्यकालप्रदर्शनमिति चेत् सङ्क्रान्तौ एतावान् कालः स्नानदानजपादौ बाहुल्येन पुण्यदो भवतीति अस्माकं विश्वासः ।

अत्र सौरसङ्क्रान्तिविषये मीनमेषयोः, मेषवृषयोः वा वसन्तः इति बौधायनाचार्येण अभिधानात् मीनादित्वं मेषादित्वं च वैकल्पिकं वसन्तस्य अङ्गीकृतम् । तदनुसारेण उत्तरे ग्रीष्मादयोऽपि यथायथं विकल्प्यन्ते ।

सौरमानव्यवहारः कुत्र कुत्र ग्राह्यमिति भास्कराचार्यः प्रत्यपादयत् यथा - **वर्षायनर्तुयुगपूर्वकमत्र सौरात्** इति ।

**२. चान्द्रमानम् –**

चन्द्रः अमान्ते रविणा सह योगं कृत्वा तस्मात् पृथक् सञ्चरितः सन् प्रतिदिनं स्वाधिकगत्या यावन्मितं पूर्वदिशं याति तावन्मितं चान्द्रमानं ज्ञेयम् । अनेन प्रतिदिनं रविचन्द्रयोर्गत्या अन्तरांशमितं चान्द्रमानं इति सिद्ध्यति । तदुक्तं यथा -

**अर्काद्विनिस्सृतः प्राचीं यद्यात्यहरहः शशी ।**
**तच्चान्द्रमानमंशैस्तु ज्ञेया द्वादशभिस्तिथिः ॥**[2]

अत्र प्रमाणं किमिति चेत् - द्वादशभिः अंशैः तिथिः ज्ञेया । रविचन्द्रयोः गत्यन्तरांशैः द्वादशभिः द्वादशभिः एकैका तिथिः भवति । तदेव एकैकं चान्द्रदिनं भवति । अमान्तात् द्वितीय-अमान्तावधीः रविचन्द्रयोः अन्तरांशाः भगणांश (३६०) समाः भवन्ति । तावत् तिथयः त्रिंशत् । अतः षष्ट्युत्तरत्रिशतांशान् त्रिंशता भाजिते द्वादशलब्धिः भवति । अर्थात् अर्केन्द्वोरन्तरांशः द्वादश इति समुपपन्नम् । व्यवहारे अस्य चान्द्रमानस्य उपयोगः कुत्रेति जिज्ञासायामुक्तं यथा -

**तिथिः करणमुद्वाहः क्षौरं सर्वक्रियास्तथा ।**
**व्रतोपवासयात्राणां क्रिया चान्द्रेण गृह्यते ॥**[3]

---

[1] मुहूर्तचिन्तामणौ सङ्क्रान्तिप्रकरणम् ।

[2] सूर्यसिद्धान्तः – 14अ. 12श्लो.

[3] सूर्यसिद्धान्तः – 14अ. 16श्लो.

सर्वाः तिथयः, तिथ्यर्धमितं रूपं भवादिकरणं, विवाहः, क्षुरकर्म, जातकर्मादि सकलाः क्रियाः, व्रतोपवासयात्राणां च क्रियाः चान्द्रेण मानेन गृह्यते । अर्थात् उक्तेषु कर्मसु तिथेरेव प्राधान्यमस्ति ।

३. **नाक्षत्रमानम्** - प्रतिदिनं प्रवहगत्या नक्षत्रमण्डलस्य एकं परिभ्रमणं यावता कालेन भवति तावत् प्रमाणं नाक्षत्रं दिनं इति ज्योतिषसिद्धान्तः । एतदुक्तं यथा -

**भचक्रभ्रमणं नित्यं नाक्षत्रं दिनमुच्यते ।**
**नक्षत्रनाम्ना मासास्तु ज्ञेयः पर्वान्तयोगतः ॥**
**कार्तिक्यादिषु संयोगे कृत्तिकादि द्वयं द्वयम् ।**
**अन्त्योपान्त्यौ पञ्चमश्च त्रिधा मासत्रयं स्मृतम् ॥**[१]

किमपि नक्षत्रम् उदयानन्तरं प्रवहगत्या पुनः यावता कालेन उदेति तावान् कालः एव नाक्षत्रं दिनं भवति । दर्शान्तद्वयान्तःपातिनी द्वादशचान्द्रमासाः पूर्णिमान्ताः तेषु यस्य यस्य नक्षत्रस्य योगो भवति सः मासः तन्नक्षत्रसंज्ञया प्रसिद्धो भवति । यथा -

अश्विनीनक्षत्रसंयुक्ता पूर्णमासी आश्विनी, मासोऽपि आश्विनः । कृत्तिका संयुक्ता पूर्णमासी कार्तिकी, मासोऽपि कार्तिकः । एवं मृगशीर्षेण मार्गशीर्षः, पुष्येण पौषः, मघया माघः, फल्गुन्या फाल्गुनः, चित्रया चैत्रः, विशाखया वैशाखः, ज्येष्ठया ज्येष्ठः, आषाढेण आषाढः, श्रवणेन श्रावणः, भाद्रपदेन भाद्रपदो मासः । एवं द्वादशमासाः भवन्ति ।

**४. सावनमानम् -** सूर्यस्य एकस्मादुदयात् द्वितीयमुदयं यावत् यत् कालप्रमाणं तावन्मितं सावनं दिनं प्रकीर्तितम् । अत्र प्रमाणं हि -

**उदयादुदयं भानोः सावनं तत् प्रकीर्तितम् ।**
**सावनानि स्युरेतेन यज्ञकालविधिस्तु तैः ॥**
**सूतकादिपरिच्छेदो दिनमासाब्दपास्तथा ।**
**मध्यमा ग्रहभुक्तिस्तु सावनेनैव गृह्यते ॥**[२]

सूर्यस्योदयद्वयान्तर्वर्ती कालः सावनं दिनं भवतीत्यर्थः । मध्यमाधिकारे कल्पे, युगे, अहर्गणे च यानि दिनानि कथितानि तानि सावनमानेनैव सन्ति । कस्मिन् कस्मिन् व्यवहारे अस्योपयोगः करणीयः इति चेत्

१) यज्ञकालस्य व्यवहारः सावनमानेनैव कार्यः ।

---

[१] सूर्यसिद्धान्तः – 14अ. 15-16श्लो.

[२] सूर्यसिद्धान्तः – 14अ. 18-19श्लो.

२) जननमरणादि आशौचानां चिकित्सितचान्द्रायणव्रतादीनां च निर्णयः अनेनैव कार्यः ।

३) दिनपतिर्मासपतिर्वर्षपतिश्च सावनमानेनैव ग्राह्यः ।

४) ग्रहाणां दैनन्दिनी मध्यमा गतिः सावनेनैव ग्राह्यः ।

एवं चतुर्विधमानानां विवरणं प्रदत्तम् । चतुर्विधमानानां मध्ये दिनसङ्ख्याविषये परस्परं सादृश्यं नास्ति इति हेतोः चतुर्णां मानानां निमित्तीकृत्यैव मलमासस्य उत्पत्तिः भविष्यति । सः कथमुत्पद्यते ? इति ज्योतिषशास्त्रदृष्ट्या परिशीलयामः ।

• **मलमासः** - भास्कराचार्याः स्वग्रन्थे सिद्धान्तशिरोमणौ मासस्वरूपं विवक्षुः **मस्यन्ते परिमीयन्ते स्वकलावृद्धिहानितः । मास एते स्मृता मासाः त्रिंशत्तिथिसमन्विताः** इति उवाच । **यत्र स्वकलावृद्धिहानिभ्यां कालविशेषः मस्यते परिमीयते वा सः कालः मासः, स च त्रिंशत्तिथियुक्तः** इति रूपद्वयं तैः प्रदर्शितम् । माधवाचार्यस्तु **सकारान्तं मासिति प्रतिपादकं चन्द्रवाचि । तस्यायं कालः इति मासः । तदीयत्वं च पञ्चदशानां कलानां वृद्धिक्षयद्वारेण अवगन्तव्यम्** इति प्रतिपादितवान् ।

यावता कालेन चन्द्रकलावृद्धिक्षयौ परिमीयते अथवा चन्द्रकलावृद्धिक्षयाभ्यां यः कालः परिमीयते सः चान्द्रो मासः । यावता कालेन सूर्यराशिगतिः परिमीयते सः सौरः मासः । यः कालः त्रिंशद्भिरहोरात्रैः परिमीयते सः सावनः मासः । सर्वनक्षत्रावर्तनं यावता कालेन परिमीयते सः नाक्षत्रः मासः इति । अत्र चतुर्षु मानेषु पृथक् पृथक् सङ्ख्या भवति इत्यवगन्तव्यम् । यथा - नक्षत्राणाम् अश्विन्यादीनां रेवत्यन्तानाम् आवर्तनं (२७) सप्तविंशतिदिनैः भवति इति सप्तविंशतिदिनात्मकः नाक्षत्रमासः । तथा चान्द्रमासः शुक्लपक्षप्रतिपदादि अमावास्यापर्यन्तः कृष्णपक्षप्रतिपदादि पूर्णिमान्तो वा त्रिंशत्तिथियुतः भवति । ताः त्रिंशत्तिथयः त्रिंशद्दिनैः आवर्तन्ते एकोनत्रिंशद्दिनैर्वा । (२९/२१/५०/६) । एवं च द्वादशमासाः चतुःपञ्चाशदुत्तरत्रिशतैः (३५४) सावनदिनैः सम्पद्यन्ते ।

तथा च त्रिंशद्दिनात्मकः सावनमासः । तैर्द्वादशभिः षष्ट्युत्तरत्रिशतानि (३६०) दिनानि सम्पद्यन्ते । तथा सौरमासः सार्धत्रिंशत् सावनदिनैः (३०/२६/१७/३७) सम्पद्यन्ते । तादृशैः द्वादशमासैः पादेनसहितं पञ्चषष्ट्युत्तरत्रिशतदिनानि (३६५/१५/३०/२२) भवन्ति।

इत्थं च एकस्मिन् वर्षे सौरदिनापेक्षया चान्द्रदिनानि पादेनसहितं एकादशदिनानि (११-१/४) न्यूनानि भवन्ति । तथा द्वात्रिंशत् (३२) मासैः (३२/१६/४) चान्द्रमासतुल्यानि दिनानि न्यूनानि भवन्ति । तदा अधिकमासस्य प्रसक्तिः ।

मासानाम् उपयोगस्तु व्यवहारे धर्मे च । अत एव सिद्धान्तशिरोमणौ – **ज्ञेयं विमिश्रं तु मनुष्यमानं मानैश्चतुर्भिः व्यवहारवृत्तेः । वर्षायनर्तुयुगपूर्वकमत्र सौरात् मासास्तथा च तिथयः तुहिनांशुमानात् । यत् कृच्छ्रसूतकचिकित्सितवासराद्यं तत् सावनाच्च घटिकादिकमार्क्षमानात् ॥**[१] इति ।

सौरदिनमानैश्चतुर्भिः मानवमानैः व्यवहारः धर्मश्च साध्यः इति प्रतिपादयामास भास्कराचार्यः । कालमाधवे ज्योतिर्गणे च – **सौरो मासो विवाहादौ यज्ञादौ सावनः स्मृतः । आब्दिके पितृकार्ये च चान्द्रो मासः प्रशस्यते ॥** इति प्राशस्त्यवचनमपि उक्तम् । अतः एतेषां सामान्यवचनानां अपवादभूतः मलमासः चान्द्रः इति ज्ञेयः ।

- **मलमासस्वरूपम्** - तत्र बृहस्पतिः श्राद्धकाण्डे - **यस्मिन् मासे न सङ्क्रान्तिः सङ्क्रान्तिद्वयमेव वा । संसर्पांहस्पतीमासावधिमासश्च निन्दिताः** इति मलमासस्वरूपं निन्दितत्वं च आह । अग्निपुराणे तु **मासि संवत्सरे चैव तिथिद्वैधं यदा भवेत् । तत्रोत्तरतमा ज्ञेया पूर्वा तु स्यान्मलिम्लुचा ॥** इति उक्तम् । अधिमासपरीक्षायां च - **यदा शशी याति गभस्तिमण्डलं दिवाकरः सङ्क्रमणं करोत्यनु । विवाहयज्ञोत्सवनाशहेतुकस्तदाधिमासः कथितः स्वयम्भुवा ॥** इति लल्लाचार्याभिमतमुद्धृत्य उक्तम् । एवं शास्त्रान्तरेऽपि । तत्रेदं तत्त्वम्-एकस्मिन् चान्द्रमासे शुक्लप्रतिपदमारभ्य अमावास्यान्तघटिकातः पूर्वं रविसङ्क्रमणमेकं भवेत् । यदि तन्न सम्भवति तदा सोऽधिकमासः इति उच्यते । यदा शुक्लप्रतिपदादितः अमावास्यान्तघटिकातः पूर्वं रविसङ्क्रान्तिद्वयं भवति तदा सः क्षयमासः इति उच्यते । एवम् असङ्क्रान्तो द्विसङ्क्रान्तो वा चान्द्रो मासः मलमासः । स च क्रमेण अधिकमासः क्षयमासः इति च कथ्यते । एवं च सूर्याचन्द्रमसोः दिनसङ्ख्याधिकन्यूनतामाश्रित्य मलमासप्रवृत्तिः भवति । मलमासोपपत्तिश्च सिद्धान्तशिरोमणिप्रभृतिषु गणितस्कन्धग्रन्थेषु ज्योतिश्शास्त्रे प्रसिद्धा । द्विविधोऽपि मासः असङ्क्रान्तत्वद्विसङ्क्रान्तत्वहेतुतया मलमासः एव । तयोः मलत्वं च वाचनिकम् । तच्च मलत्वं कालाधिक्यात् नपुंसकत्वाच्च ज्योतिःशास्त्रोक्तं माधवेनोद्धृतम् -

**असङ्क्रान्तो हि यो मासः कदाचित् तिथिवृद्धितः ।**
**कालान्तरात् समायाति स नपुंसक इष्यते ॥**
**अरुणः सूर्यो भानुस्तपनश्चन्द्रो रविर्गभस्तिश्च ।**
**अर्यमा हिरण्यरेता दिवाकरो मित्रविष्णू च ॥**

---

[१] सिद्धान्तशिरोमणिः – 1अ. 30-31श्लो.

**एते द्वादशसूर्या माघाद्येषूदयन्ति मासेषु ।**

**निःसूर्योऽधिकमासो मलिम्लुचाख्यस्ततः पापः ॥**

**मासेषु द्वादशादित्यास्तपन्ते हि यथाक्रमम् ।**

**नपुंसकेऽधिके मासे मण्डलं तपते रवेः ॥** इति ।

राक्षसैस्तस्करैराक्रान्तत्त्वात् मलिम्लुचत्वं शातातपेनोक्तम् –

**मलिम्लुचैः समाक्रान्तं सूर्यसङ्क्रान्ति वर्जितम् ।**

**मलिम्लुचं विजानीयात् सर्वकर्मसु गर्हितम् ॥** इति ।

स च मलमासः कदा आगच्छतीति निर्णयसिन्धौ वसिष्ठ आह-

**द्वात्रिंशद्भिर्गतैर्मासैः दिनैः षोडशभिस्तथा ।**

**घटिकानां चतुष्केन पतत्यधिकमासकः ॥** इति ।

एतच्च मध्यममानेन । न तु नियमार्थं च । ततः कदाचित् माससङ्ख्या व्यत्यासेऽपि न दोषः । तथा स्फुटमानमाश्रित्य काठकगृह्योक्तं माधवीये –

**यस्मिन्मासे न सङ्क्रान्तिः सङ्क्रान्तिद्वयमेव वा ।**

**मलमासः स विज्ञेयो मासे त्रिंशत्तमे भवेत् ॥** इति ।

कदाचिदधिकमासः पञ्चत्रिंशद्वर्षेष्वापतीति माधवीये प्रकाशितम् । यस्मिन् वर्षे क्षयमासः सम्भवति तस्मिन् वर्षे अधिकमासद्वयं च सम्भवति । क्षयमासात् प्रागेकः पश्चादेकः इति । तयोः क्रमेण संसर्पः, अहंस्पतिः इति संज्ञापि शास्त्रे दृश्यते ।

तयोः संसर्पस्य न मलत्वं त्याज्यत्वं च । सम्यक् सर्पति इति संसर्पसंज्ञा । एवं च क्षयोत्तरभवस्य अधिमासस्य मलत्वं त्याज्यत्वं च । तदुक्तं माधवीये जाबालिना –

**एकस्मिन्नेव वर्षे तु द्वौ मासावधिमासकौ ।**

**प्राकृतस्तत्र पूर्वः स्यात् उत्तरस्तु मलिम्लुचः ॥** इति ।

क्षयमासस्तु कादाचित्कः । सिद्धान्तशिरोमणौ तदागमनकालः उक्तः । यथा-

**क्षयः कार्तिकादित्रये नान्यतः स्यात् ..... ॥**

**गतोऽब्ध्यद्रिनन्दैर्मिते शाककाले तिथीशैर्भविष्यत्यथाङ्गाक्षसूर्यैः ।**

**गजाद्यग्निभूमिस्तथा प्रायशोऽयं कुवेदेन्दुवर्षैः क्वचिद्गोकुभिश्च ॥**[1] इति ।

तत्र प्रायशः १४१ वर्षेषु एकदा क्षयमासागमनं क्वचित् १९ वर्षेषु अपि । अथापि क्षयः कार्तिकादिषु त्रिषु मासेषु एव भवतीति ।

---

[1] सिद्धान्तशिरोमणिः – 1अ. 6-7श्लो.

साम्प्रतं विलम्बिनामसंवत्सरे ज्येष्ठमासः अधिकः । वैशाखकृष्णचतुर्दश्यां (१४-०५-२०१८) वृषभे अर्कस्य सङ्क्रमणं तथा ज्येष्ठमासे द्वितीयायां (१५-०६-२०१८) मिथुने अर्कस्य सङ्क्रमणं समभवत् । एतयोर्मध्ये किंचिदधिकानि एकत्रिंशद्दिनानि भवन्ति । वैशाखकृष्ण-अमावास्यानन्तरं ज्येष्ठकृष्ण-अमावास्यापर्यन्तं मध्ये अर्कस्य सङ्क्रान्तिः न भविष्यति । अतः मध्ये पतितः ज्येष्ठमासः अधिकः सञ्जातः ।

एवं सूर्यसिद्धान्तस्य मानाध्यायगतः चतुर्णां व्यावहारिकमानानां विचारः अत्र विस्तरेण व्याख्यातः ।

*** *** ***

# विंशोत्तरीदशाक्रमः

**डा. मुरलीकृष्णः टि.**
पलितज्यौतिषविभागः
रा.सं.सं. राजीवगान्धीपरिसरः, शृङ्गेरी

ग्रहाणां स्वस्वसूचितफलविपाककालभेदरूपाः दशाख्याः स्युः ।[१] इति वाचस्पत्यकोशगतं निर्वचनम् । बृहज्जातककारस्तु यथाऽऽह - **स्वां स्वां दशामुपगताः स्वफलप्रदाः स्युः ।**[२] इति । जातकपारिजातकारस्त्वेवमाह - **दशानुसारेण फलं वदन्ति मुनीश्वरा जातशुभाशुभं यत् ।**[३] तथा च -

**बलानुसारेण यथा हि योगो योगानुसारेण दशामुपैति।**
**दशाफलः सर्वफलं नराणां वर्णानुसारेण यथा विभागः॥**[४]

अनेनेदं सिद्ध्यति यत् सर्वे ग्रहाः स्वस्वदशाकाले स्वस्वफलानि प्रयच्छन्ति ।

- **फलचिन्तनार्थं कां दशाम् आश्रयेत् ? -** आयुर्दशा, निसर्गदशा, कालचक्रदशा, चरदशा, अष्टोत्तरीदशा, योगिनीदशा इत्येवं नैकाः दशाः ज्यौतिषशास्त्रे प्रतिपादिताः। एवञ्चेत् कस्य ग्रहणं कुर्यात्फलप्रवचनार्थमिति जिज्ञासा समुदेति। अत्र पराशरस्य वचनमेवमस्ति -

**विंशोत्तरशतं पूर्णमायुः पूर्वमुदाहृतम्।**
**कलौ विंशोत्तरी तस्माद्दशा मुख्या द्विजोत्तम ॥**[५]

एवमेव **कलौ नाक्षत्रिकी दशा**[६] इत्यपि प्रसिद्धा उक्तिः । अतः कलियुगेऽस्मिन् विंशोत्तरी दशा स्वीकार्या इति सिद्ध्यति ।

- **विंशोत्तरीदशायाः गणना कथम् ? -** जन्मनक्षत्रमाधृत्य विंशोत्तरी दशा गण्यते। अतः एतस्याः दशायाः नाक्षत्रिकी दशा, नक्षत्रदशा, उडुदशा वेति व्यवहारो दृश्यते। विंशोत्तरीति पदेन विंशत्यधिकशतं वर्षाणां मनुजानाम् आयुःप्रमाणं गृह्यते। यतः **समाष्षष्टिर्द्विघ्ना मनुजकरिणां पञ्च च निशा**[७] इति आयुर्वेदज्योतिश्शास्त्रयोः अङ्गीकारात्। अतः रव्यादि

---

[१] वाचस्पत्यकोशः ।

[२] बृहज्जातकम् - 8अ. 23श्लो.

[३] जातकपारिजातः - 18अ. 1श्लो.

[४] जातकपारिजातः - 18अ. 2श्लो.

[५] बृहत्पाराशरहोराशास्त्रम् - 47अ 14.श्लो.

[६] वाचस्पत्यकोशः ।

[७] बृहज्जातकम् - 7अ. 5श्लो.

नवग्रहाः मनुजस्यायुषि कदा फलप्रदातारः स्युरिति विवेचनमत्रास्ति।
विंशोत्तरीदशाक्रममाह वैद्यनाथः जातकपारिजाते यथा -

**आदित्यचन्द्रकुजराहुसुरेशमन्त्रिमन्दज्ञकेतुभृगुजा नव कृत्तिकाद्याः।**
**तेनो नयः सिनदयातटधन्यसेव्यसेनानरा दिनकरादिदशाब्दसङ्ख्याः॥**[१]

कृत्तिकादिनक्षत्रेषु समुत्पन्नेभ्यः आदित्यादिग्रहाणां षडादिवर्षाणि आद्याः दशाः स्युः इत्यर्थः । तन्नाम रविः, चन्द्रः, कुजः, राहुः, गुरुः, शनिः, बुधः, केतुः, शुक्रः इत्येवंक्रमेण ग्रहदशानाम् आनुपूर्वी उपदिष्टा। एषां दशावर्षाणि यथाक्रमं षट्, दश, सप्त, अष्टादश, षोडश, नवदश, सप्तदश, सप्त, विंशतिः इत्येतावन्मितानि ज्ञेयानि। कृत्तिकादीनि नक्षत्राणि क्रमशः रव्यादिषु ग्रहेषु गणयेत् । एवं गणनायां सत्यां कृत्तिकादीनां नवनक्षत्राणाम् आवृत्तित्रयं सम्भवति।

कृत्तिका-उत्तराफाल्गुनी-उत्तराषाढानक्षत्रेषु उत्पन्नानां षड्वर्षाणि यावद्रविः फलप्रदाता। रोहिणीहस्तश्रवणेषु जातानां दश वर्षाणि(10) चन्द्रस्य दशा। मृगशीर्षचित्राधनिष्ठेषु जातानां सप्त वर्षाणि(7) कुजस्य दशा। आर्द्रास्वातीशतभिषङ्नक्षत्रेषु जातानां अष्टादशवर्षाणि(18) राहोः, पुनर्वसुविशाखापूर्वाभाद्रेषूत्पन्नानां षोडशवर्षाणि(16) गुरोः, पुष्यानुराधोत्तराभाद्रेषूत्पन्नानां नवदश वर्षाणि(19) शनेः, आश्लेषाज्येष्ठारेवतीषूत्पन्नानां सप्तदश वर्षाणि (17) बुधस्य, अश्विनीमघामूलोत्पन्नानां सप्त वर्षाणि (07) केतोः, भरणीपूर्वाफाल्गुनीपूर्वाषाढानक्षत्रेषूत्पन्नानां विंशतिवर्षाणि (20) शुक्रस्य च दशा इत्येवं नक्षत्राणां न्यासक्रमः विज्ञेयः ।

उदाहरणार्थं पूर्वाफाल्गुनीनक्षत्रे कश्चिदुत्पन्नस्तर्हि विंशतिवर्षाणि शुक्रस्य दशा इति सिध्यति। किन्त्वस्याः प्रथमदशायाः वर्षमानं पूर्णतया लभ्येत इति नास्ति नियमः। यतः तत्तदुक्तवर्षाणि नक्षत्रस्य सम्पूर्णमानमधिकृत्य उपदिष्टम्। अर्थात् नक्षत्रस्यारम्भे एव कस्यचिज्जन्म चेत् तदुक्तवर्षस्य पूर्णतया प्राप्तिः। अर्थात् यथा यथा जन्मनक्षत्रस्य भुक्तघटिकाः वर्धन्ते तथा तथा जन्मदशाप्रमाणं क्षीयते। अतः त्रैराशिकेन गतायाः वा शिष्टायाः दशावर्षस्य ज्ञानं कुर्यात्।

- **जन्मशिष्टदशासाधनं कथम् ? -** समान्यतः जातकेषु जन्मशिष्टदशां लिखन्ति दैवज्ञाः। अभीष्टनक्षत्रस्य सम्पूर्णं मानं भभोगसंज्ञकम्। अभीष्टनक्षत्रस्य अभीष्टकालपर्यन्तं यातं मानं भयातसंज्ञकम्। अभीष्टनक्षत्रस्य दशामानं भयातेन सङ्गुण्य भभोगेन विभज्यते तर्हि

[१] जातकपारिजातः – 18अ. 3श्लो.

गतदशामानं लभ्यते। अभीष्टनक्षत्रस्य सम्पूर्णभभोगतुल्ये भयाते ग्रहस्य समग्रं दशामानं लभ्यते चेत् वर्तमानभशेषे किमिति अनुपातः। अभीप्सितग्रहस्य सम्पूर्णदशामानेन गतदशाम् ऊनीक्रियते चेत् शिष्टदशा प्राप्यते।

• **फलचिन्तने अवधेयाः अंशाः के ?** – फलचिन्तने ग्रहाणां दशासु अन्तर्दशादीनां, दशासन्धीनाञ्च गणनां विधाय शुभाशुभफलानि प्रवचनीयानि । तदत्र निरूप्यते ।

१. **अन्तर्दशादयः** - सूक्ष्मफलचिन्तनार्थं महादशायाम् अन्तर्दशादयः चिन्त्याः । तदुच्यते यथा -

**दशा चान्तर्दशा चैव विदशोपदशा तथा।**
**प्राणाख्या च फलं तासां वदेच्छास्त्रानुसारतः॥** [१]

एतस्यायमर्थः यद्दशायामन्तर्दशायाः, अन्तर्दशायां विदशायाः (प्रत्यन्तर्दशायाः), विदशयां उपदशायाः (सूक्ष्मदशायाः), उपदशायां प्रणदशा च ज्ञेया । सामान्यतः दैवज्ञाः दशाम् अन्तर्दशाञ्च ज्ञात्वा फलानि चिन्तयन्ति । प्रत्येकस्यां दशायां तत्तद्दशाधिपतेः अन्तर्दशा आदौ भवति। ततश्चाग्रे आदित्यचन्द्रादिक्रमेण यथाक्रमं चिन्तयेत् । अर्थात् रवेः दशायां रवेः अन्तर्दशा आदौ भवति । ततश्च क्रमशः चन्द्रादयः शुक्रान्तम् अन्तर्दशाः भवन्ति ।

२. **दशासन्धयः** - वर्तमानदशायाः अन्तिमकालः, आगामिनिदशायाः आरम्भकालः इत्यनयोः मध्यभागः **दशासन्धिः** इत्युच्यते । **दशावसानेष्वशुभञ्च सर्वे कुर्वन्ति सामान्यफलं नराणाम् ॥** [२] इति प्रमाणात् सर्वासां दशानाम् अन्तिमकालः अशुभफलदायकः । किन्त्वत्र शुक्रादित्ययोः, कुजराहोः, राहुबृहस्पत्योश्च सन्धिकालः दोषदायकः इति लोकरूढिर्वर्तते । अतः तद्दोषनिवृत्तये रवि-कुज-गुरूणां दशारम्भकालात् षण्मासेभ्यः पूर्वं शान्तिकर्माणि समाचर्यन्ते ।

३. **फलचिन्तनक्रमः** – दशाकारकग्रहाणां बलाबलविवेकेन सह संज्ञाध्यायोक्तानि द्रव्याणि वस्तूनि वा, कर्माजीवे उपदिष्टाः कारकपदार्थाः, भाव-स्थान-दृष्टि-योगजानि च फलानि युक्त्या संयोज्य तेषां पदार्थानां प्राप्त्यप्राप्तिं चिन्तयेदिति वराहमिहिरस्याभिमतम् । एतदुक्तं यथा -

**संज्ञाध्याये यस्य यद्द्रव्यमुक्तं कर्माजीवो यस्य यश्चोपदिष्टः।**

---

[१] जन्मपत्रदीपकः – 51श्लो.

[२] जातकपारिजातः - 18अ. 34श्लो.

**भावस्थानालोकयोगोद्भवञ्च तत्तत्सर्वं तस्य योज्यं दशायाम्॥** [१]

शुभफलदातुः ग्रहस्य दशायाम् आत्मनस्तुष्टिः सौख्याधिक्यम् अर्थागमश्च जायते इत्यप्युक्तमस्ति यथा - **शुभफलददशायां तादृगेवान्तरात्मा बहु जनयति पुंसां सौख्यमर्थागमञ्च।** [२] जातकपारिजातकारः वैद्यनाथः एवमाह -

**इष्टोत्कटत्वे हि शुभानि पुंसां फलान्यनिष्टान्यशुभोत्कटत्वे ।**

**साम्ये तु मिश्राणि फलानि नूनं सर्वत्र चैवं परिकल्पनीयम् ॥** [३]

अर्थात् ग्रहाणाम् इष्टोत्कटत्वावस्थायां शुभानि फलानि, अशुभोत्कटत्वावस्थायाम् अशुभानि फलानि, तत्साम्ये च मिश्राणि फलानि परिकल्पनीयम् ।

i. **शुभफलप्राप्तेश्चिन्तनम् -** इष्टोत्कटत्वस्य ज्ञानं कथमिति विवक्षायाम् -

**आरोहवीर्याधिकभावतुल्यबिन्द्वधिकाः कर्मभवोदयस्थाः।**

**तुङ्गादिवर्गोपगता नभोगाः षड्वीर्यवन्तश्च शुभप्रदाः स्युः॥** [४]

आरोहीसंज्ञकस्य [५] , षड्बलयुक्तस्य, भावमध्यगतस्य, अष्टकवर्गे बिन्ध्वधिकयुक्तस्य, दशमैकादशस्थस्य, उच्चादिशुभवर्गस्थस्य ग्रहस्य दशा शुभप्रदा स्यात् । एवमेव -

**लग्नादिष्टगृहोपगः स्वभवने तुङ्गे सुहृद्भेऽथवा**

**पाकेशः शुभमित्रवीक्षणयुतस्तत्पाकभुक्तौ शुभम्।**

**केन्द्रे वा यदि कोणगोऽतिशुभदः पापास्त्रिषष्ठायगा-**

**स्तुङ्गाद्योपचयेषु ये बलयुतास्तेषां दशायां शुभम् ॥** [६]

इत्यतः लग्नाच्छुभस्थाने, स्वक्षेत्रे, स्वोच्चे, स्वमित्रस्थाने, शुभग्रहाणां मित्रग्रहाणां वा योगे दृष्ट्या वा विद्यमानायां ग्रहदशायाम् अन्तर्दशायां च शुभफलानि ऊह्यानि। सामान्यतः सर्वे ग्रहाः केन्द्रे त्रिकोणे च अतिशुभदाः । पापाः तृतीयषष्ठायस्थानस्थाः, उच्चस्थाः, उपचयस्थाः बलयुताश्च शुभदाः भवन्ति । अतः एतेषां ग्रहाणां दशा शुभदा ज्ञेया ।

तथैव जन्मनक्षत्रात् सम्पत्-साधक- क्षेम-मैत्र-परममैत्र-तारकाधिपतीनां दशा अन्तर्दशा च शुभदा । अत्र हि प्रमाणं यथा -**सम्पत्साधकमैत्रपाः**

---

[१] बृहज्जातकम् - 8अ. 20श्लो.

[२] बृहज्जातकम् - 8अ. 22श्लो.

[३] जातकपारिजातः - 18अ. 11श्लो.

[४] जातकपारिजातः - 18अ. 04श्लो.

[५] स्वनीचस्थानात् उच्चस्थानं प्रति गम्यमानः ग्रहः आरोहीति कथ्यते ।

[६] जातकपारिजातः - 18अ. 15श्लो.

**परममैत्रक्षेमताराधिपावेतेषामपहारभुक्तिसमये सम्पत्समृद्धिं वदेत् ॥**[१] इति ।

**ii. अशुभफलप्राप्तेश्चिन्तनम् –** गुलिकस्थितभवनेशस्य, गुलिकस्थितभवनस्थस्य, अष्टकवर्गे अल्पबिन्दुयुतस्य, शत्रु-नीच-पापग्रहस्य क्षेत्रस्थस्य, अस्तङ्गतस्य, पापग्रहेण युक्तस्य, भावसन्धिगतस्य च ग्रहस्य दशा अशुभफलानि प्रयच्छति । उक्तं यथा -

**मान्दिराशिपतिमान्दिभावगाः स्वल्पबिन्दुरिपुनीचमूढगाः ।**
**पापखेटयुतभावसन्धिगा राशिसन्धिलवगास्त्वनिष्टदाः ॥**[२]

एवमेव षष्ठाधिपस्य दशा दुःखम्, अष्टमाधिपस्य दशा मृत्युं विनाशञ्च, अस्तङ्गतस्य ग्रहस्य दशा बन्धुमरणं वा प्रयच्छति । अत्र प्रमाणमस्ति यथा -

**षष्ठेशस्य दशा विलापकरणी मृत्युर्विनाशप्रभो-**
**रस्तव्योमचरस्य बन्धुमरणं पाकेऽपहारेऽथवा ।**[३]

एवं विंशोत्तरीदशाक्रमे पूर्वोक्तान् सर्वान् विषयान् युक्त्या संयोज्य फलानि आदिशेत् दैवज्ञः ।

*** *** ***

---

[१] जातकपारिजातः - 18अ. 25श्लो.

[२] जातकपारिजातः - 18अ. 5श्लो.

[३] जातकपारिजातः - 18अ. 25श्लो.

# अहर्गणविचारः

**डा. प्रसादभट्टः**
फलितज्यौतिषविभागः
रा.सं.सं. राजीवगान्धीपरिसरः, शृङ्गेरी

अहर्गणो नाम दिनानां समूहः । अर्थात् सावनदिनानां समूह इति । यतो हि **"यत् कृच्छ्रसूतकचिकित्सितवासराद्यं तत् सावनाच्च"**[१] इत्युक्तत्वात् दिनगणनं सर्वदा सावनमानेन भवति ।

वर्तमानदिने ग्रहाणां स्थितिज्ञानार्थं, वाराधिप-मासाधिप-वत्सराधिपेत्यादीनां ज्ञानार्थं दिनगणज्ञानमपेक्षितम् । यतो हि यदि कल्पीयदिनैः अथवा युगीयदिनैः ग्रहस्य एते भगणाः तर्हि इष्टदिनैः किमिति अनुपातेन मध्यमः ग्रहः आगच्छति । तत्र **'वर्षायनर्तुयुगपूर्वकमत्र सौरात्'**[२] इत्यनेन गतसंवत्सरसंख्या तु सौरमानेनोच्यते । तथैव **"मासस्तथा च तिथयः तुहिनांशुमानात्"**[३] इत्युक्तत्वात् मासगणना चान्द्रमानेन भवति । अतः कल्पादितो वा युगादितो वा गतदिनानयनार्थं सौरतः चान्द्रीकरणं तथा चान्द्रमानतः सावनीकरणं कर्तव्यमित्यर्थः । तत्र सौरतः साक्षात् सावनं किमर्थं कर्तुं न शक्यत इति चेत् **वर्षदैर्घ्यस्य व्यत्यासत्वात्** इति । द्वादशसौरमासानां वर्षसंज्ञत्वात् गतसौरसंख्या द्वादशगुणिताः इष्टवर्षादौ अर्थात् मेषसङ्क्रान्तिदिने गतसौरमासाः भवन्ति । तेषु चैत्रादि गतचान्द्रमासतुल्याः सौरमासाः यदा योज्यन्ते तदा ते अभीष्टसंङ्क्रान्तिकालिकाः सौरमासाः भवन्ति । किन्तु ते मासाः **"दर्शाग्रसङ्क्रमकालतः प्राक् सदैवतिष्ठत्यधिमासशेषम्"**[४] इत्युक्तत्वात् अधिशेषरहिताः । अतः तेषां सौरमासानां चान्द्रमासकरणार्थम् अनुपातेन अधिमासानयनं कार्यम् । अर्थात् पठितयुगसौरमासैः यदि पठितयुगाधिमासाः तर्हि इष्ट सौरमासैः कति अधिमासाः इति । एवमनुपातागतैः अधिशेषसहितैः एभिः अधिमासैः यदि युक्ताः अभीष्टसङ्क्रान्तिकालिकाः सौरमासाः तदा अभीष्टदर्शान्तकालिकचान्द्रमासाः भवन्ति । यतो हि पूर्वं **"रविमासोनितास्ते तु स्युः अधिमासकाः"**[५] इत्युक्तत्वात् सौरचान्द्रमासयोरन्तरम् एवाधिमासः ।

---

[१] सिध्दान्तशिरोमणिः कालमानाध्याये –(३१)

[२] सिध्दान्तशिरोमणिः कालमानाध्याये –(३१)

[३] सिध्दान्तशिरोमणिः कालमानाध्याये –(३१)

[४] सिध्दान्तशिरोमणिः मध्यगतिवासना-(१६)

[५] सूर्यसिध्दान्तः मध्यमाधिकारः-(३५)

एवं ते दर्शान्तकालिकचान्द्रमासाः त्रिंशद्गुणिताः दर्शान्ते चान्द्रतिथयः भवन्ति । तेषु दर्शान्ताद् इष्टदिनावधिः याः गतितिथयः ताः यदि योज्यन्ते तदा गततिथ्यन्तकाले चान्द्रदिनानि भवन्ति । अतः तेषां चान्द्रदिनानां सावनदिनकरणार्थम् अवमानयनं कर्तव्यम् । यतो हि "**सावनाहानि चन्द्रेभ्यो द्युभ्यः प्रोज्झ्यः तिथिक्षयाः**"[1] इत्युक्तम् । यदि पठितयुगचान्द्रदिनैः पठितावमानि तर्हि इष्टचान्द्रदिनैः कानीति अनुपातः ।

एवम् अनुपातस्य या लब्धिः सा चान्द्रदिनैः ऊनिता भवति तदा सावनदिवसाः भवन्ति । अत्र अनुपातस्य लब्धिः नाम सावयवावमशेषः । यदि अवयवरहितो अवमशेषः चान्द्रदिनैः ऊनितः तदा तिथ्यन्तकालिकः सावनो अहर्गणः । किन्तु "**उदयादुदयं भानोः भुमिसावनवासराः**"[2] इत्युक्तत्वात् अहर्गणः उदयकालिकः अभीष्टः । अतः तिथ्यन्तकालिकाहर्गणाय अवमशेषस्य योगेन कार्यः सूर्योदयकालिनः अहर्गणः आगच्छतीति ।

"**लङ्कायामार्धरात्रिकः**" इति किमर्थमुच्यते ? इति चेत् यमकोटिपुरोदयकाले निखिलं ज्यौतिषं कर्म । तत्र यदा उदयः तदा लङ्कायाम् अर्धरात्रिकालः इति । एवं पुनः सप्तभिः क्षयितः शेषः सूर्याद्यो वासरेश्वरः कथमिति चेत् रविवासरे सृष्ट्यादिः, अतः तदादिः इत्यर्थः ।

एवमत्र अहर्गणानयने अनुपातीयमासैः मध्यमैरेव भवितव्यं तिथिभिश्च मध्यमाभिर्भवितव्यं परञ्चात्र स्फुटार्कवशात् स्फुटचान्द्रमासानां ग्रहणात्, मध्यस्फुटमासयोरन्तररूपेण एकेन अनुपातागतः अधिमासः अन्तरितः भवति । तदानीं पतितः अधिमासः यदि गणितात् न लब्धः तदा सैकः, यदा लब्धोऽधिमासः न पतितः तदा निरेकः अधिमासगणः ग्राह्यः । एवमेव मध्यस्पष्टतिथिभेदेनापि अन्तरितं स्यात् । तदानीमप्यहर्गणे एकान्तरितः भवेत् । अतः अहर्गणे वारस्यैव नियामकत्वात् सैकोवा निरेकोवा भवेदिति विदां स्पष्टमेव ।

---

[1] सूर्यसिध्दान्तः मध्यमाधिकारः-(३६)

[2] सूर्यसिध्दान्तः मध्यमाधिकारः-(३६)

ISSN 2249-538X

# सुनफादियोगविमर्शः

**डा. प्रदीपशर्मा**
फलितज्यौतिषविभागः
रा.सं.सं. राजीवगान्धीपरिसरः, शृङ्गेरी

सकलचराचरजगतः स्रष्टा ब्रह्मा हि अस्य ज्योतिश्शास्त्रस्य प्रवर्तकेषु अन्यतमः यज्ञविधाननिमित्तं चतुर्भ्यः मुखेभ्यश्चतुरः वेदान् प्रावोचत् । यज्ञकालनिर्धारणार्थञ्च ज्योतिषशास्त्रस्योत्पत्तौ अपि स एव कारणीभूतः । नारदश्च शास्त्रस्यास्य महत्त्वमङ्गीकृत्य लोके प्रवर्तयामास । मतान्तरानुसारेणेदं ज्योतिषशास्त्रं प्रथमं सूर्येण मयासुराय प्रदत्तं ततश्च जगति प्रवर्तितमिति । आचार्यकश्यपानुसारेण ज्योतिषशास्त्रस्य प्रवर्तकाः अष्टादशाचार्याः सन्ति येषु यवनोऽपि प्रमुखः यत्कृतं ज्योतिषं वराहाद्याचार्याः अपि मुक्तकण्ठेन प्राशंसयन् । वराहमिहिरपूर्ववर्ती मीनराजः वृद्धयवनजातकग्रन्थप्रणेता, यस्मिन् हि ग्रन्थे यवनज्योतिषसिद्धान्ताः सुष्ठु दृग्गोचराः जायन्ते ये हि कालान्तरे सर्वैरपि भारतीयैः ते सिद्धान्ताः स्वग्रन्थेषु निरूपिताः अपि ।

सामान्यतः नक्षत्रादिज्योतिःपिण्डानां स्थिति-गति-प्रभावादिवर्णनपरकशास्त्रेऽस्मिन् सौर-चान्द्र-नाभसादिविविधयोगैः साकमेव यवनकृताः अपि बहवो हि योगाः समाद्रियन्ते । विशिष्य वराहमिहिरेण कल्याणवर्मणा च सूर्येण जायमानाः वेशि-वाशि-उभयचरियोगाः, चन्द्रेण हि अनफा-सुनफा-दुरुधरा-केमद्रुमयोगाश्च बहवः यवनकृताः तादृशाः योगा: निरूपिताः । सारावली-बृहज्जातकादिग्रन्थेषु एतेषां योगानां फलं यवनग्रन्थमाधारीकृत्यैव निरूपितं वर्तते यद्धि तत्पूर्ववर्तिना मीनराजेन कृतवृद्धयवनजातकावलोकनेन स्फुटं भवति ।

सुनफादियोगानां संख्याविमर्शः –

सामान्यतः सुनफादियोगेषु पृथक्-पृथक्ग्रहसंयोगेन जायमानभिन्नफलादीनां निरूपणं न क्वापि दृश्यते अत एव अयं विषयः विशेषतः अत्र निरूप्यते । सुनफा-अनफायोगयोः पृथग्रूपेण एकत्रिंशत् भेदाः सन्ति । चन्द्रात् द्वादशभावे द्वितीयभावे वा एकः ग्रहः ग्रहद्वयं ततोऽपि अधिकाः ग्रहाः भवन्ति चेत् मङ्गलादिपञ्चग्रहैः योगानां संख्या एकत्रिंशत् (३१) इति सिध्यति । इत्थं दुरुधरायोगस्य अशीत्यधिकमेकशत(१८०)संख्याकाः भेदाः सिध्यन्ति ।

भेदगणनाविधयः –

संस्कृतसाहित्ये छन्दसां भेदज्ञानार्थं, ग्रहयोगानां संख्याज्ञानार्थं, काव्येषु भेदसंख्याज्ञापनार्थं अपि च जीवने कस्मिन् अपि क्षेत्रे वस्तूनां एक-द्वि-त्रि-चतुर्-पञ्चादियोगैः संख्या ज्ञानार्थं च द्वौ विधी एव विशेषतः उपयुज्येते । प्रथमो विधिः खण्डमेरुविधिः भवति, पताकाविधिः इत्यपि अस्य नामान्तरम् । द्वितीयो विधिः भास्कराचार्येण पाटीगणिते उक्तः ।

(क) पताकाविधिः – उदाहरणार्थं चन्द्रात् द्वितीये द्वादशे वा भावे भौमादयः पञ्चग्रहाः योगकारकाः सन्ति । एतेषां भेदानां गणना करणीया चेत् एकग्रहस्य पञ्च योगाः भवन्ति तदा ग्रहद्वययोगात् दशयोगाः इत्यादय आहत्य कियत् संख्याकाः योगाः भविष्यन्ति? एतदर्थं यावती अधिकतमा संख्या स्यात्, तावत् संख्यार्यन्तं १,२,३,४..... इत्यादयः लेखनीयाः । तदधोभागे प्रथमाङ्कं अग्रिमाङ्कं योजयित्वा लेखनीयम् । एवं प्रकारेण यदा अधः पङ्क्त्यां एकशेषः नागच्छेत् तावत्पर्यन्तं अनेन क्रमेण लेखनीयम् । यदा एकशेषः प्राप्यते तदा सर्वासां पङ्क्तीनाम् अन्तिमसंख्यायाः योगः भेदं ज्ञापयति ।

पताकासदृशाकृतिकारणात् पताकाखण्डमेरु इति अस्य नामकरणं जातम् ।

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| एकस्मात् ग्रहात् उत्पन्नो भेदः | १ | २ | ३ | ४ | ५ | = | ०५ |
| द्वाभ्यां ग्रहाभ्याम् उत्पन्नो भेदः | १ | ३ | ६ | १ | ० | = | १० |
| त्रिभ्यः ग्रहेभ्यः उत्पन्नो भेदः | १ | ४ | १ | ० | - | = | १० |
| चतुर्भ्यः ग्रहेभ्यः उत्पन्नो भेदः | १ | ५ | - | - | - | = | ०५ |
| पञ्चभ्यः ग्रहेभ्यः उत्पन्नो भेदः | १ | - | - | - | - | = | ०१ |
| योगः | | | | | | = | ३१ |

**(क) भास्करोक्तविधिः –**

भास्कराचार्येण एतस्याः गणनायाः कृते सरलतमोपायः निर्दिष्ट तद्यथा –

एकाद्येकोत्तरा अङ्का व्यस्ताः भाज्याः क्रमस्थितैः ।
परः पूर्वेण सङ्गुण्यस्तत्परस्तेन तेन च ॥

एक द्वित्र्यादिभेदाः स्युरिदं साधारणं स्मृतम् ।

अर्थात् या योगकारकग्रहसंख्या भवति तस्या संख्यायाः विपरीतक्रमेण भाज्यं तथा क्रमेण भाजकं स्थापयित्वा भिन्नक्रमेण भेदज्ञापनं ज्ञायते ।

अत्र ग्रहाणां संख्या पञ्च अस्ति तस्मात् आदौ वामक्रमेण तेषां संख्या लेखनीया तथा च अधोभागे सम्यक् अनुलोमेन सा एव संख्या क्रमशः लेखनीय । यथा –

| | | | | | |
|---|---|---|---|---|---|
| ५ | ४ | ३ | २ | १ | |
| १ | २ | ३ | ४ | ५ | |
| ५ | २० | ३० | २० | ५ | |
| | २ | ३ | ४ | ५ | |
| ५ | १० | १० | ५ | १ | =३१ योगः |

अत्र प्रथमस्थाने अंशस्थाने स्थितमङ्कं भाज्येन विभजेत्, लब्धिञ्च अधः विलिखेत् । यथा – ५/१=५ तदा पञ्चग्रहाणां पञ्चभेदाः प्राप्ताः । अग्रिमां संख्यां लब्ध्या संगुण्य भाज्येन विभजेत् यथा ५x४/२=१० तदा द्वयोर्ग्रहयोः भेदाः प्राप्ताः । एवमेव अग्रेऽपि १०x३/३=१० त्रयाणां ग्रहाणाम् इमे भेदाः लभ्यन्ते ।

पुनः १०x२/४=५ पञ्चभेदाः। चतुर्ग्रहाणाम् एते भेदाः सम्भवन्ति । एवं ५x१/५=१ इत्थं पञ्चग्रहाणां भेदाः प्राप्ताः। तदा आहत्य संख्या ५+१०+१०+५+१=३१ एकत्रिंशत् संख्याकाः भेदाः सिद्ध्यन्ति ।

अतः वक्तुं शक्येत यत् अनफायाः एकत्रिंशत् भेदाः सन्ति, पुनश्च सुनफायाः अपि एकत्रिंशत् संख्याकाः भेदाः सन्ति ।

अनफायोगः –

आचार्यमीनराजमतेन यदि चन्द्रात् द्वादशस्थाने सूर्यमतिरिच्य कोऽपि ग्रहः अधिकाः ग्रहाः वा स्युः तदा अनफानामकः चान्द्रयोगः सम्भवति । अस्य प्रभावः योगकारकग्रहस्य तथा च चन्द्रस्य रूप-शील-गुणाधारेण भवति । उक्तञ्च –

**सूर्यं विना रात्रिपतेर्व्ययस्थो यदा ग्रहः स्याद् बहवोऽथवा स्युः ।**
**स्यातामथ द्वौ त्वनफाख्ययोग उत्पद्यते रूपगुणप्रमाणः ॥**

एकेन ग्रहेण कृतः अनफायोगः –

चन्द्रात् द्वादशस्थाने एकाकी भौमस्य स्थित्या जातकः प्रचण्डस्वभाववान् दृढकायः सन् परद्रव्यं मुष्णाति, चन्द्राद्द्वादशे बुधस्य स्थित्या मानवः हर्षान्वितः विद्यासम्पन्नः शास्त्रज्ञश्च भवति । उक्तञ्च –

**भौमे व्ययस्थे शशिनः प्रचण्डो भवेन्मनुष्यः परवित्तहारी ।**
**हन्ता परेषामतिपुष्टकायः शौर्यान्वितः प्राणधरो गुरुश्च ॥**
**चन्द्रस्य सौम्ये व्ययगे प्रसन्नो विद्याधिकः शास्त्रपरः सदैव ।**
**विभुः प्रतापी प्रमदानुकूलः प्रभूतमित्रः प्रणतारिपक्षः ॥**

चन्द्राद्द्वादशे गुरोः स्थित्या मानवः धर्मपरायणः, राजप्रियः, सुन्दरदेहयुक्तश्च भवति । शुक्रस्य स्थित्या प्रियवक्ता, शनेः स्थित्या स्थूलकायः शत्रुनाशकश्च भवति ।

**द्वाभ्यां ग्रहाभ्यां कृतः अनफायोगः –**

यदि भौमबुधौ अनफायोगकारकौ भवतः तदा मानवः विद्वेषहीनः भवति । भौमगुरू चेत् नानावाहनयुक्तः, भौमशनी चेत् शत्रुजेता च भवति । चन्द्रात् व्ययभावे गुरुशुक्रौ भवतः तदा मानवः पितृभक्तः शास्त्रप्रियश्च भवति ।

त्रिभ्यः ग्रहेभ्यः कृतः अनफायोगः –

**जीवारसौम्या व्ययगा यदा स्युश्चन्द्रस्य कुर्युः प्रणतं मनुष्यम् ।**
**नृपप्रियं सर्वकुलप्रधानं प्रजाधिकं कीर्तिसमन्वितं च ॥**

यदि भौमबुधगुरवः अनफायोगकारकाः स्युः तदा मानवः विनम्रः, कुले प्रधानश्च भवति ।

चतुर्ग्रहकृतम् अनफायोगफलम् –

भौमबुधगुरुशुक्राः योगकारकाः भवेयुः तदा जातकः सर्वकलासु निपुणः भवति । अत्र शुक्रस्थाने शनिर्भवति चेत् जातकः शत्रुहन्ता भवति । बुधगुरुशुक्रशनयः अनफायोगकारकाः भवन्ति चेत् जातकस्य भार्या विदुषी भवति । उक्तञ्च –

**शुक्रजीवार्कसुता व्ययस्थाश्चन्द्रस्य कुर्युर्व्यसनैर्विमुक्तम् ।**
**नरं प्रसूते प्रियवाक्यदक्षं विदग्धनारीसहितं सदैव ॥**

पञ्चग्रहकृतः अनफायोगः –

मीनराजेन उक्तं यत् पञ्चग्रहाः योगकारकाः स्युः तदा जातकः लोकप्रियः नेता च भवति । तद्यथा -सुरेज्यशुक्रज्ञशनैश्चराराश्चन्द्राद्व्ययस्थाः सततं च कुर्युः ।

**प्रभूतभावं हतशत्रुदर्पं नितान्तं जनसम्मतं च ॥**

सुनफायोगस्य ज्ञानम् –

चन्द्रात् द्वितीयस्थाने सूर्यं विहाय यदि एकः ग्रहः स्यात् वा क्रमशः द्वौ ग्रहौ स्तः त्रयग्रहाः पञ्च वा स्युः तदा सुनफा नामा योगः भवति ।

उक्तञ्च –

**सूर्यं विना रात्रिपतेर्धनस्थो यदा ग्रहः स्याद् बहवोऽथवा स्युः ।**
**स्यातामथ द्वौ सुनफाख्ययोगः उत्पद्यते रूपगुणैः सदैव ॥**

एकग्रहकृतसुनफायोगः –

यदि भौमः सुनफायोगकारकः भवति तदा मानवः बहुधनिकः भवति । बुधः योगकारकः भवति तदा मानवः समाजे मानं प्राप्नोति । गुरुः योगकारकः भवति चेत् साधुजनेषु पूजनीयः भवति । शुक्रः भवति चेत् अद्भुतं कार्यं करोति मानवः, नाम प्रतिभासम्पन्नः भवति । शनियोगकारकः भवति चेत् बहु अश्वगजवाहनयुक्तः मानवः भवति । उक्तञ्च –

चन्द्रस्य सौरो यदि वित्तसंस्थो नरं विधत्ते बहुलाभभाजम् ।
प्रभूतहस्त्यश्वगणैः समेतं कुलप्रधानं शुभकर्मरक्तम् ।

द्वाभ्यां ग्रहाभ्यां कृतः सुनफायोगफलम् –

यदि भौमबुधौ सुनफायोगकारकौ भवतः तदा जातकः दम्भी, मितव्ययी च भवति । भौमगुरू योगकारकौ भवतः तदा धार्मिकः, भौमशुक्रौ योगकारकौ भवतः तदा जातकः पराक्रमी, भौमशनी सुनफायोगं कुरुतः तदा जातकः अत्यधिकः प्रभावयुक्तः धनिकश्च भवति ।

बुधगुरू च सुनफायोगकारकौ भवतः चेत् जातकः जगति प्रसिद्धः भवति । बुधशनी च योगकारकौ भवतः तदा मानवः जितेन्द्रियः भवति । गुरुशनी सुनफायोगकारकौ भवत चेत् बहुसुवर्णधनयुक्तः नरः भवति। शनिशुक्रौ सुनफायोगं कुरुतः तदा मानवः बहुनगराणां प्रमुखः भवति । उक्तञ्च –

**धनस्थितौ शुक्रदिनेशपुत्रौ चन्द्रस्य धतो धनपुत्रदारान् ।**
**गुणानुरागं प्रियतां च लोके सुशीलतां भूरिपुराधिपत्यम् ॥**

त्रिभ्यः ग्रहेभ्यः कृतः सुनफायोगः –

चन्द्रात् द्वितीये स्थाने भौमबुधगुरवः स्युः तदा मानवः नेता भवति । गुरुस्थाने शुक्रः भवति चेत् योगोऽयं सञ्जायते । भौमगुरुशुक्राः योगकारकाः स्युः तदा मानवः वीरपुरुषः भवति । बुधशुक्रशनयः सुनफायोगकारकाः भवन्ति चेत् राजसम्मानं प्राप्य जातकः लोकप्रियो भवति ।

उक्तञ्च –

**शुक्रज्ञसौरा यदि वित्तसंस्थाश्चन्द्रस्य कुर्वन्ति कलत्रभाजम् ।**
**नरेन्द्रपूज्यं प्रियतां च लोके तीर्थानुरागं सततं नराणाम् ॥**

चतुर्ग्रहकृतसुनफायोगः –

यदि भौमबुधगुरुशुक्राः सुनफायोगकारकाः भवन्ति तदा मानवः स्मृतिज्ञाता भवति शास्त्रवेत्त च भवति । चतुर्ग्रहकृतसुनफायोगो मानवः राजतुल्यः सन् सुखं प्राप्नोति मान्वः सत्यवादी समृद्धियुक्तश्च भवति । उक्तञ्च –

**सुरेज्यशुक्रज्ञदिनेशपुत्रा धनाश्रिता रात्रिपतेर्नराणाम् ।**
**कुर्वन्ति राज्यं बहुवित्तलाभं सुसत्यतां भोगविवृद्धिमेव ॥**

आचार्यवराहमिहिरेण तु सुनफा-अनफा-दुरुधरायोगानां ग्रहाधारेण एकमेव फलम् उक्तम् । भौमादिग्रहाणां सुनफा योगे यत् फलं कथितं तदैव अनफादिफलं वर्णितम् । परञ्च

यवनाचार्येण मीनराजेन तु पृथक्-पृथक् ग्रहाणां युतिभेदेन फलं कथितं वृद्धयवनजातके। इत्थं सिद्ध्यति यत् यवनाः एव योगानां विषये प्रचारं प्रसारञ्च कृतवन्तः । यद्यपि इमे चान्द्रयोगाः बहुनां जनानां भवति चन्द्रस्य स्थानानुरोधेन एते योगाः विद्यन्ते । पुनश्च मीनराजेन उक्तं यत् "योगः उत्पद्यते रूपरगुणप्रमाणः" ग्रहाणां स्थानानुरोधेन योगानां फलं भवति । पुनश्च अत्र ज्ञातव्यं भवति यत् पूर्वजन्मकृतकर्मणामाधारेण सर्वविधफलं सञ्जायते ।

उक्तञ्च वराहमिहिरेण –

**"कर्मार्जितं पूर्वभवे सदादि यत्तस्य पक्तिं समभिव्यनक्ति ॥"**

अतः सिद्ध्यति यत् ज्योतिषमाधारीकृत्य सुनफाऽनफादियोगानां फलमपि मानवेषु विभिन्नरूपेण भवति इति शम् ।

सन्दर्भग्रन्थाः –

१. वृद्धयवनजातकम्, ग्रन्थकारः – मीनराजः, सम्पादकः – डा. सुरेशचन्द्रमिश्रः, रञ्जनपब्लिकेशन्स, नईदिल्ली – २०१०

२. बृहज्जातकम् – वराहमिहिरः, सं – केदारदत्तजोशी, मोतीलालबनारसीदास दिल्ली, २००२

३. सारावली – कल्याणवर्मा, सं – डा. मुरलीधरचतुर्वेदी, मोतीलालबनारसीदासः, दिल्ली, २००७

४. लीलावती, श्रीभास्कराचार्यः सं- श्री लषणलालझा चौखम्बा विद्याभवन वाराणसी,२००८

*************

# अयनांशाः

**डा. रमानन्दभट्टः**
फलितज्यौतिषविभागः
रा.सं.सं. राजीवगान्धीपरिसरः, शृङ्गेरी

**अमलकमलसंस्था लेखनीपुस्तकोद्यत्करयुगलसरोजा कुन्दमन्दारगौरा ।**
**धृतशशधरखण्डोल्लासिकोटीरचूडा भवतु भवभयानां भङ्गिनी भारती नः ॥**

प्रसिद्धमिदं श्रूयते - "**भानोर्मकरसङ्क्रान्तेः षण्मासा उत्तरायणम् । कर्कादेस्तु तथैव स्यात् षण्मासा दक्षिणायनम्**" ॥ इति । मकरादिराशिषट्के वर्तमाने रवौ उत्तरायणमिति, कर्कादिषट्के वर्तमाने दक्षिणायनमिति । किन्तु अत्रैव सन्देहः मकरादौ वा कर्कादौ कदा वस्तुतो रविर्भवति इति । परमदक्षिणदिग्गतस्य रवेः उत्तरदिग्गमनारम्भो यदा भवति तदैव उत्तरायणारम्भः । अतः परमां दक्षिणां यदा गतवान् तद्दिने दिनमल्पम् । रात्रिश्च महती । यदा तु परमोत्तरगतस्य रवेः दक्षिणदिग्गमनारम्भः तदैव दक्षिणायनारम्भः । तद्दिने दिनमधिकम् । रात्रिस्तु लघ्वी । सम्प्रति एतद्दिनद्वयं भवति क्रमेण Dec 21 तथा June 21 । एताभ्यां परस्मिन् दिने एव अन्यस्य अयनस्यारम्भो भवति । किन्तु अस्माभिः उक्तदिनाभ्यां परं प्रायः २४ दिनेभ्यः परम् अयनारम्भः गण्यते । अत्र अन्तरे कारणम् अयनांशाः एव । एवमयनव्यत्यये कारणस्थाने यद्वर्तते तदेव अयनांशशब्देन कथ्यते । तत्स्वरूपादिकमग्रे प्रपञ्चयिष्यामि ।

भूमेः दूरवर्तिनि क्रान्तिसंज्ञके वृत्ते ग्रहस्थानं कल्प्यते प्राचीनैः । इदं च वृत्तं भगणाङ्कितम् । अर्थादस्मिन्नेव वृत्ते नक्षत्राणां सन्निवेशः । बहूनां नक्षत्राणां सत्त्वेऽपि क्रान्तिवृत्तसमीपवर्तीनि सप्तविंशतिर्भानि प्राचीनैः अङ्गीकृतानि । "**न क्षरतीति नक्षत्रम्**" इति नक्षत्रपदार्थः । प्रभावान् गतिरहितो बिम्बः नक्षत्रम् । निश्चलत्वं नक्षत्राणां स्वभावः । अतः एतान् स्थिरबिन्दून् नक्षत्राणि क्रान्तिवृत्ते चिह्नयित्वा एतद्द्वारा "एतस्मिन् नक्षत्रे अमुकग्रहस्य स्थितिः" इति निरूपयन्ति प्राचीनाः । एवं ग्रहस्थाननिरूपणार्थं नक्षत्राणां महान् उपयोगः । किन्तु ग्रहस्थानं कुतः आरभ्य सूचितम् ? । यतः वृत्ते ग्रहस्थानसूचनार्थं वृत्तस्य आरम्भस्थानं ज्ञातव्यं भवति । अस्मादारम्भबिन्दोः अस्य ग्रहस्य इयं स्थितिः इति वक्तव्यं भवति । यद्यपि यस्मिन्कस्मिंश्चिदपि वृत्ते आरम्भबिन्दुर्न वक्तुं शक्यते । यदि शक्येत तर्हि स तद्वक्त्रधीनः । अतः अस्मिन्नपि क्रान्तिवृत्ते आरम्भस्थाननिर्णये, ततः ग्रहस्थाननिर्धारणे च विषये विद्वांसो विप्रतिपद्यन्ते । अतः अत्रैव किञ्चिद्विचारणा कार्या ।

क्रान्तिवृत्तस्य आरम्भस्थाननिर्धारणे सूर्यसिद्धान्तः प्रमाणं भवति । तत्रोक्तं -

"**पौष्णान्ते भगणः स्मृतः**[१]" इति । रेवतीनक्षत्रस्य अन्त्ये चक्रसमाप्तिः । अस्य अयमेव अर्थो यत् रेवत्यन्तम् अर्थात् अश्विन्यारम्भ एव चक्रारम्भबिन्दुः । एवं भगवद्वचनबलादस्मिन् क्रान्तिवृत्ते सर्वैरपि अश्विनी आरम्भस्थानमित्यङ्गीकृतम् । अस्मात् पौष्णान्तस्थानाद् ग्रहस्थितिकथनं निरयणमिति कथ्यते ।

तर्हि निरयणशब्दश्रवणेन अन्यत् सायनमिति भवितुमर्हति इति ज्ञायते । गोलमध्ये वर्तमानस्य नाडीवृत्तस्य सूर्यसञ्चारवृत्तस्य क्रान्तिवृत्तस्य च सम्पातः अथवा परस्परं छेदो भवति । एतयोः मध्ये विद्यमानं याम्योत्तरमन्तरं क्रान्तिशब्देन व्यवह्रियते । अत्र परमा क्रान्तिर्भवति २४° । नवीनमते तु २३°-३०' । अर्थात् क्रान्तिमण्डलनाडीमण्डलयोः परमान्तरं भवति २४° । एवं यत्र एतयोः उभयोः मण्डलयोः सम्पातो जातः (सम्पातस्तु सृष्ट्यादौ अश्विन्यारम्भे एव आसीत्[२]) तत् सम्पातस्थानमपि चलितं दृश्यते । सम्प्रति इदं सम्पातस्थानं पश्चाच्चलितम् उत्तराभाद्रायाः प्रथमचरणे वर्तते अर्थात् स्थानमिदं २४° प्रमाणेन पश्चाद्गतम् । एवम् एतयोः चलस्थिरबिन्द्वोः (पौष्णान्तस्य वा सृष्ट्यादिसम्पातस्थानस्य तथा इदानीन्तनसम्पातस्थानस्य च इत्यर्थः) अन्तरमेव अयनांशाः इति कथ्यन्ते । अस्य वार्षिकीगतिः अत्यल्पा, केवलं ५० विकलामिता । साम्प्रतिकायनांशाः दृग्गणितरीत्या २४°-०६' भवन्ति । एवं स्थिरमेषादितः राशिकल्पनायाः निरयनक्रम इति, चलमेषादितः राशिकल्पनायाः सायनक्रम इति च नाम । अयमेव अयनांशः भास्कराचार्यैः क्रान्तिपातः इति कथितः "**विषुवत्क्रान्तिवलययोः सम्पातः क्रान्तिपातः स्यात्**[३]" इति । "**क्रान्त्यर्थं पातः क्रान्तिपातः । पातो नाम सम्पातः । कयोः । विषुवत्क्रान्तिवलययोः । न हि तयोर्मेषादावेव सम्पातः । किन्तु तस्यापि चलनमस्ति । येऽयनभागाः प्रसिद्धास्त एव विलोमगस्य क्रान्तिपातस्य भागाः । मेषादेः पृष्ठतः तावद्भागान्तरे क्रान्तिवृत्ते विषुवद्वृत्तं लग्नमित्यर्थः**" इति भास्करः तदर्थमाह ।

किन्तु अस्य अयनांशस्य निर्णयः न सुलभः । शून्य-अयनांशकालनिर्णये कालभेदः, रेवतीयोगतारानिर्णये मतभेदः, पौष्णान्तस्थाने अनिर्णयः इत्येतैः कारणैः अयनांशे भेदो दृश्यते । अत्र प्रधानतया पक्षद्वयं दृश्यते । प्रथमो रैवतपक्षः । पौष्णान्ते भगणः स्मृतः इति भगवद्वचनात् पौष्णान्तं निर्धार्य तदनुगुणम् अयनांशनिर्धारः अनेन क्रियते । किन्तु अत्र पौष्णान्तनिर्धारे क्लेशः । रेवतीनक्षत्रपुञ्जे ३२ नक्षत्राणि सन्ति । अत्र

---

[१] सूर्यसिद्धान्तः १.२७ ।

[२] "सृष्ट्वा भचक्रं कमलोद्भवेन ....." इत्यादौ वासनावाक्यं द्रष्टव्यम् । सिद्धान्तशिरोमणिः गणिते मध्यमाधिकारे कालमाने - १३ ।

[३] सिद्धान्तशिरोमणिः गोलः - गोलबन्धाधिकारे १७ ।

ISSN 2249-538X

योगतारा का इत्यत्र विदुषो विप्रवदन्ते । रेवतीयोगतारा तु पौष्णान्तात्पूर्वमेव वर्तते[१] इत्यतः एतैः हेतुभिः अयनांशे भेदः किञ्चिद्दृश्यते । एवं रेवत्यन्तेन अयनभागसाधनपक्ष एव रैवतपक्षः इत्युच्यते ।

द्वितीयो भवति चैत्रपक्षः । शोभमानं चित्रनक्षत्रमाश्रित्य तुलासम्पाततः अयनांशगणनापक्षः चैत्रः । अस्य पक्षस्य आधारविषये किञ्चिद्वक्तव्यम् । वेदाङ्गज्यौतिषे लगधप्रणीते तत्काले उत्तरायणारम्भबिन्दुः धनिष्ठाद्ये आसीदित्युक्तं दृश्यते ।

**प्रपद्येते श्रविष्ठादौ सूर्याचन्द्रमसावुदक् ।**
**सार्पार्धे दक्षिणार्कस्तु माघश्रावणयोस्तथा**[२] ॥ इति ॥

---

[१] "भरण्याग्नेयपित्र्याणां रेवत्याश्चैव पश्चिमा" - (सूर्यसिद्धान्तः भग्रहयुत्यध्याये - १८) ।

[२] वेदाङ्गज्यौतिषम् - ६ । वैदिककाले तु यदा उत्तरायणारम्भः तदैव वर्षारम्भः । तच्च आर्चज्योतिषे - "स्वराक्रमेते सोमार्कौ यदा साकं सवासवौ । स्यात्तदादियुगं माघस्तपः शुक्लोऽयनं ह्युदक्" ॥ इति ॥५॥ पुनः दशमश्लोके भाष्ये गर्गः - "यदा माघस्य शुक्लस्य प्रतिपद्युत्तरायणम् ।
सहोदयं श्रविष्ठाभिः सोमार्कौ प्रतिपद्यतः ॥
तदा नभस्यसप्तम्यां क्रियते दक्षिणायने ।
सार्पार्धे कुरुते युक्तिं चित्रायुक्तनिशाकरे ॥ इति ॥

इदानीन्तु चैत्रतः वर्षारम्भो दृश्यते । चैत्रादिगणने प्रामाणं तु शिरोमणौ भास्करः "लङ्कानगर्यामुदयाच्च भानोः ..... मधोः सितादेर्दिनमासवर्षयुगादिकानां युगपत्प्रवृत्तिः" इति कल्पादौ चैत्रशुक्लप्रतिपदित्याह (सिद्धान्तशिरोमणिः गणिते मध्यमाधिकारे कालमाने - १५ )।
अमरेऽपि - "द्वौ द्वौ मार्गादिमासौ स्यादृतुस्तैरयनं त्रिभिः ।
अयने द्वे गतिरुदक्दक्षिणार्कस्य वत्सरः" ॥कालवर्गे - १४१॥ अयनारम्भे वर्षारम्भस्य प्रमाणम् - "ऋतुभिर्हि संवत्सरः शक्नोति स्थातुम्" । "सवसन्ति ऋतवो यत्र स संवत्सरः" । पुनः अत्र पराशरतन्त्रे - "श्रविष्ठाद्यात् पौष्णान्तं चरतः शिशिरः । वसन्तः पौष्णान्ताद्रोहिण्यन्तम् । सौम्याद्यात् सार्पार्धं ग्रीष्मः । प्रावृट् सार्पार्धाद्धस्तान्तम् । चित्राद्यादिन्द्रार्धं शरत् । हेमन्तो ज्येष्ठार्धाद्वैष्णवान्तमिति" (बृ.सं व्याख्याने आदित्यचारे - १) । ऋतवः सौराः । मीनमेषोर्वसन्तः इत्यादिवचनं प्रसिद्धम् । "वर्षायनर्तुयुगपूर्वकमत्रसौरात् ..." (सिद्धान्तशिरोमणिः गणिते मध्यमाधिकारे कालमाने - ३१) इति भास्करवचनमपि प्रसिद्धम् । ऋतूणां चान्द्रत्वमपि कथितं दृश्यते । पं श्री. सीताराम झा विरचितायां ज्योतिषरत्नमालायां "मीनादिद्विद्विराशिस्थे सूर्ये षट् चर्तवः स्मृताः । क्रमाद्वसन्तो ग्रीष्मश्च वर्षर्तुश्च शरत् तथा ॥ हेमन्तः शिशिरश्चेति विज्ञेयाः सौरमानतः । एवं चैत्रादिमासाभ्यां द्वाभ्यां द्वाभ्यां तथैन्दवाः" इति "चैत्रादिद्विद्विमासाभ्यां वसन्तादृतवश्च षट् । दाक्षिणात्याः प्रशंसन्ति दैवे पैत्र्ये च कर्मणि" (पृष्ठसं २०) इति लिखितमपि चिन्त्यम् ॥
"तेषां च सर्वेषां नक्षत्राणां कर्मसु कृत्तिकाः प्रथमम् आचक्षते । श्रविष्ठा तु सङ्ख्यायाः" इति वेदकाले स्वतन्त्रे द्वे गणने । किन्तु यदि धनिष्ठाद्ये अयनारम्भः कथ्यते तर्हि कृत्तिकातः गणनापद्धतिं सायनगणना इति वक्तुं न शक्यते । तदा भरणीचतुर्थचरणे सम्पातो वर्तेत । अतः कृत्तिकासम्पातः वेदकालिकः । धनिष्ठाद्ये अयनप्रवृत्तिः वेदाङ्गज्योतिषकालिकः । केतक्यामपि "कृत्तिकासम्पातकाले उदगयनं माघपौर्णिमायाम् । वेदाङ्गज्योतिषे उदगयनं श्रविष्ठादौ माघप्रतिपदि" इति लिखितम् । पुनः कृत्तिकागणने प्रमाणम् - "मुखं वा एतन्नक्षत्राणां यत्कृत्तिकाः" । "देवगृहा वै नक्षत्राणि" । "प्रजापतिर्देवताः सृजमानः अग्निमेव देवतानां प्रथममसृजत" (तै ब्रा २.१.७)।

मिहिरोऽपि एतत्कथयति -

**आश्लेषार्धाद्दक्षिणमुत्तरमयनं रवेर्धनिष्ठाद्यम् ।**
**नूनं कदाचिदासीद्येनोक्तं पूर्वशास्त्रेषु**[१] **॥**

एवं वेदकाले उत्तरायणारम्भबिन्दुः धनिष्ठाद्ये दक्षिणायनबिन्दुः आश्लेषार्धे चासीत् ।

अर्वाचीनैः ज्योतिर्विद्भिः श्रीमद्भिः वेङ्कटेशकेतकर्-वर्यैः अयं पक्षः उपस्थापितः । चित्रनक्षत्रभोगं ज्ञात्वा ततः चलशरत्सम्पातस्थानपर्यन्तं विद्यमानमन्तरमत्र गृहीतम् । चित्रनक्षत्रभोगस्तु "**अर्धात्मभागे**[२]" इत्यनेन भगणदलसमः कथितो वर्तते पञ्चसिद्धान्तिकायां सौरेऽपि । एतदार्षमतमुररीकृत्य केतक्कर्-वर्यैरपि चित्रनक्षत्रं तु क्रान्तिवृत्ते अश्विन्यादितः १८०° अन्तरे भवतीत्यङ्गीकृतम् । अस्मिन् चित्रनक्षत्रमण्डले केवलमेकमेव नक्षत्रमित्यतः इदं सदा रोचमानं तिष्ठतीत्यतः रोचमानामिमां चित्रामाश्रित्य अयनांशः कथनम् अत्यन्तं युज्यते । अतः क्रान्तिविषुवयोः द्वितीयसम्पातात् चित्रानक्षत्रस्य तथा चलतुलासम्पातस्य च अन्तरे अयनांशाः भवन्तीति कथनं स्पष्टायनांशसाधने प्रशस्तो मार्गः बहुभिरादृतश्चायम् ।

अस्य मतस्य सनातनत्त्वम् उपपादयितुं बहुधा प्रमाणानि प्रदर्शितानि केतक्कर्-वर्यैः । अयनांशस्तु उभयथा साधयितुं शक्यते । ते च मेषसम्पातात् तुलासम्पाताद् वा साध्यन्ते । तत्र भास्कराचार्याः आहुः - "**एवं विध्यता यस्मिन् दिने सम्यक् प्राच्यां रविरुदितो दृष्टः तद्विषुवद्दिनम्**[३] **। तस्मिन् दिने गणितेन स्फुटो रविः कार्यः । तस्य रवेर्मेषादश्च यदन्तरं तेऽयनांशा ज्ञेयाः । एवमुत्तरगमने सति । दक्षिणे तु तस्यार्कस्य तुलादेश्च अन्तरम् अयनांशाः**[४]" इति । एवं वसन्तसम्पातात् मेषसम्पाताद्वा अश्विन्यारम्भो यावतान्तरेण भवति तदन्तरमेव अयनांशाः । अथ वा शरत्सम्पातात्तुलासम्पाताद्वा चित्रानक्षत्रं यावतान्तरेण भवति ते वा अयनांशाः भवन्ति । लगधमहात्मना प्रोक्ते आर्चज्योतिषे "**वसुस्त्वष्टा भवोऽजश्च**", "**उदया वासवस्य स्युः**", "**स्वराक्रमेते सोमार्कौ**", "**प्रपद्येते श्रविष्ठादौ**[५]" इत्यादिवचनैः नक्षत्रचक्रे धनिष्ठा प्रथमेत्युदीरितम् । वसुदेवताकमिदं नक्षत्रं चतुस्तारकमित्यतः [६] "**श्रविष्ठायास्तु पश्चिमा** [१]" इति इत्युक्तधनिष्ठायोगताराग्रहणेन

---

[१] बृहत्संहिता - आदित्यचारे - १ ।

[२] "पित्र्यस्य स्वक्षेत्रे षष्ठे चांशे समायोगः । चित्रार्धात्मभागे दक्षिणतः संस्थिते त्रिभिर्हस्तैः" ॥ - केतक्याम् उद्धृतः पञ्चसिद्धान्तिकाश्लोकः - ५ ।

[३] "समरात्रं दिवे काले विषुवद्विषुवं च तत्" इत्यमरः । सायनमेषादौ सायनतुलादौ वा वर्तमाने रवौ विषुवद्दिनम् अमरः - कालवर्गे १४२ ।

[४] सिद्धान्तशिरोमणिः - पाताधिकारे २ ।

[५] आर्चज्योतिषम् - क्रमेण २९, ९, ५, ६ ।

[६] "चतस्रो देवीरजराः श्रविष्ठाः" (तै.ब्रा ३-१-२), "चतुस्ताराण्याषाढे मैत्रं पौष्णं सवासवम्" (वृद्धगर्गसंहिता) ।

अश्विनीस्थानं निर्धार्यते । अतः अस्याः श्रविष्ठायाः अग्रे नक्षत्रपञ्चकान्तरे पौष्णान्तेन वा अश्विमुखेन भाव्यम् । एकनक्षत्रप्रमाणं सत्र्यंशत्रयोदशलवाः (१३°-२०') भवन्ति । अतः (एतत् पञ्चभिः गुणिते) चत्वारिंशत्कलाधिकषट्षष्टिभागैः (६६°-४०') अश्विन्यारम्भेण भाव्यम् । अर्थात् धनिष्ठानक्षत्रादेतावदन्तरे अश्विन्यारम्भः तिष्ठतीति । पुनः तस्मादारम्भस्थानात् १८०° मितान्तरे चित्रानक्षत्रं नितान्तं रोचमानं तिष्ठति । एवं वैदिकधनिष्ठाप्रयुक्तस्य अश्विन्यारम्भस्य सम्मुखमेव चित्रा तिष्ठतीति चित्रासकाशाद् अयनांशसिद्धेः सनातनत्वं सहजमेव । एवं पौष्णान्तस्य ज्ञापनार्थं प्रथमं धनिष्ठा, द्वितीयं चित्रेति ज्ञापकद्वयमाश्रित्य वैदिकधनिष्ठाप्रयुक्त - अश्विन्यारम्भसम्मुखचित्रायाः सकाशादयनांशाः साधिताः । अयं चैत्रः पक्षः । बहुभिः अयं पक्षः समाश्रितः ।

अर्वाचीनविद्भिः रामन्-कृष्णमूर्तिप्रभृतिभिः अयनांशशून्यकालं ज्ञात्वा ततः तद्वार्षिकगत्या इष्टकालपर्यन्तम् अयनांशाः साधिताः । तत्र मिहिरस्य कालः (प्रायः ४४५ शकः) अयनांशशून्यकालो भवति । यतस्तेनैव संहितायम् - "**साम्प्रतमयनं सवितुः कर्कटाद्यं मृगादितश्चान्यत्**[२]" इति ।

**अयनगतेः प्रत्यक्षोपलब्धिः**

अयनचलनं प्रत्यक्षमुपलभ्यते । तदुक्तं सूर्यसिद्धान्ते -

**स्फुटं दृक्तुल्यतां गच्छेदयने विषुवद्वये ।**
**प्राक् चक्रं चलितं हीने छायार्कात् करणागते ॥**
**अन्तरांशैरथावृत्य पश्चाच्छेषैस्तथाधिके**[३] **।**

अयनगतिः दृक्तुल्यतां गच्छति । कदा इत्युक्ते दक्षिणोत्तरायनयोः, तथा विषुवद्वये । यत्र बिन्दौ परमां दिशं गतो रविः तत्प्रतिकूलदिशि परावर्तितो भवति स एव अयनादिबिन्दुः । यस्मिन् दिने रविः सम्यक् प्राच्यामुदितो दृष्टः तद्दिनमेव विषुवद्दिनम् । एवं विषुवत्क्रान्तिवलययोः अन्तररूपक्रान्तेः प्रवृत्तिः सम्पातबिन्दुतो भवति । अतः विषुवद्दिने क्रान्त्यभावः । अयनदिने क्रान्तिस्तु परमा । अतः सायनमेषतुलामकरकर्कटस्थे दिवाकरे छायातः रविं तथा अहर्गणभवमपि रविं साधयित्वा प्रत्यक्षम् अयनगतिः ज्ञातुं शक्यते । उक्तदिने उक्तक्रमेण साधितयोः छायार्ककरणार्कयोः अन्तरांशाः एव अयनांशा भवन्ति ।

---

मुहूर्तचिन्तामणौ - "त्रित्र्यङ्गपञ्चाग्निकुवेदवह्नयः शरेषुनेत्राश्विशरेन्दुभूकृताः । वेदाग्निरुद्राश्वियमाग्निवह्नयोऽब्धयः शतं द्विद्विरदा भतारकाः ॥ २-५८ ।

[१] सूर्यसिद्धान्तः - भग्रहयुत्यधकारः - १७ ।

[२] बृहत्संहिता - आदित्यचारे - २ ।

[३] सूर्यसिद्धान्तः ३.११,१२ । बृहत्संहितायामपि - "दूरस्थचिह्नवेधादुदयेऽस्तमयेऽपि वा सहस्रांशोः । छायाप्रवेशनिर्गमनचिह्नैर्वा मण्डले महति" ॥ - आदित्यचारे - ३ ।

एवमयनांशस्य स्फुटं दृक्प्रतीतिः एतद्दिनचतुष्टये भवति ।

अयनांशसाधनम्

अयनांशस्य स्फुटप्रतीतिकालः प्रोक्तः । तर्हि इष्टकाले तत्कथं साधयितुं शक्यते इति चेत् सूर्यसिद्धान्ते -

**त्रिंशत्कृत्यो युगे भानां चक्रं प्राक्परिलम्बते ।**
**तद्गुणात् भूदिनैर्भक्ताद् द्युगणाद्यदवाप्यते ॥**
**तद्दोस्त्रिघ्ना दशाप्तांशा विज्ञेया अयनाभिधाः**[1] ॥इति॥

एकस्मिन् महायुगे नक्षत्रचक्रं षड्शतसङ्ख्यातुल्यं प्राक् चलितं भवति । तेन इष्टाहर्गणो गुणनीयः महायुगान्तःपातिकुदिनैः भाज्यः । लब्धस्य भुजः साध्यः । सा भुजमितिः त्रिभिर्गुण्या दशभिर्भाज्या । लब्धिः अयनांशाः भवन्ति । सूर्यसिद्धान्ते एवमयनांशसाधनमभिहितम् ।

अत्र त्रिंशत्कृत्य इत्यस्ति । अस्य अर्थकरणे विद्वद्भिः महान् प्रयासो विहितः । त्रिंशद्गुणितः कृतिः छन्दोविशेषः तस्याः सङ्ख्या विंशतिः । तयोर्गुणनेन ३०×२०=६०० इति गृहीतम् । यद्यपि भास्कराचार्यैः "**तद्भगणा सौरोक्ता व्यस्ता अयुतत्रयं कल्पे**" इति कल्पे अयुतत्रयम् इति कथितम् । तदेव महायुगे ३० भवति इत्यतः त्रिंशत्कृत्वः इति युक्तः पाठः इति स्वीकुर्वन्ति । किन्तु एवं कृते लभ्यमाना अयनांशस्य वार्षिकी गतिः केवलं २७ˈ विकलाः अत्यल्पं भवतीति, पुनः सोमरोमकब्रह्मसिद्धान्तानां[2] वसिष्ठवचनस्य[3] च विरोधात्, तद्दोस्त्रिघ्ना दशाप्तांशा इति तत्रैव उक्तस्य गणितस्य अनुपपत्तेः, एवं कृते लभ्यमान-अयनगतेः स्फुटत्वाच्च कृतयः इत्यस्य स्थाने कृत्यः इति स्वीकृतमिति सर्वं निरवद्यम् ।

पुनश्च अत्र प्राक् परिलम्बते इत्युक्तम् । एतदुपलक्षणम् । पश्चादपि चलति इति ज्ञातव्यम् । किन्तु तत्कथमिति सन्देहः । अत्र परिलम्बनशब्दोक्त्या भचक्रपूर्णभ्रमणाभावः प्रतीयते । तर्हि तस्य कीदृशी गतिः । तदग्रे विचार्यते ।

**अयनगतिः**

सूर्यस्य दक्षिणोत्तरगमनं क्रान्तिवृत्ते यस्मिन् बिन्दौ दृष्टं तत्समीपस्थनक्षत्रम् सर्वदा तत्स्थाने न भवति । व्यत्ययो दृश्यते । सर्वैरपि सिद्धान्तिभिः अयनचलने भानां चक्रं प्राक्चलितम् इति उक्तम् । किन्तु भास्कराचार्यैः "**किन्तु तस्यापि चलनमस्ति ।**

---

[1] सूर्यसिद्धान्तः ३.९,१० ।

[2] सोमे - "युगे षड्शतकृत्वो हि भचक्रं प्राग्विलम्बते" । रोमके - "भगणः षड्शतघ्नो ...." । ब्राह्मे - "इत्येतत् प्राक् चलनं युगे तानि च षड्शतम्" । भारतीय ज्योतिष - पृष्ठसं ४३३ ।

[3] "अब्दाः खखर्तुभिर्भाज्याः ....." । सूर्यसिद्धान्तः ३.९,१० (तत्त्वामृतव्याख्यायाम्) ।

**येऽयनभागाः प्रसिद्धास्त एव विलोमगस्य क्रान्तिपातस्य भागाः**" इति पातस्यैव चलनमब्रुवन् । पाश्चात्यैरपि इदमव उक्तम् । तैः विषुवचलनशब्देन एतत्कथितम् । प्रथमतया रवेः अयनव्यत्ययद्वारा एव एतज्ज्ञातमित्यतः अस्य अयनचलनमिति नाम ।

अयनचलनस्य भगणाः प्रोक्ताः बहुभिः । किन्तु तस्य भगणपूर्तिगतिः वा अन्यथा । तत्र उभयथापि गतिः प्रोक्ता । सूर्यसिद्धान्ते तु आन्दोलनगतिः प्रोक्ता वर्तते । तदेवम् - सूर्यसिद्धान्ते प्रोक्तभगणाः महायुगे षड्शतम् (६००) । अथ सृष्ट्यादौ नाडीक्रान्तिवलययोः यः सम्पातः निरयणमेषादिनामा स सम्पातः प्रथमं सप्तविंशतिभागान् पूर्वतो गत्वा ततः परावृत्य स्वस्थानमागत्य पुनः सप्तविंशतिभागान् पश्चाच्चलित्वा ततः परावृत्य पुनः स्वस्थानमेति । तदा एको भगणः भवति । एतादृशभगणाः एकस्मिन् महायुगे ६०० । अत्र अष्टोत्तरशतम् अशानाम् एको भगणः प्रोक्तः । "तद्दोस्त्रिघ्ना दशाप्तांशाः (त्रिभिर्गुण्याः दशभिर्भाज्याः)[१]" इत्यनेन एतज्ज्ञायते । किन्तु एतदेकदिशि एव भवतु पातचलनम् । कुतः उभयदिशि उच्यते इत्युक्ते तत्रैव अग्रे उक्तम् - प्राक् चक्रं चलितं हीने छायार्कात् करणागते । अन्तरांशैरथावृत्य पश्चाच्छेषैस्तथाधिके[२] ॥ इति ॥ पूर्वं यदुक्तं छायार्ककरणार्कयोः ज्ञानेन विषुवद्दिने अयनदिने वा अयनांशानां स्फुटप्रतीतिरिति तत्र अयमप्यंशो ज्ञातव्यः यत् छायार्कात् करणार्के हीने चक्रं प्राक्चलितम् । अर्थात् सम्पातः पश्चाच्चलितः । छायार्कात् करणार्के अधिके चक्रं पश्चाच्चलितम् । अर्थात् सम्पातः प्राक्चलितः । इदानीन्तु चक्रं प्राक्चलितमिति कृत्वा अयं धनायनांशकालः । यदि चक्रं पश्चाच्चलितं तर्हि अयनांशाः ऋणम् । स च ऋणायनांशकालः । अत्रोक्तविधिना परमायनांशाः २७° एव । ततोऽप्यधिकं कदापि न लभ्यत एव । एवं अयनस्य १०८° भगणात्मिका आन्दोलनगतिः सूर्यसिद्धान्ते प्रोक्ता । अनेन अस्य वार्षिकी गतिः ००।५४" विकलामिता प्राप्नोति । साम्प्रतिकायनांशास्तु एतद्रीत्या २२°।४६' भवन्ति ।

अस्य सम्पातस्य भगणपूर्तिः ७२०० वर्षेषु भवति । भगणार्धं तु ३६०० वर्षैः पूर्यते । २७° अंशानां भोगाय १८०० वर्षाणि भवन्ति । सृष्ट्यादितः गणिते कल्यादौ अश्विमुखे एव आसीदितिकृत्वा ततः परं ३६०० वर्षेषु प्रागर्धं पूरयित्वा इदानीं पश्चाच्चलितं २३° आसन्ने वर्तते । अत्रापि पुनः सामान्यतः १५३३ वर्षाणि गतानीति गणितलब्धिः । इयं प्रस्तुते गतकलिवर्षसङ्ख्या ५११८ अनया अयनगतिमाश्रित्य साधितवर्षसङ्ख्या अत्यन्तं

[१] अयनांशाः $= \frac{१०८\times भुजः}{३६०} = \frac{३\times भुजः}{१०}$

[२] सूर्यसिद्धान्तः ३.११,१२ ।

युज्यते[१] ।

एवं पञ्चसिद्धान्तेष्वपि इदम् उक्तं दृश्यते[२] । पुनः कैश्चित् भगणपूर्णगतिः पातस्य उक्तो वर्तते । तत्र मुञ्जालमतं निरूपयति शिरोमणौ भास्करः "**अयनचलनं यदुक्तं मुञ्जालाद्यैः स एवायम् । तत्पक्षे तद्भगणाः कल्पे गोऽङ्गर्तुनन्दगोचन्द्राः (१,९९,६६९)**" इति । मुञ्जालस्य अभिप्रायेण सम्पातः विलोमतया पूर्णं भगणं भ्रमति । पाश्चात्यमतेऽपि पूर्णभगणभोगः कथितः । एवं सत्स्वपि बहुषु मतेषु सम्पूर्णतया शुद्धाशुद्धता अग्रे द्विशतात् वर्षेभ्यः परं ज्ञायत एव ।

**अयनगतेः परिणामाः**[३]

अयनगतेः कारणेन कुत्रचित् परिवर्तनं भवितुमर्हति । तदेवम् -

१. राशिनामनक्षत्रनाम्नोर्भेदः दृश्यते । निरयणक्रमेण "अश्विनी-भरणी-कृत्तिकापादो मेषः" इत्युक्ते एतानि नक्षत्राणि मेषराशौ एव भवन्ति । अयनचलनकारणेन इदानीम् "उत्तराभाद्रा-रेवती-अश्विनीपादो मेषः" इति वर्तते । अत्रापि परिवर्तनमग्रे भवति । अयं सम्पातचलनस्य परिणामः ।

२. ऋतुषु परिवर्तनं भवति । ऋतुविषयकवर्षारम्भः दृश्यमानमेषसम्पातात् भवति । ऋतुसम्बन्धीनि उत्सवादीनि इतरकाले आचर्यमाणानि भवन्ति ।

३. शनैः शनैः नूतननक्षत्रमण्डलानि दृष्टिपथमायान्ति ।

४. अनेन विषुवांशेषु, क्रान्त्यंशेषु च अन्तरं दृश्यते ।

एवमयनांशविषये मतभेदो दृश्यते । तेषां कीर्तितभगणेष्वपि महान् भेदो दृष्टः । अतः भगणभेदेऽपि तेन प्राप्यमाणफलस्य स्फुटत्वे कः आगमः प्रमाणं भवति । अत वक्ष्यति भगवान् भास्करः "**साम्प्रतिकोपलब्ध्यनुसारिणी कापि गतिरङ्गीकर्तव्या । यदा पुनर्महता कालेन महदन्तरं भविष्यति तदा महामतिमन्तो ब्रह्मगुप्तादीनां समानधर्माण एव उत्पत्स्यन्ते । ते तदुपलब्ध्यनुसारिणीं गतिमुररीकृत्य शास्त्राणि करिष्यन्ति । अत एवायं गणितस्कन्धो महामतिमद्भिर्धृतः अनाद्यन्तेऽपि काले खिलत्वं न याति**[४]" इति । प्रोक्तभगणाः तद्वा यद्वा भवन्तु । किन्तु साम्प्रतिकीं गतिमाश्रित्य गणितं कार्यमिति अस्य भावः । मिहिरोऽपि "**प्रत्यक्षपरीक्षणैर्व्यक्तिः**[५]" इति प्रत्यक्षोपलब्धस्य एव अयनांशस्य

---

[१] एतत् गणितं श्रीसूर्यसिद्धान्तस्य कल्पवल्लीव्याख्याने प्रोक्तम् । विद्यावारिधिशोधप्रबन्धात् स्वीकृतम् ।

[२] भारतीय ज्योतिष - पृष्ठसङ्ख्या ४३८ ।

[३] अर्वाचीनं ज्यतिर्विज्ञानम् - द्वितीयोऽध्यायः - पृष्ठसङ्ख्या ३५ ।

[४] सिद्धान्तशिरोमणिः गोलबन्धे - १९ ।

[५] बृहत्संहितायाम् - आदित्यचारे - २ ।

स्वीकरणत्वमाह । "**तत्संस्कृताद्ग्रहात्क्रान्तिच्छायाचरदलादिकम्**[१]" इत्युक्तरीत्या अयनांशान् साधयित्वा अयनांशसंस्कृताद् ग्रहात् क्रान्त्यादिकं साधयेत् ।

**सायनपञ्चाङ्गम्**

यस्मिन् दिने दिनमानस्य ह्रासारम्भः अथवा वृद्ध्यारम्भः तद्दिनमेव क्रमशः उत्तरदक्षिणायनयोः आरम्भः । एतत्प्रत्यक्षसिद्धम् । किन्तु सम्प्रति पञ्चाङ्गेषु अयनारम्भः एतद्दिने न भवति । दृक्सिद्धपञ्चाङ्गेषु एतल्लिखितं दृश्यते । अन्येषु बहुत्र न । प्रायः १८७० तमे वर्षे विसाजी रघनाथ लेले, जनार्दन बालाजी मोडक तथा शङ्कर बालकृष्ण दीक्षितः इत्येते सायनपञ्चाङ्गनिर्माणार्थं प्रायतन्त । पाश्चात्यमतमाश्रित्य कृतमिदमत्र अयनांशाः शून्यमिताः भवन्ति । एतद्विमृश्य द्वारकाधीश्वरैः शङ्कराचार्यैः सायनपद्धतिरेव सर्वत्र आश्रयणीयेति आज्ञापितं पत्रं दीक्षितानां पुस्तके प्रदर्शितम्[२] ।

एवमयनांशैः चलस्थिरभेदन रवेः सङ्क्रमणं द्वेधा भवति । तत्र मुहूर्तचिन्तामणौ कथितसङ्क्रान्तिफलानां व्याख्याने गोविन्दः एतत्सर्वं केवलं निरयणांशसङ्क्रान्तेरेवेति व्याख्याति । यतः चलसङ्क्रान्तेः फले तु पुलस्त्यवाक्यम् "**स्नानदानजपश्राद्धव्रतहोमादिकर्मसु । सुकृतं चलसङ्क्रान्तावक्षयं फलमश्नुते**"[३]॥ इति ॥ पुनः अग्रे रामदैवज्ञः अपि "**मेषादितः प्राक् चलसङ्क्रमाः स्युर्दाने जपादौ बहुपुण्यदास्ते**[४]" इत्यवोचत् । अत्रापि व्याख्याकारः गोविन्दः सायनसङ्क्रान्तेः सर्वत्र नोपयोगः इति व्याकुर्वन् सायनपञ्चाङ्गे विसंवादं, ग्रहणगणितेऽपि विसंवादमित्येवं बहुधा सायनपद्धतेः विसंवादं कथयन् **सायनगणना हि नियतविषया** इति प्रतिपादयति । सायनास्तु केवलं "**अयनांशाः प्रदातव्या लग्ने क्रान्तौ चरागमे । सत्रिभे वित्रिभे पाते तथा दृक्कर्मपातयोः**[५] ॥" इत्युक्तस्थलेष्वेव उपयोज्याः इति निर्णयति ।

पुनश्च रवेः चारमाश्रित्य संहितायां मिहिरेणापि बहुधा अयनव्यत्ययसम्बद्धफलानि आदित्यचारे निरूपितानि सन्ति । तान्यत्र न निरूप्यन्ते ।

एवं अयनांशविषये केचनांशाः निरूपिताः । भास्करोक्तवत् सिद्धान्तस्कन्धे

---

[१] सूर्यसिद्धान्तः ३ - १० ।

[२] भारतीय ज्योतिष - पृष्ठसं - ५३१ ।

[३] मुहूर्तचिन्तामणेः व्याख्याने पीयूषधारायाम् - सङ्क्रान्तिप्रकरणे - १ ।

[४] सङ्क्रान्तिप्रकरणे - ९ ।

[५] अत्र भास्करोऽपि - "तत्सञ्जातं पातं क्षिप्त्वा खेटेऽपमः साध्यः । क्रान्तिवशाच्चरमुदयाश्चरदललग्नागमे ततः क्षेप्यः" ॥ (शिरोमणौ गोलबन्धे - १९) ।

उपपत्तिमान् एव आगमः प्रमाणम्[1] । अनुपपन्नमत्र ब्रह्मोक्तमपि नाद्रियते । अतः अयनांशसाधनेऽपि स्फुटोपलब्धिः येन मार्गेण स मार्गः शरणीकर्तव्यः । अतः काले काले गणितपरीक्षणं कार्यमेव । एवं काले काले गणितपरीक्षणं मुहुर्मुहुः कृत्वा गुणितशुद्धिः साध्येत्यत्र पूर्वाचार्याणां मुक्तकण्ठनादः श्रूयते । मिहिरोक्तम् "**उक्ताभावो विकृतिः प्रत्यक्षपरीक्षणैर्व्यक्तिः**" इत्येतदपि तथैव कथयति । अत्र मुञ्जाल-श्रीपति-भास्करादिगणकवर्यक्षुण्ण एवायं पन्थाः इति सर्वत्राविरोधः ।
इत्येवमन्ते इदं वटेश्वरवाक्यं स्मर्यते ।

**कालक्रियागणितगोलमहागमार्थज्ञानप्रपञ्चविमलीकृतचारुधीभिः ।**
**दिव्यैः प्रदर्शितमिदं मुनिभिर्यदज्ञाः कुर्मो वयं तदवलोक्य गुणः स तेषाम्**[2] ॥

## ग्रन्थसूची

अयनांशतत्त्वववेकः
अयनांशविमर्शः
अर्वाचीनं ज्योतिर्विज्ञानम्
केतकीग्रहगणितम्
पञ्चसिद्धान्तिका
बृहत्संहिता
लघुमानसम्
वेदाङ्ग(आर्च)ज्यौतिषम्
सिद्धान्ततत्त्वविवेकः
सूर्यसिद्धान्तः (भूधरी-कल्पवल्ली-कमलाकर-गूढार्थप्रकाशिका-तत्त्वामृत-सुधाहर्षिणीटीकाः)
ज्योतिषरत्नमाला (पं श्री सीताराम झा)
भारतीय ज्योतिष (शङ्करबालकृष्णदीक्षितानाम्)
सिद्धान्तशिरोमणिः (मिताक्षरी-मरीचिव्याख्ये)

---

[1] शिरोमणौ गोलबन्धे - १९ श्लोकस्य वासनाभाष्ये तथा गणिते मध्यमाधिकारे भगणाध्याये १-६ श्लोकव्याख्याने ।
[2] वटेश्वरसिद्धान्तः - मध्यगत्यधिकारः - २ ।

# वास्तुशास्त्रोक्त भूपरीक्षणविधिः

**डा. सुधांशुकुमारनन्दः**
फलितज्यौतिषविभागः
रा.सं.सं. राजीवगान्धीपरिसरः, शृङ्गेरी

मानवः स्वावश्यकतानुसारं गृहादीनां निर्माणं करोति। एषा निर्माणप्रक्रिया वास्तुशास्त्रमाश्रयति। कुत्र किं करणीयं किं न करणीयम् इति वास्तुशास्त्रं विना निश्चयितुं न शक्यते। तदर्थमुच्यते -

**वास्तुशास्त्रादृते तस्य न स्याल्लक्षणनिश्चयः।**
**तस्माल्लोकस्य कृपया शास्त्रमेतदुदीर्यते।।नारदसंहिता**

अर्थात् वास्तुशास्त्रस्य सिद्धान्तान् विनान्यत् किमपि साधनं नास्ति येनेदं सुनिश्चितं भवेद् यद् भवनस्य निर्माणं यथार्थेन जातमस्ति न वा इति। तदर्थं लोकस्य कृपया इदं शास्त्रं प्रस्तूयते।

सर्वाणि वस्तूनि भूवः एव जायन्ते इति कारणात् भूमिं मुख्यवस्तुत्वेन स्वीक्रियते। **भूरेव मुख्यवस्तु स्यात्तत्र जातानि यानि हि।।** प्रासादादि वास्तु मुख्यवस्तुतः (अत्र मुख्यवस्तु इत्यनेन भूमिः) एवं च तदुपरि आश्रित्य एव प्रवर्तते। **प्रासादादीनि वास्तूनि वस्तुत्वाद् वस्तुसंश्रयात् ।** (मयमत- 2-4) सर्वत्र किमपि वा भवति तत् भूमौ एव भवति इति धीया भूपरीक्षणम् अवश्यं कार्यम्।

प्रायशः वास्तुशास्त्रस्य प्रत्येकस्मिन् पुस्तकेषु भूपरीक्षणम् इति एकः विषयः वर्तते एव। **पूर्वं भूमिं परीक्ष्येत पश्चाद्वास्तुं प्रकल्पयेत्** इति मत्स्यपुराणस्य वचनानुसारं प्रथमं भूमेः परीक्षणम् कार्यम्। **भूमिं परीक्ष्य संसिञ्चेत् पञ्चगव्येन कोविदः** इति अपराजितपृच्छायम्। **तत्र क्रमेण बहुधा धरणीपरीक्षा** इतिमनुष्यालयचन्द्रिकायाः मतम्। **क्षेत्रमादौ परीक्ष्येद् गंन्धवर्ण-रस-प्लवैः** इति वास्तुसौख्यकारस्य मतम्। इतः एवं ज्ञायते यत् गृहनिर्माणात् प्राग्गेव भूमेः परीक्षणं करणीयम् इति शास्त्रस्यास्य आशयः।

**क्षेत्रमादौ परीक्ष्येद गंन्धवर्ण-रस-प्लवैः इति** वास्तुसौख्यकारस्य मतम् किञ्चित् पश्यामः। **प्रथमतः गन्ध-परीक्षणं** कथम् इति विचारयामःचेत् । उक्तमस्ति-

**घृतासृगन्नमद्यानां गन्धाश्च क्रमतः शुभाः।**
**विप्रक्षत्रियविट्-शूद्रजातीनां वास्तुभूमिषु।। वास्तुरत्नावली. प्र.अ**

ब्राह्मणाय घृतगन्धा, क्षत्रियाय रक्तगन्धा, वैश्याय अन्नगन्धा, शूद्राय मद्यगन्धा भूमिः शुभा भवति।

**वर्णपरीक्षणं एवमस्ति यत् – श्वेता शस्ता द्विजेन्द्राणां रक्ता भूमिर्महीभुजाम्।**
**विशां पीता च शुद्राणां कृष्णा अन्येषां विमिश्रिताः।।**

**वास्तुरत्नावली. प्र.अ**

ब्राह्मणाय श्वेतवर्णा भूमिः, क्षत्रियाय रक्तवर्णा, वैश्याय पीतवर्णा तथा शूद्राय कृष्णवर्णा भूमिः प्रशस्ता भवति।

**इदानीं रसपरीक्षणम्** –

**मधुरः कटुकस्तिक्तः कषायश्च रसाः क्रमात् ।**
**विप्रक्षत्रियवैश्यानां शूद्रस्य च शुभप्रदाः ।। वास्तुरत्नावली. प्र.अ.**

विप्रस्य मधुररसः, क्षत्रियस्य कटुरसः,वैश्यस्य तिक्तरसः, शूद्रस्य च कसायरसः शुभप्रदः भवति।

प्लवत्वपरीक्षणम् – **उदगादिप्लवमिष्टं विप्रादीनां प्रदक्षीणेनैव ।**
**विप्रः सर्वत्र वसेदुक्तस्थानं त्रयाणां हि ।। वास्तुरत्नावली. प्र.अ**

ब्राह्मणस्य उदक्प्लवं, क्षत्रियस्य पूर्वप्लवं, दक्षिणप्लवं वैश्यस्य शुद्रस्य तु पश्चिमप्लवं शुभं भवति। ब्राह्मणः सर्वत्र अर्थात् सर्वदिक्प्लवभूमौ वासं कर्तुं शक्नोति। अन्यैः त्रिभिः तु उक्तस्थानेष्वेव वासः करणीयः। विस्तरेण

**शम्भुकोणप्लवा भूमिः कर्तुः श्रीसुखदायिनि।**
**पूर्वप्लवा वृद्धिकरी धनदा तूत्तरप्लवा।।**
**मृत्युशोकप्रदा नित्यं सर्वथा दक्षिणप्लवा।**
**गृहक्षयकरी सा च भूमिर्या नैऋतप्लवा।**
**धनहानिकरी चैव कीर्तिता वरुणप्लवा।**
**वायुप्लवा तथा भूमिर्नित्यमुद्वेगकारणी।**
**मध्यप्लवा मही नेष्टा न शुभा प्लवतः पुरा।। वास्तुरत्नावली. प्र.अ**

ईशानकोणप्लवा भूमिः वासकर्तुः श्रीसुखदायिनी भवति। पूर्वदिशिप्लवाभूमिः धान्यादि वृद्धिकरी भवति। उत्तरप्लवा तु धनं ददाति। दक्षिणप्लवाभूमिः मृत्युशोकप्रदा भवति। नैऋतप्लवाभूमिः गृहक्षयकारिणी भवति। पश्चिमप्लवाभूमिः धनक्षयकारिणी भवति।

वायुकोणप्लवा भूमिः नित्यमुद्वेगकारिणी भवति। मध्यभागनिम्ना भूमिः न शुभदायिका भवति।

भूपरीक्षणस्य यद्यपि बहवः प्रकाराः सन्ति तेषु काश्चन प्रकारान् अत्र विवृणोमि। यथा

**सान्द्रतायाः परीक्षणम्** – density test
**आर्द्रत्वस्य वा सिक्ततायाः परीक्षणम्** – moisture test
**विकिरणपरीक्षणम्** – radiation test
**वर्णविकिरणपरीक्षणम्** – colour radiation test
**उर्वरतायाः परीक्षणम्** – fertility test
**वायुप्रवाहस्य परीक्षणम्** –air flow test

**तत्र प्रथमं**

**घनत्व वा सान्द्रतायाः परीक्षणम्** – density test

मृत्तिकायाः दृढत्वं घनत्वं वा कथम् अस्ति इति ज्ञातुम् अस्याः परीक्षायाः उपयोगः। एषा परीक्षा एवं क्रियते यत् -

**खातं भूमिपरीक्षणे करमितं तत्पूरयेत्तन्मृदा**
**हीने हीनफलं समे समफलं लाभो रजोवर्धने। वास्तुरत्नावली. द्वि.अ**

**पुनः**

**करप्रमाणं कुर्वीत खातं तद्भूमिमध्यगम्।।**
**ततस्तन्मृदमाकृष्य तत् तथैवानुपूरयेत्।**
**खाताधिकमृदुक्ता भूः श्रेष्ठा मध्या च तत्समा।।**
**प्रहीणखातमृत् क्षोणी हीना शस्ता न सा नृणाम्।समराङ्गणसूत्रधारः**

हस्तप्रमाणेन भूमेः मध्यभागे खातः करणीयः। तया मृत्तिकया खातस्य परीपूरणं कार्यम्। यदि मृत्तिका अधिका भवति तर्हि सा भूमिः श्रेष्ठा, तत्समा भवति चेत् मध्या, न्यूना भवति चेत् अधमा इति उच्यते। श्रेष्ठभूमेः अयं अभिप्रायः यत् गृहनिर्माणार्थं सा भूमि दृढा अस्ति इति , अधमा भूमि चेत् तस्याः भूमेः दृढत्वं नास्ति इति ज्ञायव्यम्। यदि भूमेः दृढत्वं नास्ति तर्हि सा भूमिः गृहस्य भारं सोढुं तथा समर्था न भवति इति अभिप्रायः। एषा भूमिः गृहनिर्माणावसरे त्यक्तव्या भवति।

**आर्द्रत्वस्य वा सिक्ततायाः परीक्षणम्** – moisture test

अनया परीक्षया मृतिकायाः (जलधारणक्षमता) water content capacity कथं अस्ति इति ज्ञातुं शक्यते। (यथेष्ट) अधिकाधिकं जलं मृतिकायां विद्यते चेत् सा समृद्धिशाली भूमेः प्रतीकः भवति। एषा प्रक्रिया एवमस्ति यत्

**भृत्वाद्भिः खातामापूर्णे तस्मिन् पदशतं व्रजेत्।**
**तावच्चेदागमेअम्भः स्यात् तदा भूः सार्वकामिकी।**
**मध्यमात्र प्रहीणे स्यात् ततो हीनतरेअधमा।।**

**पुनः,**

**तत्कृत्वा जलपूर्णमाशतपदं गत्वा परीक्षं पुनः**
**पादोनार्द्धविहीनकेअथ निभृते मध्याधमेष्टाम्बुभिः।। वास्तुरत्नावली. द्वि.अ**

तस्मिन् खाते जलं पूरयित्वा शतपदं गन्तव्यम् भवति। पुनः आगत्य पश्यामश्चेत् जलं तथैव अस्ति चेत् सा भूमिः सार्वकामिकी उच्यते। यदि तत्र जलं किञ्चित् न्युनं भवति तर्हि सा भूमिः मध्यमा, जलाभावे सति सा भूमिः अधमा इति स्वीक्रियते। जलं नास्ति अथवा किञ्चित् भवति चेत् यस्य कस्यापि वा निर्माणाय सा भूमि अयोग्या इति स्वीक्रियते।

**कर्ता स्वहस्तप्रमितं खनित्वा खातं पयोभिः परिपूरयेत्तत्।**
**वसेत्सुखार्थी परिपूरितं स्याच्छुष्कं भवेत्तत्क्षणमेव नाशः।।**
**स्थिरे जले वै स्थिरता गृहस्य स्याद्दक्षिणावर्तजलेन सौख्यम्।**
**क्षिप्रं जलं शोषयतीह खातो मृत्युर्हि वामेन जलेन कर्तुः।।**

**वास्तुरत्नावली .द्वि.अ**

वास्तरत्नावली ग्रन्थे तु एवं उक्तमस्ति यत्-

**हस्तमात्रं खनेत्खातं निशादौ जलपूरितम्।**
**प्रातदृष्टे जले वृद्धिस्समः पङ्के व्रणे क्षयः।। वास्तुरत्नावली. द्वि.अ**

**रश्मिविकिरण वा विकिरण परीक्षणम्** – radiation test

**खातस्योदक् प्रभृतिषु दिक्षु प्रज्वालयीत वा।**
**दीपान् यस्यां चिरं तिष्ठेत् तद्वर्णेष्टप्रदा हि सा।।**

**पुनश्च,**

**अरत्निमात्रे वै गर्ते स्वानुलिप्ते च सर्वशः।**
**घृतं वरशरावस्थङ्कृत्वा वर्तिचतुष्टयम्।।**
**ज्वालयेद्भूपरीक्षार्थम्पूर्वन्तत्सर्व्वदिङ्मुखम्।**
**दीपान्पूर्वादि सङ्गृह्य वर्णानामनुपूर्वशः।।**

**वास्तुसामुहिको नाम दीप्यते सर्वतस्तु यः।**
**शुभदः सर्ववर्णानां प्रासादेषु गृहेषु च।। वास्तुरत्नावली, द्वि.अ.**

खाते चतसृषु दिक्षु दीपस्य प्रज्वलनं कार्यम्, यस्यां दिशि अधिकं समयं यावत् दीपस्य ज्वलनं भवति, सा भूमिः तस्य वर्णस्य कृते शुभा। अर्थात् पूर्वस्यां ब्राह्मणस्य, दक्षिणस्यां क्षत्रियस्य, पश्चिमस्यां वैश्यस्य, उत्तरस्यां शूद्रस्य। मनुष्यालयचन्द्रिकायां **मुहूर्ते ज्वलेद्** इत्यादीना एकं मुहूर्तात् परं द्रष्टव्यम् इति उच्यते।

**वर्णविकिरणपरीक्षणम्** – colour radiation test

**खाते सितादिमाल्यानि यस्यां निश्युषितानि च।**
**यद्वर्णानि न शुष्यन्ति सा तद्वर्णेष्टदा मही।।**

चतुर्विधं पुष्पं स्वीकरणीयम्,स्वेत-रक्त-पीत-कृष्ण। पूर्वस्यां श्वेत, दक्षिणस्यां रक्तः, पश्चिमस्यां पीत एवं च उत्तरस्यां कृष्णवर्णस्य पुष्पं स्थापनीयम्। पुष्पस्य शुष्कतानुसारं फलं ज्ञातव्यम्। सायं संस्थापनं कृत्वा प्रातः द्रष्टव्यम्। पुष्पस्य शुष्कतानुगुण्यं भूमेः शुभाशुभं ज्ञातव्यं भवति। ब्राह्मणस्य श्वेतः, क्षत्रियस्य रक्तः, वैश्यस्य पीतः, शूद्रस्य कृष्णवर्णः।

**उर्वरतायाः परीक्षणम्** – fertility test

अस्याः परीक्षायाः अयं अभिप्रायः यत् भूमेः उर्वरता कथमस्ति इति ज्ञातुम्। एषा प्रक्रिया बीज वपनेन क्रियते। भूमेः उर्वरता अस्ति चेत् सा भूमि तत्रत्य जनानां कृते समृद्धिकारिका भवति। यदि बिजस्य अङ्कुरोद्गमः दिनत्रयाभ्यन्तरे भवति चेत् सा भूमि उत्तमा। पञ्चदिनाभ्यन्तरे भवन्ति चेत् मध्यमा एवं सप्तदिनाभ्यन्तरे वा ततः परं भवति चेत् सा भूमि अधमा इति विचार्यते।

**अथवा सर्वधान्यानि वापयेच्चसमन्ततः।**
**यत्र नैव प्ररोहन्ति तां प्रयन्तेन वर्जयेत्।। बृहद्वास्ताला.**

**वायुप्रवाहस्य परीक्षणम्** –air flow test

अञ्जल्यां मृत्तिकां स्वीकृत्य हस्तात् उपरिस्तात् त्यजामश्चेत् यदि मृद् रूज्जु रूपेण साक्षात् तत्रैव पतति चेत् सा भूमि अशुभा किञ्चित् दूरे पतति चेत् सा भूमिः शुभात्वेन स्वीक्रियते।

**भूखनन द्वारा परीक्षणम्**

**खाते शिलां वा लभते हिरण्यं तथेष्टिकाश्चापि समृद्धिरत्र।**

द्रव्यं च रम्याणि सुखानि धत्ते ताम्रादिधातु र्यदि तत्र वृद्धिः।।
पिपिलिकाः षोडशपक्षनिद्रा भवन्ति चेत्तत्र वसेन्न कर्ता।
तुषास्थिवीर्याणि तथैव भस्मान्यडानि सर्पा मरणप्रदाः स्युः।।
वराटिका दुःखकलिप्रदात्री कार्पास एवाति ददाति रोगम्।
काष्ठं प्रदग्धं यदि रोगभितिर्भवेत् कलिः खर्परदर्शनेन।
लोहेन कर्तुर्मरणं निगद्यं विचार्य्य वास्तु प्रदिशन्ति धीराः।।

**वास्तुरत्नावली. द्वि.अ.**

**परीक्षणस्य प्रकारान् त्रिधा विभजयितुं शक्यते। यथा**

Examination (**परीक्षा**) - **वर्णगन्धप्रभृतिना,**

Measurement (**मापन प्रक्रियया**)– **आकृतिं प्लवत्वं च आधारिकृत्य**

Experimentations (**प्रयोगात्मक परीक्षणम्**) **जलेन, मृतिकया, वीजादीनामाधारेण च**

एवमेव प्रकारेण भूपरीक्षणविधयः वास्तुशास्त्रे वर्णिताः सन्ति।

# योऽनूचानः स नो महान्

**आचार्यः वै.एस् रमेशः**

रा.सं.सं., जयपुरपरिसरः, राजस्थानम्

इह जगति प्रशस्यतमत्वेन परिगण्यमानेषु मनुष्यजातीयेषु अहन्यहनि बहवो जनिं लभन्ते, कालेन अदर्शनं यान्ति च । परं तेषु केचित् सार्थकं जन्म प्राप्नुवन्ति, यावज्जीवं ख्यातिलाभपूजानिरपेक्षतया स्वस्य परस्य च हितकरं कर्म कुर्वाणाः देदीप्यन्ते । अन्नवसनगृहादिसौकर्यमात्रदत्तदृष्टयः तदुचितं कर्म कुर्वाणा एव बहवः, न तान् वस्तुतः प्रशंसन्ति महाजनाः । ये तु शाश्वतं किमपि लोकहितं कर्म कार्यमिति मत्या तत्प्रवणाः भवन्ति, ते खलु महानुभावाः प्रथन्ते । तत्रापि विद्यावन्तः सन्तः स्वार्जितविद्यानुगुणं सार्वकालिकोपकाराधायि कर्मनिरताः मानवाः द्योतन्तेतराम् ।

जन्मना मानवोऽपूर्णो भवति । ज्ञानेनैव तस्मिन् पूर्णता समायाति । ज्ञानेनैव तस्मिन् पूर्णता समायाति । प्रत्येकं प्राणिनस्त्रयो भावा भवन्ति आधिभौतिकं शरीरम्, आधिदैविकं मनः, आध्यात्मिकी बुद्धिश्च । अमीषां त्रयाणां सामञ्जस्येनैव मनुष्यः पूर्णत्वं भजते । पूर्णतायै वेदाध्ययनस्य-अभ्यासस्य चावश्यकता भवति । तत्र आधिभौतिकशुद्धिः कर्मणा, आधिदैविकशुद्धिः उपासनया, आध्यात्मिकशुद्धिश्च ज्ञानेन भवति । आध्यात्मिकशुद्धौ परमात्मनः स्वरूपोपलब्धिर्जायते । मनुष्यः मोक्षं न लभते । ज्ञानं मनुजस्य स्वभावसिद्धमास्ते । न किञ्चन ज्ञानं बाह्यं सर्वविधं च तदन्तस्थम् । मनुष्यः आविष्करोति, स प्रकटयति इत्येव वदेम न तु स जानाति इति । समस्तं ज्ञानं स्वाभ्यन्तरे वर्तते । लौकिकमाहोस्वित् आध्यात्मिकं ज्ञानं मनुष्यस्य मनसि वर्तते । बहुधा तत् अप्रकाशितं सत् आवृतं तिष्ठति । यदा यदावरणं शनैः शनैः अपसरति तदा कथयामो वयं शिक्षामहे सेयमाविष्करणक्रिया यथा यथा वर्धते तथा तथा अस्माकं ज्ञानं संवर्धते ।
ज्ञानमार्गं प्रवेष्टुं तस्यैवाधिकारो भवति यः साधनचतुष्टयसम्पन्नो भवति ।

१. नित्यानित्यवस्तुविवेकः
२. इहामुत्र फलभोगविरागः
३. शमदमादिषट्सम्पत्तिः
४. मुमुक्षुत्वम्

चेति साधनचतुष्टयं कथ्यते ।

आत्मा नित्यः संसारोऽयमनित्यः इति विचारः आदिमसाधने, ऐहिक (इहलोक) आमुष्मिक (परलोक) सुखभोगान् प्रति विरक्तिभावो द्वितीये साधने, शमः, दमः, तितिक्षा, उपरतिः, श्रद्धा, समाधानम्- इति षट्सम्पदः । तत्र तत्त्वज्ञानातिरिक्तेभ्यो विषयेभ्यः

विरक्तिः –शमः, इन्द्रियनिग्रहः – दमः, भोगान्निवृत्तिः उपरतिः, शीतोष्णसुखदुःखादिद्विन्द्वानां सहनशक्तिः – तितिक्षा, गुरौ, शास्त्रे च अचलविश्वासः श्रद्धा, परमात्मचिन्तने एकाग्रता समाधानम् । मोक्षप्राप्तये इच्छा एव मुमुक्षुत्वम्

एतत्साधनचतुष्टयं योऽधिगच्छति स जनो ज्ञानावाप्तये अधिकारी । ज्ञानप्राप्तये श्रवणं मननं निदिध्यासनञ्चेति त्रीण्यङ्गानि सन्ति । गुरोः तत्त्वज्ञानश्रवणं हि – श्रवणम् । तदनुचिन्तनं मननम् मननकृतस्य पदार्थस्योपलब्धिः निदिध्यासः । एतेषां समुचिताभ्यासेन मानवः ब्रह्मस्वरूपं साक्षात्कुरुते । अनेन क्रमेणासौ स्थूलात् सूक्ष्मं प्रति आत्मनोऽधिकारं प्रतिष्ठापयति ।

अपि च ज्ञानप्राप्तये 'एकाग्रता' हि केवलं मार्गः । मनसः एकाग्रता हि शिक्षायाः सम्पूर्णसारः । ज्ञानार्जनाय निम्नतमश्रेण्याः मनुष्यादुत्तमयोगीं यावत् – अस्यैवैकस्य मार्गस्यावलम्बनं शरणम् ।

एकाग्रतायै ब्रह्मचर्यस्यावश्यकता वर्तते । श्रद्धा एव सर्वोन्नतये मूलम् । श्रद्धा एव – अनूचानानां परमं तपः । यदाह बोधायनः –

अश्रद्धा परमः पाप्मा श्रद्धा हि परमं तपः ।
तस्मादश्रद्धया दत्तं हविर्नाश्नन्ति देवताः ।
इष्ट्वा दत्त्वापि वा मूर्खः स्वर्गं न हि स गच्छति
शङ्काविहित चारित्रो यः स्वाभिप्रायमाश्रितः
शास्त्रातिगः स्मृतः मूर्खो धर्मतन्त्रोपरोधनादिति ।"

श्रुतिरपि – 'श्रद्धयाग्निः समिध्यते श्रद्धया हूयते हविः इति । ततश्च श्रद्धाभावे पृच्छकायापि न वक्तव्यं किमुत अपृच्छकाय । तत्सत्त्वे तु यदि शिष्यः प्रश्ने न समर्थः तदा प्रश्नमप्रतीक्ष्यैव गुरुर्वदेदिति स्थितिः। श्रद्धया लभ्यमानं ज्ञानम् आत्मनो गुणः । प्राच्यैः ज्ञानस्य द्वौ भेदौ स्वीकृतौ अनुभवः स्मृतिश्च। ज्ञातविषयकं ज्ञानं स्मृतिः । स्मृतिव्यतिरिक्तं ज्ञानम् अनुभवः । स्मृतेः कारणं संस्कारोद्बोध एव । सर्वोऽपि जनः स्मृतिशक्तिं कामयते । सा च सर्वेषु जनेषु नैसर्गिकी । स्मृतेस्त्रीण्यङ्गानि – कण्ठस्थीकरणं, धारणा, प्रत्याह्वानम् ।

सान्तरं कण्ठस्थीकरणं, सार्थबोधं कण्ठस्थीकरणम् स्मर्तुं विनिश्चयः । तदेव स्मृतं भवति यस्मिन् सावधानो दृष्टिक्षेपो भवति, मनो वा येन संयुज्यते स्मरणाय रुचेः आवश्यकता प्रथमा । नहि उत्सुकताम्, रुचिम्, जिज्ञासां वा विना कण्ठस्थीकरणेन

शिक्षणेन वा कोऽपि लाभः । जिज्ञासयैव निश्चयदृढतोत्पद्यते । प्राचीनाः शिष्यचेतसि जिज्ञासाया औत्कण्ठ्यं शिक्षणात् पूर्वमावश्यकं मन्वते स्म ।

वर्षद्वयमस्मिन् परिसरे शिक्षाशास्त्रमधीत्य वाग्देव्याः शारदायाः अनुकम्पया श्रीचरणानां सदनुग्रहेण, एतत्परिसरीयविद्वदाचार्याणां मार्गदर्शनेन च सारस्वताः (सरस्वत्याः समीपवर्तिनः) यूयं संस्कृतशिक्षकाः भूत्वा समाजं यास्यथ, संस्कृतशिक्षां प्रति बालान् प्रेरयिष्यथ, यद्यपि पाठ्यक्रमाङ्गतया संस्कृतशिक्षायाः परम्परामितिहासं चाजानीत तथापि आधुनिकपाश्चात्त्यसंस्कृत्या शिक्षणपद्धत्या, दर्शनेन च कवलीभूतामिमां संस्कृतशिक्षां प्राक्कालिकानामनूचानानाम् आचार्याणां गुरूणां चिन्तनसरण्या अवगच्छेत इति विचिन्त्य यथामति 'योऽनूचानः स नो महान्' इति किञ्चन शीर्षकमुरीकृत्य युष्मान् उन्मुखीकर्तुम् उपस्थितः ।

यस्याः भाषायाः प्रशिक्षणं यूयमलभध्वम्, सा खलु देवभाषा । देवसृष्टा भाषा देवभाषा । इयं सर्वजनमान्या सर्वविदिता च । अस्या एव सुशोभते अखिलभारतीयता । अनूचानशब्दं यूयम् अशृणुत । अर्थं चापि व्यजानीत ।

**'साङ्गवेदविचक्षणः अनूचानः । शिक्षाकल्पादिषडङ्गसहितवेदाध्ययनकारी'** इति हलायुधकोशार्थः,

**'अनूचानो विनीते स्यात् साङ्गवेदविचक्षणो'** इति मेदिनीकोशार्थः ।

**न हायनैर्न पलितैर्न वित्तेन न बन्धुभिः ।**
**ऋषयश्चक्रिरे धर्मं योऽनूचानः स नो महान् ।।** इति मनुस्मृतौ ।

"न बहुभिर्वर्षैः, न केशश्मश्रुलोमभिः शुक्लैः, न बहुना धनेन, न पितृव्यत्वादिभिर्नबन्धुभावैः समुदितैरप्येतैर्न महत्त्वं भवति, किन्तु ऋषय इमं धर्मं कृतवन्तः यद् यः साङ्गवेदाध्येता सोऽस्माकं महान् सम्मतः।

अनूचानपरम्परा भारतीयवाङ्मयं पवित्रमकरोत् । आचन्द्रार्कं समस्त-जनपापलवित्रमकरोत् । अनूचानपरम्परायाः उदाहरणत्वेन श्लोकमिमं स्मर्तुमर्हामः –

**व्यासं वसिष्ठनप्तारं शक्तेः पौत्रमकल्मषम्**
**पराशरात्मजं वन्दे शुकतातं तपोनिधिम् ।** इति ।

अनूचानपरम्परां पश्यामश्चैतदवगम्यते यत्ते - अधीति बोधाचरणप्रचारणेषु दत्तचित्ता अवर्तन्त इति, जीवकारुण्यं तेषां स्वभाव इति, पर्यावरणपरीक्षणं तेषां नित्यकर्म इति, अन्तः करणशुद्धिस्तेषामाचारव्यवहारयोर्धर्म इति, विश्वबन्धुत्वभावना तेषां जीवनलक्ष्यमिति च ।

इमं सारं यदि यूयमवगच्छथ तर्हि युष्मास्वपि-अनेके अनूचानाः भवितुमर्हथ । तत्रादौ चिन्तयामो वयं – 'अधीतिबोधाचरण-प्रचारणानि । अधीतिः – अध्ययनम्, बोधः-अर्थज्ञानम् आचरणं – कर्मानुष्ठानम्, प्रचारणम्-अध्यापनं चेति अर्थः ।

पुरा आचार्याः गुरवः ऋषयः मुनयश्च जिज्ञासवः ज्ञानपिपासवश्च तपस्वाध्यायनिरताः स्वजीवनं सार्थकं चक्रुः पूर्वोक्तरीत्या यूयं श्रद्धाम् एकाग्रतां जिज्ञासां च वर्धयत । दोषाणां कारणं प्रमुखं 'अज्ञानम्' दोषान् वयं कुर्महे । यतो हि वयं दुर्बलाः । दुर्बलाः कथं ? यतो हि वयमज्ञानिनः । अस्मान् अज्ञानिनः कः कुरुते ? वयं स्वयमेव अस्मान् अज्ञानिनः कुर्महे । वयमेव स्वयं स्वहस्ताभ्यां नेत्रे समावृत्य 'अन्धकार' इति रुदिमः । हस्तौ अपसारयामश्चेत्' प्रकश एव प्रकाशः । मनुष्यस्य आत्मा स्वभावेनैव 'स्वयं प्रकाशः' ।

यूयं सदैव जिज्ञासां कुरुत । सदगुरुमन्विष्यत श्रद्धया प्रश्नान् परिपृच्छत । उत्तरमवाप्य स्वाध्यायम् विदधत । राष्ट्रियसंस्कृतसंस्थानस्य विद्यार्थिनो युवानो यूयम् अनूचानत्वप्राप्तये अहर्निशं यतध्वम् ।

युष्मासु प्रत्येकं युवा युवानमन्यं प्रेरयेत् । सर्वेषां यूनां संस्कृतविद्यार्थी सदैव ज्ञानेन वरीयान् इति निरूपयेत् । संस्थानस्य ध्येयवाक्यं समर्थयेत् । स्वाध्यायेन प्रवचनेन व्यवहारेण शास्त्रसंरक्षकरूपेण च महानिति सर्वत्र सर्वदा सर्वैः कीर्तिताः भूयास्त ।

**भद्रं मङ्गलं च लभध्वम् ।**

# शिक्षणसूत्रशास्त्रसूत्राणां विमर्शः

**डा. चन्द्रकान्तः**
शिक्षाविभागाध्यक्षः
रा.सं.सं. राजीवगान्धीपरिसरः, श्रृङ्गेरी

**षिवु** तन्तुसन्ताने इत्यस्माध्दातोः **ष्ट्रन्** प्रत्यये ढेरुत्वे सूत्रशब्दस्य निष्पत्तिर्जायते । "**मणी वज्रसमुत्कीर्णे सूत्रस्येवास्ति मे गतिः**" इति रघुवंशे तन्तुम् इत्यर्थे सूत्रशब्दः प्रयुक्तः । "**मन्ये यथा श्याममुखस्य तस्य मृणालसूत्रान्तरमप्यलभ्यम्**" इति कुमारसम्भवे रज्जुः इत्यर्थे प्रयुक्तः । परन्तु अत्र परिलक्षितः सूत्रशब्दार्थः अध्ययनाध्यापनक्षेत्रसम्बध्दः वर्तते । **अल्पाक्षरमसन्दिग्धं सारवद्विश्वतो मुखम् । अस्तोभम् अनवद्यञ्च सूत्रं सूत्रविदो विदुः॥**

अपि च – "**लघूनि सूचितार्थानि स्वल्पाक्षरपदानि च । सर्वतः सारभूतानि सूत्राण्याहुर्मनीषिणः॥**" इति भामत्याम् ।

अल्पैः वर्णैः निबध्दं, विशालमप्यर्थं साररूपेण प्रतिपादयद् वर्णसङ्घटनं सूत्रमिति शास्त्रेषु व्यवहारः । इदं सूत्रं ब्रह्मसूत्रं, धर्मसूत्रं, न्यायसूत्रं, वैशेषिकसूत्रं, सांख्यसूत्रं, योगसूत्रमिति षट्-प्रकारकम् ।

अन्ततो गत्वा वक्तुं शक्यते यत् अनेकान् विस्तृतान् ज्ञानांशान् अतीवसङ्ग्रहरूपेण सारवत् अर्थवच्च यत् प्रतिपादयति तत् सूत्रमिति ।

अपि च पाणिनीयव्याकरणसूत्राणि यानि वर्तन्ते तान्यपि षट् विधानि वर्तन्ते । यथा-

**संज्ञा च परिभाषा च विधिर्नियम एव च ।**

**अतिदेशोऽधिकारश्च सूत्रं षड्-विधं स्मृतम् ॥** इति सर्वे जानन्त्येव । शिक्षाशास्त्रेऽपि सोक्रटिस्, अरिस्टाटल् प्रभृतयः शिक्षणसूत्राणि आविष्कृत्य प्रत्यपीपदन् । यथा –

**ज्ञातादज्ञातं प्रति, सरलात् कठिनं प्रति, स्थूलात् सूक्ष्मं प्रति, पूर्णादंशं प्रति, अनुभवात् तर्कं प्रति, विशेषात् सामान्यं प्रति, विश्लेषणात् संश्लेषणं प्रति, अनिश्चितात् निश्चितं प्रति, सामान्यात् विशेषं प्रति, आगमनात् निगमनं प्रति, मनोवैज्ञानिकात् तार्किकं प्रति** इत्यादीनि वर्तन्ते । शास्त्रप्रोक्तानि तावदुदाहरणार्थं- **अथातो धर्म जिज्ञासा, अथातो ब्रह्म जिज्ञासा, वृध्दिरादैच्, मयरसतजभनलगसंमितं, ग्लौ ग्मा ज्मा**, इत्यादीनि वर्तन्ते ।

एतेषु सूत्रेषु कश्चन ज्ञानांशः प्रतिपादितोऽवलोक्यते । परन्तु शिक्षणसूत्रेषु तादृशं किमपि नास्ति । केवलं ज्ञानांशस्य प्रतिपादनक्रमः प्रदर्शितः । शास्त्रसूत्रेषु अल्पाक्षरैः तत्तच्छास्त्रलक्षितानां विषयाणां साररूपेण प्रतिपादनार्थं प्रयत्नः व्यधायि । न च तत्र शास्त्रान्तरविषयवैशद्यं परिलक्ष्यते । कदाचित् मतान्तरखण्डनार्थं वा मतान्तरस्य पुनःस्मरणार्थं विषयान्तरस्पर्शः कृतोऽवलोक्यते, यथा - **बादरायणस्यानपेक्षत्वात्** । **लोपःशाकल्यस्य, अवङ् स्फोटायनस्य** इत्यादीनि । शिक्षणसूत्रेषु न कस्यचिद्विषयविशेषस्य सारः बबन्ध । परं समेषां गणितशिक्षण-विज्ञानशिक्षण-भाषाशिक्षण-शास्त्रशिक्षणेतिहासशिक्षणादीनां बोधननियमान्वितः कश्चन क्रमविशेषः अल्पाक्षरैः साररूपेण अभ्यासवशात् निबबन्ध । अत्र अभ्यासो नाम पुनरुच्चारणं, प्रति इति वर्णसमूहस्य इत्येव ग्राह्यम् । परमत्र विशेषः शास्त्रगतेषु सूत्रेषु वर्तते, यदेतानि शास्त्रसूत्राणि शिक्षणसूत्रेषु प्रतिपादितेन-क्रमेण नियमेन च वर्तन्त इति । यथा – अथातो धर्मजिज्ञासा इति सूत्रमाद्यमिदं कृतम् । साङ्गवेदाध्ययनानन्तरं धर्मजिज्ञासा कर्तव्या इति प्रोच्यते । अग्रिमक्षणे एव प्रश्नः समुदेति यत् । को धर्मः ? इति । प्रश्नस्यास्य समधानरूपं द्वितीयं सूत्रं भवति यत् **चोदनालक्षणोऽर्थो धर्मः** इति । तदग्रे चोदनैव प्रमाणं चोदना प्रमाणमेवेति विषयविस्तरः विविच्यते । अत्र च सरलात् कठिनं प्रति, विश्लेषणात् संश्लेषणं प्रति, सामान्यात् विशेषं प्रति, अनिश्चितात् निश्चितं प्रति इत्यादीनि शिक्षणसूत्राणि सम्यक् परिपालितानि लक्ष्यन्ते । तस्मादेव वार्तिके प्रोक्तं – **सूत्रकारप्रशंसा वा लोक इत्यादिनोच्यते । प्रसिध्दैरभिधानाध्दि न शिष्याः क्लेशिताः यतः** ॥ (श्लो.१.१.५९) इति ।

सूत्रकारप्रशंसा एव लोक इत्यादि भाष्येण कृतमिति । अथातो धर्म जिज्ञासा इति कथिते सति विषयोऽयं सरलः प्रसिध्द इति भासते । किन्तु क्रमशः अग्रिमेषु सूत्रेषु विषयस्य जाटिल्यं परिज्ञाप्यते । अन्ते विषयस्य निश्चितं स्वरूपं सिद्धान्तेन प्रतिपादितं भवति । अपि च शिक्षणसूत्राणि सामाजिकपरिवर्तनेन नूतनविषयसमागमेन नूतनसूत्राणि निसृतानि भवन्ति। यतो हि एतानि केनचित् निर्दिष्टेन पुरुषेण वा सूत्रकारेण प्रणीतानि न वर्तन्ते । तानि सर्वाण्यपि अनुभवजन्यानि विषयस्य मथनेन निर्गतानि वर्तन्ते । तस्मात् कारणात् "**सिध्दान्तात् प्रयोगं प्रति, वैयक्तिकात्-सामूहिकं प्रति**" इत्यादीनि नूतनतया आदारवन्ति भवितुम् अर्हन्ति । परं शास्त्रीयाणि सूत्राणि केनचित् उद्बुध्दबुध्दिना ज्ञातिना प्रणीतानि अवलोक्यन्ते । तत्रापि विशेषसन्दर्भेषु नूतनसूत्राणि समस्यापरिहारार्थं प्रतिपादितानि दृश्यन्ते । उदा - **सूत्रेण व्यवधानं तु पात्रव्यापदिकल्पितम् । पशुसामान्यविध्यादौ सूत्रमेवान्यथा कृतम्** ॥ यथा हि ज्योतिष्टोमे पशुधर्मविधिः किं

त्रयाणाम् अपि पशूनां साधारणः उत सवनीयस्यैव वा अग्निषोमीयसवनीययोः, उत अग्निषोमीयस्यैव इति संशये, "तुल्यः सर्वेषां पशुविधिः प्रकरणाविशेषात्" (जै.३.६.१८) इति ।

"सुत स्थानाच्च पूर्वस्य" इति सूत्रसङ्गतिः, प्रसङ्गात् तत्सङ्गतिसिध्यर्थम् आद्यमुत्सूत्रं कृत्वा सवनीयपक्षे, **तुल्यः सर्वेषां पशुविधिः स्यात्** इति सूत्रमन्यथा कृत्वा योजितम् । अत्र शब्दान्तरात् सूत्रान्तरमेव सिध्यति खलु । तथा च एतत्पर्यालोचनेन इदमत्र ज्ञायते यत् अस्माकं शास्त्राणां सूत्रकाराः सर्वेऽपि विशेषतः शिक्षाविदः एव आसन् इति । एवञ्च शिक्षणसूत्राणामाधारेण हर्बर्ट-महोदयेन पदचतुष्टयं पाठयोजनासम्बध्दं प्रत्यपादि । तदनन्तरं तच्चिष्यैः पुनः मथनं कृत्वा पञ्चमं पदमेकं समायोज्यत । तदिदानीं हर्बर्टपञ्चपदीनाम्ना पाठयोजनायां प्रथते । तानि च पञ्चपदानि प्रस्तावना, उपस्थापनम्, तुलना, सामान्यीकरणं प्रयोगः इति । एतैः पदैरेव कालान्तरे विस्तृता पाठयोजना पर्यकल्पि शिक्षाविद्भिः ।

एवञ्च पाठयोजनायां पाठाः त्रिधा विभज्यन्ते यथा ज्ञानपाठाः, कौशलपाठाः, सौन्दर्यपाठाश्चेति । शास्त्रीयसूत्राणि सर्वाण्यपि ज्ञानपाठे एव अन्तर्भवन्ति । तस्माद्वक्तुं शक्यते यत् शास्त्राणां सूत्राणि **ज्ञानप्रतिपादकानि**, शिक्षणसूत्राणि **ज्ञानप्रतिपादनक्रमबोधकानि** इति । एतद्विज्ञायैव सूत्रकाराः समुचितक्रमे एव सूत्राणि निबध्दयामासुरिति शम् ।

सहायकग्रन्थसूची –


- श्लोकवार्तिकम्
- शब्दार्थकौस्तुभः
- उच्चतरशिक्षामनोविज्ञानम्
- शाबरभाष्यम्
- वैयाकरणसिद्धान्तकौमुदी
- संस्कृतशिक्षणम्
- कुमारसम्भवम्
- भामतिः
- रघुवंशः

# संश्लिष्टभावना (मनोग्रन्थिः)
# (Complex)

**डा. रामचन्द्रुलबालाजी**
शिक्षाविभागः
रा.सं.सं. राजीवगान्धीपरिसरः, श्रृङ्गेरी

सर्वेष्वपि मानवेषु प्राणिष्वपि साधारणतया केचन भावाः विकाराः अनुभूतयश्च भवन्ति । एतेषु संश्लिष्टभावना इति एकः स्थितिविशेषः विशेषतया चिन्तनीयः भवति, यः मानवानां व्यवहारस्योपरि परोक्षरूपेण प्रभावं जनयति । किं नाम संश्लिष्टभावना अथवा मनोग्रन्थिः – इत्यस्मिन् विषये कैश्चित् एवमुक्तं वर्तते –

'इयम् एका स्थितिः भवति, या वैयक्तिकाचेतनमनसा उत्पन्ना भवति, यस्याम् उद्वगानां स्मृतीनाम् आकाङ्क्षाणां प्रत्यक्षाणां समाहारः भवति' ।

(A complex is a core pattern of emotions, memories, perceptions and wishes in the personal unconscious organized around a common theme, such as power or status.)

Complex पदं प्राथमिकतया मनोविश्लेषणात्मकं पदं भवति । एतद् पदं Carl Jung, Sigmund Freaud महोदययोः कार्येष्वेव उपयुक्तं भवति ।

संश्लिष्टभावनां ज्ञातुम् आदौ सिगमन्डफ्रायडमहोदयस्य मनोविश्लेषणसिद्धान्तः विचारणीयः, यत्र मनसा त्रैविध्यं प्रतिपादितम् – चैतन्यम् अर्द्धचैतन्यम् अचैतन्यम् इति भेदेन । एतेषु अचेतनमनः अतिगभीरं भवति, यत्र अपूरितमनोरथानाम् अनेकसंघटनानां स्थितिः भवति, अपि च यः मनोभागः परोक्षरूपेण मानवव्यवहारं प्रभावयति । अपि च जुंगमहोदयः अचैतन्यं द्विधा विभक्तवान् –

१) वैयक्तिकाचैतन्यम् (Personal Unconsciousness)

२) सङ्कलिताचैतन्यम् (Collective Unconsciousness) इति भेदेन ।

वैयक्तिकाचैतन्यम् एकव्यक्तिविशेषस्य जीवनकाले प्राप्तानाम् अनुभवानां सञ्चयनं (Accumulation) भवति, यत् चेतनमनसा स्मर्तुं नैव शक्यते ।

Jung वर्यस्य कथनानुसारं वैयक्तिकाचैतन्यं संश्लिष्टभावनाभिः प्रभावितः भवति। (Jung believed the personal unconscious was dominated by complexes.)

अस्येतिहासं विचारयामश्चेत् एतत् Complex पदं Komplex इति शब्दात् उत्पन्नं भवति, यत् जर्मनदेशीयमानसिकचिकित्सकेन थियोडर जीहेन (Theoder Ziehen) महोदयेन पदसाहचर्यविधिप्रयोगसमये प्रयुक्तं वर्तते ।

Jungमहोदयः अपि स्वकीयकार्यारम्भदशायां जुरिच विश्वविद्यालये शब्दसाहचर्यप्रयोगसमये एव 'Complex' इति पदं साक्षी कृतवान् । आदौ यद्यपि जुंग महोदयः फ्रायडमहोदयेन साकं मिलित्वा संश्लिष्टभावनानां विषये कार्यं कृतवान्। परन्तु किञ्चित् कालानन्तरं भाववैषम्यकारणात् जुंगवर्यः पृथकरूपेण विश्लेषणमनोविज्ञानम् (Analytical Psychology) इति सिद्धान्तम् आरब्धवान् । उभयोः एकः मुख्यभेदः भवति संश्लिष्टभावनानां भिन्नताविषये । Sigmund Freudमहोदयेन केवलं संश्लिष्टभावनाद्वयमेव अङ्गीकृतम् । यथा –

1) मातृमनोग्रन्थिभावना (Oedipus Complex), यया बालकः मातुः उपरि अतिस्नेहं वहति ।

2) पितृमनोग्रन्थिभावना (Electra Complex), यया बालिका पितुः उपरि अतिस्नेहं प्रदर्शयति । परन्तु जुंगमहोदयः बहुविधभावनाः अङ्गीकृतवान् ।

**संश्लिष्टभावनानां कार्याणि –**

जुंगमहोदयस्य कथनानुसारं संश्लिष्टभावनाः

१) व्यक्तेः मानसिकस्थितेः निर्मातारः भवन्ति ।

२) बहूनां विकाराणां कारकाः भवन्ति ।

३) अनियन्त्रितरूपेण चेतनप्रक्रियायाः स्मृतेश्च नाशकाः भवन्ति ।

विशेषतया संश्लिष्टभावनाद्वयं व्यक्तेः व्यवहारविषये व्यक्तित्वविषये च अत्यधिकप्रभावं जनयति । तयोः विषये किञ्चिदेव विचारं कुर्मः ।

१) अहंमतिभावना अथवा आत्माधिकभावना (Superiority Complex) –

अलफ्रेडअडलरमहोदयस्य (Alfred Adler) कथनानुसारम् इयं भावना मनोवैज्ञानिकं रक्षणतन्त्रम् (Defense Mechanism), यत् आत्मन्यूनताभावानायाः क्षतिपूर्तिः (Compensation) ।

(A superiority complex is a psychological defense mechanism that compensates for an inferiority complex.)

अडलरमहोदयस्य कथनानुसारं वयं यदि एकस्मिन् व्यक्तिविशेषे विद्यमानमात्माधिकभावनाविषये अध्ययनं कुर्मः तर्हि वयं तस्मिन् व्यक्तिविशेषे आत्मन्यूनताभावनाम् अधिकतया वा न्यूनरूपेण वा अवश्यं द्रष्टुं शक्नुमः ।

साधारणतया यः कोऽपि जनः दैनन्दिनजीवनावश्यकतानां पूर्तये यदि सक्षमः न भवति, सः आत्मन्यूनताभावनां प्राप्नोति । सः समाजेन साकं सामञ्जस्यं प्राप्तुम् अशक्तः भवति । अतः सः स्वकीयजीवनसमस्यानां परिहारार्थम् आत्माधिकभावनां प्रदर्शयति इत्यतः आत्माधिकभावना आत्मन्यूनभावनायाः क्षतिपूर्तिः भवति इति अडलरमहोदयः अभिप्रैति ।

**तस्य कथनानुसारं** – The superiority complex is one of the way that a person with an inferiority complex may use as a method of escape from his difficulties. He assumes that he is superior when he is not and this false success compensates him for the state of inferiority which he cannot bear. The normal person does not have a superiority complex, he does not even have a sense of superiority. He has the striving to be superior in the sense that we all have ambition to be successful, but so long as this striving is expressed in work it does not lead to false valuations, which are at the root of mental disease.

अतः एकः व्यक्तिविशेषः यः जीवनसमस्यानाम् अभिमुखी कर्तुम् उचितं शिक्षणं यदि न प्राप्तवान्, तर्हि सः बहुविधमार्गैः स्वकीयम् आधिक्यं प्रदर्शयितुं क्रियमानः यत्नः एव आत्माधिकभावना भवति ।

केचन एवम् अभिप्रयन्ति आत्माधिकात्मन्यूनताभावनयोः एकस्मिन् व्यक्तिविशेषे स्थितिः नैव भवति, यतोहि आत्माधिकभावनावान् पुरुषः सर्वेषाम् अपेक्षया स्वयमेव अधिकः इति मनुते । सः अन्येषाम् अभिप्रायान् न परिगणयति, तेन तस्य न्यूनता भवेदिति भावनया ।

**आत्मन्यूनताभावः (Inferiority Complex) –**

आत्मनः सामर्थ्यविषये सन्देहः । अनिश्चितत्वं स्तरानुगुणचिन्तनाभावः एतानि आत्मन्यूनताभावनायाः लक्षणानि । साधारणतया इयं भावना अर्धचैतन्यावस्थायां भवति, परन्तु तस्य प्रभावं व्यवहारे द्रष्टुं शक्नुमः ।

**आत्मन्यूनताभावनायाः कारणानि –**

१. बहुवारपराजयकारणात्

२. आवश्यकप्रोत्साहाभावकारणात्

३. सामाजिक-आर्थिक-न्यूनताकारणात्

४. कृतकर्मणः विषये अत्यधिकरूपेण विमर्शकारणात्

५. आवश्यक स्वातन्त्र्याभावकारणात्

६. पितृभिः सम्भावितस्तरप्राप्तेः अभावकारणात् अपि आत्मन्यूनताभावना भवितुमर्हति ।

यद्यपि अयं भावः कश्चन रोगः नास्ति, व्यवहारस्योपरि तस्य प्रभावः अधिकतया पतति । कतिचित् वर्षेभ्यः प्राक् बहूनां कलाशालाच्छात्राणाम् उपरि कृत मनोवैज्ञानिकसर्वेक्षणानुसारं ९०% अधिकाः छात्राः आत्मन्यूनाताभावेन क्लेशमनुभवन्ति । अयम् एकः विषयः वर्तते यत् बहवः महात्मनः अपि आत्मन्यूनतभावेन पीडिताः वर्तन्ते ।

According to Classical Adlerian psychology the second inferiority feeling results adults feel inadequate from desires to achieve an unobtainable or unrealistic result, "The need for perfection". Stresses associated with feelings of failure and inferiority cause a pessimistic attitude and an inability to overcome difficulties in life.

According to Adler "Everyone has a feeling of inferiority, but the feeling of inferiority is not a disease; it is rather a stimulant to healthy, normal striving and development. It becomes a pathological condition only when the sense of inadequacy overwhelms the individual and far from stimulating him to useful activity, makes him depressed and incapable of development".

बहवो हि जनाः आत्मन्यूनताभावम् अतिक्रान्तुम् अनेकान् अनारोग्यकरमार्गान् अनुसरन्ति ।

१. दिवास्वप्नप्रदर्शनम् (Day Dreaming)

२. उन्मादकद्रव्यस्वीकरणम् (Drunkardiness)

एताभ्यां कारणाभ्याम् आत्मन्यूनताभावात् अतिक्रमं न भवति, किम् उत समयस्य वैयर्थ्यं जीवनात् भ्रष्टत्वञ्च प्राप्नोति ।

३. अन्येषाम् उपरि अधिकभावप्रदर्शनम् (Smoke Screen Method) ।

केचन स्वकीय आत्मन्यूनताभावम् एकत्र सम्प्राप्य अन्यत्र स्वकीयाधिक्यं प्रदर्शनार्थं प्रयत्नं कुर्वन्ति । उदाहरणार्थम् –

कार्यालये आत्मन्यूनताकारणात् खिन्नः पुरुषः गृहे भार्यायाः उपरि कुटुम्बसदस्यानाञ्चोपरि आधिक्यं प्रदर्शयितुं यतते ।

आत्मन्यूनताकारणात् सर्वेषां व्यवहारेऽपि दोषान् ग्रहीतुं बहुप्रयत्नं करोति । सर्वत्र नकारात्मिकां भावनां कार्येषु वहन्ति । एतादृशात्मन्यूनताभावनाम् अतिक्रान्तुं केचन उत्तममार्गाः एवं वर्तन्ते –

१. आत्मनः यथार्थस्थितेः ज्ञानम् (Self Actual Knowledge)
२. आत्मनः स्थितेः अङ्गीकारः (Principle of acceptance)
३. देवस्योपरि विश्वासः स्थापनम् (Keep faith in God)
४. ध्यानम् (Meditation)
५. ज्येष्ठेभ्यः परमर्शस्वीकरणम् (Getting of proper counseling)
६. धार्मिकग्रन्थानाम् अध्ययनम्

# अन्तःक्रिया

**डा. हरिप्रसादः के.**
शिक्षाविभागः
रा.सं.सं. राजीवगान्धीपरिसरः, श्रृङ्गेरी

आधुनिके युगे शिक्षायाः लक्ष्यं परिवर्तितम् अस्ति । पूर्वं भारते तु मोक्षप्राप्तिः शिक्षायाः लक्ष्यम् आसीत् । किन्तु सम्प्रति आजीविकावाप्तिः शिक्षायाः प्रधानलक्ष्यम् अस्ति । एतादृशं परिवर्तनं न केवलं शिक्षायाः लक्ष्ये अपि तु तत्स्वरूपे, शिक्षणपद्धतिषु गुरुशिष्यसम्बन्धे गुरुशिष्ययोः लक्षणे अध्येयविषये चेत्यादिषु सर्वेषु विषयेषु आगतम् अस्ति ।

शिक्षायाः लक्ष्यं मोक्षप्राप्तिः यदा आसीत् तदा अङुलिगणनीयाः एव तदर्थं यतन्ते स्म । अवशिष्टाः सर्वे शिक्षावाप्तये न प्रयतन्ते स्म । शिक्षा मोक्षप्राप्त्यर्थम् एव न इति यदा स्थितिः समुत्पन्ना तदा शिक्षार्थिनां संख्या किञ्चिदिव अधिका जाता । शिक्षायाः लक्ष्यं आजीविकावाप्तिः इति यदा अभवत् तदाराभ्य सर्वेषां शिक्षावाप्तौ रुचिः समुत्पन्ना । यतो हि लौकिकजीवनाय आजीविका अनिवार्या । अतः अधिकाधिकाः शिक्षावाप्तये विद्यालयं गन्तुम् आरभन्त । किञ्च आजीविकावाप्त्यर्थं ये विद्यालयं प्रविष्टवन्तः तेषां सर्वेषां आजीविकायाः प्राप्तिः इति लक्ष्यं केवलं शिक्षायाः अन्तिमे घट्टे एव उत्पद्यते । अतः ततः पूर्वतनस्तरस्य शिक्षायाः लक्ष्यं किमपि न भवति इव स्थितिः समुत्पन्ना । अतः उद्देश्याभावे यान्त्रिकरूपेण/असहजतया कक्ष्याप्रकोष्टे आगत्य उपविष्टानां छात्राणां शिक्षाविषये बहु चिन्तनीयम् अभवत् । यतो हि तेषां छात्राणां संख्या महती । तत्र केचन एव छात्राः रुचिमन्तः । केवलं अङ्गुलिगणनीयानामेव छात्राणां लक्ष्यज्ञानं भवति । तेष्वपि सर्वेषां स्तरः समानः न । सर्वेऽपि विभिन्नप्रकृतिकाः । पोषकाणां लक्ष्यं छात्रस्य स्तररुच्याद्यनुगुणं न
वर्तते । एतादृश्यां स्थितौ कक्ष्याशिक्षणस्य सार्थक्यसम्पादनार्थं किमपि चिन्तनीयमभवत् । तस्य चिन्तनस्य फलत्वेन बहवो हि विषयाः जन्म प्राप्नुवन् । तत्र अन्तःक्रिया इति विषयोऽपि अन्यतमः ।

इयमन्तःक्रिया सम्प्रेषणवत् नास्ति । सम्प्रेषणं कदाचित् एकमुखीप्रक्रिया भवति कदाचिच्च द्विमुखीप्रक्रिया भवति । किन्तु अन्तःक्रिया सर्वदा द्विमुखीप्रक्रिया एव भवति । अपि च सम्प्रेषणवेलायां वयं सदा ज्ञानसंसूचनानां विनिमयं/संविभागं कुर्मः, किन्तु अन्तःक्रियायां संसूचनानामेव विनिमयमात्रं न कुर्मः ।

अन्तः क्रिया क्रियाप्रतिक्रिययोर्योगो नास्ति । इत्युक्ते शिक्षकस्य क्रिया छात्रस्य च प्रतिक्रिया मिलित्वा अन्तःक्रिया भवतीति नास्ति ।

शिक्षकः छात्रस्य बोधनार्थं योजनां निर्माति । भाषाशिक्षणे वा भवतु शास्त्रशिक्षणे वा भवतु पाठयोजना अनिवार्या । इयं पाठयोजना लिखितरूपेणैव भवेदिति नास्ति नियमः । प्रायः आधिक्येन शिक्षकस्य योजनाः मानसिक्य एव भवन्ति । योजना शिक्षकच्छात्रयोः क्रियाप्रतिक्रिययोः पूर्वनिश्चयार्थं अपेक्ष्यते । एतादृशेन पूर्वनिश्चयेन पाठनस्य गुणवत्ता अधिका भवतीति प्रधानं कारणम् वर्तते । शास्त्रशिक्षणे यद्यपि पङ्क्त्यर्थो बोध्यते तथापि पङ्क्त्यर्थम् अवगमयितुं योजना तु आवश्यकी एव । संस्कृतभाषां शास्त्राध्येतारो माणवकाः जानन्ति चेदपि शास्त्रस्य पङ्क्त्यर्थम् अवगच्छन्तीति निश्चयो नास्ति । ग्रन्थपङ्क्तेः अर्थकथनं शैक्षिकलक्ष्यं साधयतीति वक्तुं न शक्यते । सामान्यतः अध्यापकः पाठनवेलायां एकस्याः ग्रन्थपङ्क्तेः पठनात्परं तस्याः तात्पर्यम् उक्त्वा तदग्रिमपङ्क्तेः पठनं कृत्वा तस्याः तात्पर्यकथनार्थं प्रवर्तते इतिवत् प्रायः अवलोक्यते । आवश्यकतायां सत्यां समुचितम् उदाहरणं/दृष्टान्तं वा शिक्षकः प्रयच्छति । कदाचित् कस्मिंश्चित् घट्टे प्रश्नं पृष्ट्वा छात्रैः विषयः अवगतो वा न वेति स्पष्टतां प्राप्तुं यतते । कदाचित्तु – “अवगतं किल ?” “ज्ञातं वा ?” “गृहीतं खलु ?” “स्पष्टं किल ?” इति बलात् छात्रमुखात् अङ्गीकारवचनं प्राप्य अग्रे व्याख्यानम् अनुवर्तयति । एतद्व्याख्यानं “**पदच्छेदः पदार्थोक्तिः विग्रहो वाक्ययोजना** ...” इत्यादिलक्षणनुयायि वस्तुतः न भवति । इदं व्याख्यानलक्षणं यद्यपि अत्यन्तं सुनिबद्धं व्यावहारिकं प्राचीनैरस्मभ्यं प्रादायि, तथापि तदनुसारि व्याख्यानं साम्प्रतिके काले अतिविरलतयैव अनुस्त्रियते । साम्प्रतं तु व्याख्यानं इत्युक्ते निर्दिष्टविषयम् आश्रित्य निरन्तरं प्रवाहरूपेण कथनमेव व्याख्यानं इतिवत् स्थितिर्वर्तते । रीतिरियं प्रायः आङ्ग्लेयानां शिक्षणपद्धत्यनुसारिणी वर्तते इति भासते । तदर्थमेव यः Lecturing करोति सः Lecturer इत्युच्यते । सरणिरियं भारते विश्वविद्यालयेषु महाविद्यालयेषु विद्यालयेषु च अनुस्त्रियमाणा दरीदृश्ये । एतादृशीं सरणिं अननुसरन्नपि कश्चन अध्यापकः कदाचित् बोधितं विषयम् आश्रित्य मध्ये मध्ये प्रश्नं पृच्छति चेदपि समयाभावात् सर्वान् छात्रान् तु प्रष्टुं नार्हति ।

छात्रः कदाचित् सन्देहं पृच्छति चेत् समाधानं तावत् पूर्वोक्तस्य विषयस्य आवर्तनमाध्यमेन शिक्षकः ददाति । छात्रः तीक्ष्णमतिश्चेत् संवादमाध्यमेन अध्यापकस्य मुखात् समाधानं प्राप्नोति । मध्यममतिश्चेत् नावगतञ्चेदपि अवगतमिव बलात् शिरश्चालयति । मन्दमतिश्चेत् पुस्तके एव बद्धदृष्टिः भवति, शिक्षकस्य मुखमपि न पश्यति ।

छात्रसंख्या प्रतिकक्षं उपचत्वारिंशत् भवतीत्यतः अध्यापकः छात्राणां वैय्यक्तिकापेक्षासु अवधानं दातुं नार्हति । तस्मात् कारणात् शिक्षकः छात्रस्य वास्तविकं स्तरं नावगच्छति । छात्रस्य रुचिं नावगच्छति । छात्रस्य अपेक्षां नावगच्छति । तस्मादेव कारणात् छात्रस्य मानसं मानसिकस्थितिं च अनवगच्छन् छात्रस्तरानुसारं प्रश्नं पृष्ट्वा तान् प्रेरयितुं नार्हति । एतादृश्यां अन्तःक्रिया अस्मान् शिक्षकान् उपकरोति ।

प्रायः अस्माकं सर्वाण्यपि शास्त्राणि अन्तःक्रियाशैल्या एव आबद्धानि सन्ति । विषय-संशय-सङ्गत्यादिकं विहाय दृष्टान्तरहितं शुष्कतर्कमात्रं क्वचदपि शास्त्राणि न उपस्थापयन्ति । किन्तु साम्प्रतिके युगे महाकाव्यनाटकादीनि अनधीत्य वाङ्मये व्युत्पत्तिं अनासाद्य शास्त्रशिक्षायै छात्राः प्रवर्तन्ते इत्यतः तदध्येतुं तेषाम् अधिकार एव न भवति । एतादृश्यां स्थितौ न्यूनातिन्यूनं अन्तःक्रिया वा यदि शिक्षकैः अनुस्त्रियते चेत् शिक्षणं सफलं भवति । एतादृश्याः अन्तःक्रियायाः एकम् उदाहरणम् इत्थम् अस्ति –
छान्दोग्योपनिषदः षष्ठाध्यायस्य द्वादशे खण्डे –

न्यग्रोधफलमत आहर इति — इदं भगव इति
भिन्धि इति — भिन्नं भगव इति
किमत्र पश्यसि इति — अणव्य इव इमा धाना भगव इति
आसाम् अङ्ग एकां भिन्धि इति — भिन्ना भगव इति
किमत्र पश्यसि इति — न किञ्चन भगव इति

तं होवाच यं वै सोम्य एतं अणिमानं न निभालयस एतस्य वै सोम्य एषोऽणिम्नि एवं महान् न्यग्रोधस्तिष्ठति श्रद्धत्स्व सोम्य इति ।

अत्र उदाहरणे आचार्यस्य प्रश्नः अथवा कथनं भाषादृष्ट्या सरलः/सरलम् , किन्तु विषयदृष्ट्या गभीरः/गभीरम् । छात्रस्य समाधानम् अपि यथार्थम् सरलञ्च । समाधाने कापट्यं नास्ति । कुत्रापि अनपेक्षितं असम्बद्धं वा सम्भाषणं नास्ति । अन्यूननानतिरिक्तः संवादः । विनिगमकवाक्यस्यापि शुष्कोपदेशः लक्ष्यं नास्ति । इत्थं यः संवादो भवति तस्य अन्तःक्रियास्वरूपं पूर्णतः भवति । अनेनैव अन्तःक्रियलक्षणं सार्थक्यं भजते । कक्ष्याशिक्षणेऽपि एतादृशी अन्तःक्रिया अनुकार्या । शैक्षिकप्रविधिक्षेत्रे एन्.ए.फ़्लाण्डर्स्-वर्यः अन्तःक्रियायाः सुष्ठु विश्लेषणं व्यधात् । तस्य अन्तःक्रियाविश्लेषणम् इति विषयः कक्ष्याशिक्षणस्य आन्तं विश्लेषणं करोति । प्रतिक्षणं कक्ष्यायां जायमानं अध्यापकस्य वा छात्रस्य वा व्यवहारं सम्यक् अधीत्य कस्य मात्रा कीदृशी ? स्वरूपं च कीदृशम् ? क्रमानुपातः कुत्र ? इत्यादिविषयान् वैज्ञानिकरूपेण सुष्ठु प्रत्यपीपदत् एन्. ए. फ़्लाण्डर्स्-वर्यः ।

सन्दर्भग्रन्थाः

1. शैक्षिक तकनीकी एस्.के. मङ्गल एवं उषा मङ्गल
2. शैक्षिक प्रविधिः  डा.रमाकान्तमिश्रः
3. शैक्षिक तकनीकी एवं कक्ष्याप्रबन्ध  सन्तोष मित्तल
4. शैक्षिकप्रविधिशास्त्रम्, प्रो.सुदेशकुमारशर्मा
5. शैक्षिक तकनीकी एस्.पि. कुलश्रेष्ठ

## दर्शनम्

**डा. गणेश ति.पण्डितः**
शिक्षाविभागः
रा.सं.सं. राजीवगान्धीपरिसरः, श्रृङ्गेरी

दृश्यते यथार्थतया ज्ञायते पदार्थो अनेन इति दर्शनम् । सामान्यतः वयं द्वाभ्यां नेत्राभ्यां बाह्यपदार्थान् अवलोकयामः । अत्र दर्शनं नाम बाह्यपदार्थावलोकनम् अथवा दृश्यावलोकनम् इत्यर्थः । पुनः तत्त्वालोकनाय तन्नाम विशिष्टपदार्थस्य अवलोकनाय विशिष्टस्यैव नेत्रस्य आवश्यकता वर्तते । सामान्यनेत्रयोः तत्तादृशसामार्थ्याभावात् । किञ्च सामान्याभ्यां नेत्राभ्यां ससीम्नः सान्तस्यैव पदार्थस्य दर्शनं सम्भवति न तु असीम्नः अनन्तस्यैव वा पदार्थस्य । एवं सति तृतीयनेत्रस्य कल्पनं कर्तव्यमेव । तत्किमिति सन्देहे सति उच्यते – "ज्ञानं तृतीयं मनुजस्य नेत्रम्" इति ।

तृतीयेण नेत्रेण तन्नाम ज्ञानचक्षुषा मानवः अलौकिकस्यापि पदार्थस्य दर्शनं कर्तुं प्रभवति । सामान्यनेत्राभ्यां लौकिकपादार्थस्य यः दर्शनं करोति सः दर्शकः इति पुनस्तृतीयेण नेत्रेण तन्नाम ज्ञानचक्षुषा यः अलौकिकपदार्थस्य दर्शनं करोति सः दार्शनिकः इति प्रोच्यते । दार्शनिकः एव स्वीयया आन्तरिकदृष्ट्या संसारेऽस्मिन् असत्येन आवृतं सत्यं समुद्धाट्य तदवाप्तुं शक्नोति । आन्तरिकदृष्ट्या तन्नाम ज्ञानदृष्ट्या आत्मसाक्षात्कारः सम्भवति । आत्मसाक्षात्काराय अथवा परमपुरुषार्थप्राप्तये दर्शनं साहाय्यमाचरति । गीतायामपि विश्वरूपदर्शनाय दर्शकस्थानीयाय अर्जुनाय भगवता कृष्णेन दिव्यं चक्षुः दत्तमिति तु प्रसिद्धमेव । यथा "दिव्यं ददामि ते चक्षुः पश्य मे योगमैश्वरम्" इति । दिव्यदृष्टियुतेन तन्नाम प्राप्तज्ञाननेत्रेण अर्जुनेन अग्रे उच्यते –

**"पश्यामि देवान्स्तव देव देहे ।**
**सर्वांस्तथा भूतविशेषसङ्घान् ॥** इति

अनेन सिद्धं यत् दर्शनं नाम आन्तरिकदृष्ट्या अवलोकनम् इति । किञ्च आन्तरिकदृष्ट्या आन्तरिकपदार्थस्यैव अवलोकनं क्रियते इत्यतः प्रत्येकमपि दर्शनस्य प्रतिपाद्यविषयोऽपि आन्तरिकः एव, तन्नाम मोक्षः एव । आन्तरिकपदार्थस्य आत्मनः वा साक्षात्काराय दर्शनम् एकमात्रं साधनं वर्तते ।

किञ्च दर्शकः द्वाभ्यां नेत्राभ्यां शरीरं पश्यति दार्शनिकस्तु ज्ञाननेत्रेण शरीरिणं पश्यति । दर्शकाय देहसाक्षात्कारः जायते पुनः दार्शनिकाय देवसाक्षात्कारः जायते । दर्शकः जीवं पश्यति चेत्तर्हि दार्शनिकः शिवं पश्यति । एवं दर्शनस्य स्वरूपम् आन्तरिकम्

तन्नाम आध्यात्मिकम् विषयोऽपि आध्यात्मिकः प्रयोजनमपि आध्यात्मिकमेवेति फलितम् । अतः एव दर्शकः मृत्युविचारम् उपस्थापयति दार्शनिकः मोक्षविचारम् उपस्थापयति । दौर्भाग्यवशात् दर्शकः जननमरणचक्रे निपतितो भविष्यति किन्तु सौभाग्यावशात् दार्शनिकः जननमरणचक्रात् मुक्तः भविष्यति । मुक्तिः अथवा मोक्षः एव दार्शनिकस्य चरमं लक्ष्यं वर्तते ।

दर्शनार्थं Philosophy इत्येषः शब्दः प्रयुज्यते पाश्चात्यैः । Philos तथा Sophia इत्याभ्यां पदाभ्यां तन्निष्पत्तिः । Philos इति पदस्य अनुरागः अथवा प्रेम इत्यर्थः । Sophia इति पदस्य ज्ञानमित्यर्थः । एवञ्च Philosophy इति शब्दस्य ज्ञाने प्रेम अथवा ज्ञानानुरागः इत्यर्थः । परन्तु अयमर्थः अत्यन्तं सङ्कीर्णः वर्तते । कुतश्चेत् ज्ञानानुरागः बौद्धिकव्यापारेण सम्बद्धः वर्तते । बौद्धिकव्यापारेण अथवा बौद्धिकजिज्ञासायाः उपशमनमात्रेण मानवजीवनं सफलं न भवतीत्यतः दर्शनार्थं Philosophy इत्येतस्य पदस्य प्रयोगः चिन्त्यः एव ।

किञ्च भारतीयदर्शनानि 'ज्ञानं भारः क्रियां विना' इत्येनं सिद्धान्तम् अभ्युपगच्छन्ति । ज्ञानक्रिययोर्मध्ये अथवा सिद्धान्तव्यवहारयोर्मध्ये एतेषु दर्शनेषु भेदः नैव गण्यते । आचारेण विना विचारः व्यर्थतां गच्छतीत्यतः दर्शनधर्मयोर्मध्ये अभेदं परिगणयन्ति भारतीयाः दार्शनिकाः । अत एव अत्रत्याः सर्वेऽपि दार्शनिकाः धार्मिकाः सन्ति । किन्तु पाश्चात्येषु नैतादृशी परम्परा दृश्यते । तत्र दार्शनिकाः सर्वेऽपि धार्मिकाः अथवा महर्षिणः भवेयुरिति नियमो वा सम्प्रदायो वा नास्ति । अयमेव प्रधानः भेदः पाश्चात्यपौरस्त्यदर्शनयोर्मध्ये ।

प्रत्येकमपि दार्शनिकस्य आहोस्वित् महर्षिणः केचन विशिष्टाः सम्प्रदायाः काश्चन विशिष्टाः जीवनपद्धतयः च सन्ति । एते सम्प्रदायाः अथवा एताः जीवनपद्धतयः विभिन्नदर्शनानां विभिन्नशास्त्राणां च प्रादुर्भावे हेतुरिति मन्यामहे ।

दर्शनानि आस्तिकनास्तिकभेदेन द्वैविध्यम् ऋच्छन्ति । आस्तिकदर्शनेषु पुनः पूर्णतः आस्तिकदर्शनानि मूलतः आस्तिकदर्शनानि इत्यपि भेदः वक्तुं शक्यः । वेदोक्तं कर्ममार्गमाश्रित्य विकसितं पूर्वमीमांसादर्शनं तथैव वेदोक्तमेव ज्ञानमार्गमाश्रित्य विकसितम् उत्तरमीमांसादर्शनञ्च पूर्णतः आस्तिकदर्शने स्तः । एतदतिरिक्तानि चत्वारि आस्तिकदर्शनानि वेदमङ्गीकुर्वन्त्येव । परन्तु तदतिरिक्तेष्वपि विषयेषु दृष्टिं प्रसारयन्ति । एतेषां चतुर्णामपि दर्शनानां प्रतिपाद्याः स्वतन्त्रविषयाः अपि सन्तीत्यतः एतानि मूलतः आस्तिकदर्शनानीति कथ्यन्ते ।

एवमेव चार्वाकदर्शनं पूर्णतः नास्तिकदर्शनमित्युच्यते । चार्वाकाः "त्रयो वेदस्य कर्तारः भण्डधूर्तनिशाचराः" इति जल्पन्ति इत्यतः ते पूर्णतः नास्तिकाः । किन्तु जैनाः बौद्धाश्च यद्यपि वेदं नाङ्गीकुर्वन्ति तथापि वेदं न निन्दन्ति इत्यतः मूलतः ते नास्तिकाः । किञ्च जैनबौद्धदर्शनेषु वेदोक्ताः बहवो हि विचाराः सन्ति । एवम् आस्तिकनास्तिकदर्शनानि विलसन्ति । सर्वस्यापि दर्शनस्य विकासः विधिनिषेधात्मकप्रक्रियया जातः । इयं प्रक्रिया खण्डनमण्डनप्रक्रिया इत्यपि उच्यते । एकस्य दर्शनस्य सिद्धान्तखण्डनात्मकपक्षः पूर्वपक्षः इति पुनः स्वमतमण्डनात्मकपक्षः सिद्धान्तपक्षः इति चोच्यते । परमतखण्डनाय स्वमतमण्डनाय च तर्कमेवावलम्बन्ते सर्वेऽपि दार्शनिकाः ।

आस्तिकदर्शनानि सर्वाण्यपि सूत्ररूपेण सङ्कलितानि सन्ति । सूत्रेषु दार्शनिकविचाराः सूक्ष्मरूपेण उल्लिखिताः दुर्बोधाश्च सञ्जाताः इत्यतः तदुत्तरवर्तिभिः दार्शनिकैः दर्शनानां सुबोधाय भाष्याणि लिखितानि । सूत्राणि बीजोपमानि भाष्याणि वृक्षोपमानि सन्तीति वक्तुं शक्यते । किन्तु सूत्राणां स्पष्टीकरणम् अथवा व्याख्यामात्रं भाष्याणाम् आहोस्वित् भाष्यकाराणां कार्यमिति नैव चिन्त्यम् । सूत्रकारैः अनुक्तानामपि प्रासङ्गिकानां विचाराणाम् उल्लेखं केचन भाष्यकाराः अकुर्वन् । कणादसूत्राणामुपरि विरचितं प्रशस्तपादभाष्यम् अत्र उदाहरणं वर्तते । अतः भाष्याण्यपि स्वतन्त्रग्रन्थायन्ते क्वचित् ।

षड्दर्शनप्रसङ्गे एकः सन्देहः समायाति । तत्र एकैकस्यापि दर्शनस्य एकैकः सूत्रकारः एकैकः भाष्यकारः वर्तते इति स्पष्टम् । परन्तु वेदान्तदर्शनप्रसङ्गे नैतदन्वेति । तत्र तु सूत्रकारः बादरायणः एकः एव । परं शङ्कररामानुजमध्ववल्लभनिम्बार्कादयः बहवोऽहि भाष्यकाराः सन्ति । एवं सति कस्य भाष्यकारस्य प्रामाण्यं स्वीकर्तव्यम् ? कः प्रामाणिकः? इत्यादयः प्रश्नाः पङ्क्तानुपुङ्खरूपेण मनसि समुद्भवन्ति ।

अत्रोत्तररूपेण सर्वाण्यपि भाष्याणि प्रामाणिकान्येव इति वक्तव्यम् । शङ्कराचार्याः आद्याः भाष्यकाराः इत्यतः तेषां शारीरकभाष्यम् मूर्ध्नि तिष्ठति । परन्तु शिष्टैरपि आचार्यैः बादरायणकृतब्रह्मसूत्राण्याश्रित्यैव भाष्याणि लिखितानीत्यतः सर्वाण्यपि भाष्याणि प्रामाणिकान्येव । भाष्यमुखेन स्वसम्प्रदायस्य मतस्य परम्परायाश्च प्रतिष्ठापनमकुर्वन् एते । एवं दर्शनानि विकसितानि ।

लोके बुभुक्षानिवृत्त्यर्थं स्वीक्रियमाणेषु आहारेषु यथा विभिन्नता तथैव मोक्षमार्गेष्वपि विभिन्नता अस्तीति मन्तव्यम् । यद्यपि षड्दर्शनानि विभिन्नानि तथापि विभिन्नतायामपि अभिन्नता विषमतायामपि समता परिदृश्यते । किञ्च सर्वाण्यपि दर्शनानि

सार्थकोद्देश्यपूर्णान्येव । किमपि निरुद्देश्यं दर्शनम् अत्र नास्ति । इदमेव भारतीयदर्शनानां वैशिष्ट्यं वर्तते ।

षड्दर्शनानां विषये केचन आक्षेपाः श्रूयन्ते । तत्र प्रथमाक्षेपः यथा- भारतीयाः दार्शनिकाः भौतिकजगति स्थित्वा आध्यात्मिकजगत् स्तुवन्ति । भौतिकजगत् निन्दन्ति च । भौतिकजगति आध्यात्मिकजगतः ज्ञानस्य वा किं प्रयोजनम् ?

द्वितीयाक्षेपः यथा – सर्वस्यापि दर्शनस्य लक्ष्यमस्ति मोक्षः । मोक्षः कस्मै लभ्यते? साधनाचतुष्टयसम्पन्नाय अधिकारिणे उपलभ्यते । तन्नाम व्यक्तिविशेषाय लभ्यते । एवं सति व्यक्तिविशेषः केनचित् दर्शनेन लाभान्वितः भवतीत्युक्ते दार्शनिकः विचारः व्यक्तिगतः न तु सामाजिकः इति सिध्यति । अतः दार्शनिकविचारान् सामाजिकादर्शरूपेण कथं स्वीकर्तुं शक्नुमः ? इति ।

तृतीयः आक्षेपः यथा – भारतीयदर्शनानि दूरदृष्टिं प्रयच्छन्ति । दूरदृष्टेः केन्द्रस्थानमस्ति आस्माकीनं भविष्यम् । एवं सति वर्तमानकाले अस्य किं प्रयोजनम् ?

चतुर्थः आक्षेपः यथा – दर्शनानि संसारस्य (मानवजीवनस्य) दुःखमयं चित्रम् उपस्थापयन्ति । मानवः घोरे जननमरणचक्रे निपतितो भविष्यति इति कथनेन अस्मासु निराशाभावः समुत्पद्यते । घोरनिराशायाः फलस्वरूपेण मानवः निस्तब्धः निश्चेष्टश्च भविष्यति । संसारस्य विषये नैराश्यभावोत्पदानेन कः पुरुषार्थः सिद्ध्यति ?

एवं भारतीयदर्शनानां विषये अनल्पाः आक्षेपाः श्रूयन्ते । एतेषां समाधानान्यपि क्रमशः अत्र निरूप्यन्ते ।

दार्शनिकाः संसारस्य निन्दां कुर्वन्ति इति तु अगतिकवचनम् । "जीवेम शरदः शतम्" इति वदन्तः पूर्वजाः स्मृतिकाराः वर्णाश्रमव्यवस्थामकुर्वन् । कल्पितेषु तत्र चतुर्षु आश्रमेषु गृहस्थाश्रमस्यैव प्राधान्यम् । 'धन्यो गृहस्थाश्रमः' इतीदं वाक्यं प्रसिद्धमेव । सांसारिकसुखभोगाधिकारः दार्शनिकस्यापि वर्तते । इदमेव तस्य आद्यं कर्तव्यं वर्तते । "न हि आत्मा बलहीनेन लभ्यः" इति श्रुतिवचनम् । अतः दार्शनिकाः संसारस्य निन्दां कुर्वन्ति इति तु निराधारः आक्षेपः एव इति तु निश्चप्रचम् । काम एवैकः पुरुषार्थः इति केवलं चार्वाकाः जल्पन्ति । शिष्टाः सर्वेऽपि अन्ततोगत्वा परमपुरुषार्थमेव समाश्रयन्ति ।

मोक्षः एव सर्वोच्चलक्ष्यमस्ति दर्शनस्य । आत्मानन्दः सांसारिकानन्दस्यापेक्षया श्रेष्ठः इत्यतः दार्शनिकैः एवमुच्यते । अत्र संसारः प्रथमसोपानत्वेन परिगण्यते न तु अन्तिमसोपानत्वेन । संसारसागरं तरीतुम् अशक्तः मोक्षाख्यं पारं गन्तुं नैव शक्नोति । संसारः आद्यः मोक्षः अन्तिमः । आद्येन विना अन्तिमस्य कल्पना कथं जायेत ?

मोक्षः व्यक्तिगतः न तु सामाजिकः इति कथनमपि भ्रममात्रमेव । 'सर्वे भवन्तु सुखिनः' इति वदन्तः दार्शनिकाः न केवलं व्यक्तेः अपि तु सम्पूर्णसमाजस्य सामाजिकानां वा समुद्धारार्थं कृतसङ्कल्पाः सन्ति । अतः एतादृशाः आक्षेपाः भ्रमवशादेव उत्पद्यन्ते । बहुजनहिताय बहुजनसुखाय इति बौद्धाः अपि निगदन्ति । अतः प्रत्येकं दर्शनं सर्वसाधकमेव वर्तते इति शिवम् ।

## विविधस्तरेषु पाठयोजनानिर्माणसिद्धान्ताः

**डा. वेङ्कटरमणभट्टः**
शिक्षाविभागः
रा.सं.सं. राजीवगान्धीपरिसरः, श्रृङ्गेरी

कक्षायां बोधनाय अध्यापकः पूर्वसिद्धतां कुर्यात् । बोधनीयविषयं सम्यक् अवगच्छेत् । तदर्थं काचित् योजना निर्मेया भवति । योजनामन्तरा किमपि कार्यं साफल्यं नावाप्नोति । योजनानिर्माणाय मनसि चिन्तनं विधानीयम् । चिन्तनं नाम मनसि जायमाना काचित् प्रक्रिया । चिन्तनं कारं कारं कस्मिंश्चित् विषये परिपक्वतां समाप्नोति शिक्षकः । चिन्तितं विषयं लिपिरूपेण अभिव्यञ्जयति पाठयोजना । विषयस्य चिन्तनानन्तरं किं बोधनीयम् ? कथं बोधनीयम् ? कियत् बोधनीयम् ? केभ्यः बोधनीयमिति पुनः पुनः चिन्तनीयम् । किं, कथं, कियत् केभ्य इति प्रश्नानामुत्तराणि सर्वादौ प्राप्तव्यानि । अत्र मनोवैज्ञानिकांशा अन्तर्भवन्ति । अत्र छात्राणां सामर्थ्यं, स्तराः, रुचिः, अनुभव इत्यादयः मनोवैज्ञानिकांशाः सम्मिलिताः ।

किं बोधनीयमित्यत्र पाठचयनमन्तर्भवति । योजनानिर्माणात्प्राक् निर्मीयमाणयोजना चयनीया । समर्पकं पाठ्यवस्तु चयनीयमित्याशयः । चितस्य पाठ्यवस्तुनः सार्थकाध्यापनाय कथं बोधनीयमिति चिन्तनं विधेयम् । चितमिदं पाठ्यवस्तु बालकानाम् अवबोधाय प्रभावपूर्णरूपेण बोधयितुं पाठ्यबिन्दवः निश्चेतव्याः । निश्चिताः पाठ्यबिन्दवः कैः विधिभिः सार्थकरूपेण बोधयितुं शक्याः इति चिन्तनीयम् । कियत् बोधनीयमित्यत्र विचारणीयं वर्तते । पाठः दीर्घः अस्ति चेत् खण्डशः पाठं विभज्य बोधनीयम् । एकस्यां होरायामेव सम्पूर्णं बोधयितुं न शक्यते । बोध्यते चेदपि छात्राः पाठं श्रोतुं श्रद्धावन्तः न भवन्ति । सम्पूर्णं पाठं श्रोतुमपि तेषां छात्राणां रुचिः न भवति । केभ्यः बोधनीयमित्यत्रापि चिन्तनीयमस्ति । अत्र स्तरानुगुणं बोधनीयम् । काचित् कक्षा चेत् तत्र सर्वविधाः छात्राः भवन्ति । यथा – बुद्धिमन्तः, प्रतिभावन्तः, मन्दाः, मन्दितमतयः इति । एतेषां सर्वेषामपि छात्राणां सामर्थ्यादीनि भिन्नानि भवन्ति । एतन्मनसि निधाय पाठयोजना निर्मेया ।

पाठयोजनानिर्माणस्य लाभाः बहवः सन्ति । पाठयोजनया इदं निश्चितं भवति यत् कदा कियत् बोधनीयमिति । पाठयोजनया शिक्षकः नियमेन स्वीयकार्यं कर्तुं शक्नोति । तस्य पाठनविधिः सुव्यवस्थितः भवितुमर्हति । सोपानानुसारं बोधयितुं योजनेयं सहकरोति । सोपानानि क्रमशः उपस्थापयितुं समर्थो भवति शिक्षकः । योजनानिर्माणसमये दृश्यश्रव्योपकरणानामपि सार्थकप्रदर्शनाय चिन्तनं करणीयम् । तेन पाठः प्रभावपूर्णः

जायते । तादृशोपकरणानि उपयुज्य चित्राणां माध्यमेन च बोधनेन पाठितविषयः रुचिपूर्णः भवति । पाठसम्बद्धविविधकार्यकलापानां निश्चयेन पाठः इतोऽपि रुचिपूर्णः भवति । पाठयोजनानिर्माणेन शिक्षकस्य आत्मविश्वासः एधते । भविष्ये पाठनसमये आगमिष्यमाणानां समस्यानां दूरीकरणाय सन्नद्धो भवति । कमपि विषयं बोधयितुं सामर्थ्येन साकं विश्वासः शिक्षकेण प्राप्तव्यः । तेन विश्वासेन सह स्वयमनुभूतिरपि आसादितव्या । विषयगतं भावं हृद्गतं कृत्वा स्वयमनुभूय अध्यापयति चेत् शिक्षकेणापि तद्गतानुभवः आत्मसात्कृतो भवति । विषयस्योपस्थापनं भाषामाध्यमेन क्रियते । संस्कृतभाषाबोधनं संस्कृतभाषामाध्यमेन विशिष्य क्रियते । तस्यां संस्कृतभाषायां विद्यमानं साहित्यं व्याकरणं रसः इत्याद्यंशाः अपि शिक्षकेण ज्ञातव्याः । पाठ्यपुस्तके समागतं ऐतिहासिकं भौगोलिकञ्च विषयं जानीयात् शिक्षकः ।

पाठयोजनामनु शिक्षकः कक्ष्यायां बोधयेत् । येन प्रकारेण योजना निर्मिता तेनैव क्रमेण पाठस्योपस्थापनं करणीयम् । सामान्यानि उपकरणानि सम्यक्तया उपयोक्तव्यानि । श्यामफलकस्योपयोगः अनिवार्यरूपेण करणीयः । क्लिष्टपदानां बोधने सन्धि-समासादीनां पाठने, चित्र-रेखाचित्रादीनां लेखनसन्दर्भे च अवश्यं श्यमफलकमुपयोक्तव्यम् । श्यमफलके लिखितान् विषयान् सूचीदण्डमाध्यमेन प्रदर्शयेत् शिक्षकः । श्यामफलके विषयान् विलिख्य पाठनेन बोधितविषयः दृढीयान् जायते ।

दुरूहं विषयं चित्रपटप्रदर्शनेन विवरीतुं शक्यते । विशिष्टोपकरणेषु चित्रमन्तर्भवति । चित्रद्वारा पाठनेन पाठनं रुचिपुर्णं स्वारस्यपूर्णम् आकर्षकञ्च जायते । पाठनसमये छात्राणां मूल्याङ्कनं कुर्यात् शिक्षकः । प्रश्नं पृष्ट्वा समाधानमवाप्नुयात् शिक्षकः । प्राप्ते समाधाने छात्रः समीचीनमुत्तममत्युत्तममित्यादिभिः शब्दैः प्रोत्साहनीयः । प्रोत्साहनेन छात्राः अभिप्रेरिताः भवन्ति । प्रशंसनेन अधिगमप्रक्रिया तीक्ष्णा जायते । कश्चित् छात्रः साध्विति प्रशंसितश्चेत् तत्प्रशंसाभाजं छात्रं वीक्ष्य अन्योऽपिच्छात्रः तेन प्रेरणां प्राप्नोति । अहमपि प्रश्नस्य समाधानं प्रदातुं प्रयतिष्ये इति चिन्तयति । अनेन अध्ययनानुकूलवातावरणं कक्ष्यायां वर्धते । अतः मूल्याङ्कनस्य महत्त्वं शिक्षाविदः अभ्युपगच्छन्ति ।

पाठयोजनायां पद्यपाठयोजना, गद्यपाठयोजना, व्याकरणपाठयोजना इति प्रकारा-स्सन्ति । किञ्चिदिव व्यत्ययोऽस्ति सर्वत्र । सामान्यतया प्रस्तावना उद्देश्यकथनम्, आदर्शवाचनम्, अनुवाचनं, त्रुटिसंशोधनम्, पाठप्रवर्धनं, अवबोधप्रश्नाः, सारकथनं, मौनवाचनं, पुनरावृत्तिप्रश्नाः, गृहकार्यमिति सोपानानि भवन्ति । पद्यपाठयोजनायां सस्वरवाचनमिति सोपानं भवति । प्रत्येकमपि सोपाने कक्ष्यायां शिक्षकेण सूचना प्रदेया । सोपानानां नामग्राहं सूचना न देया । उदा – अहं पाठप्रवर्धनं करोमि । भवन्तः श्रृण्वन्तु ।

इत्थं सूचना छात्रेभ्य: न प्रदेया । पाठप्रवर्धनमिति सोपानस्य नाम अध्यापकस्य ज्ञानाय विद्यते । तत्र क्रियमाणव्यवहार: कार्यकलापो वा सूचना रूपेण वक्तव्या । प्रस्तावना पाठसम्बन्धिनी स्यात् । प्रश्नमाध्यमेन कथामाध्यमेन वा प्रस्तावना करणीया । बालकानां पूर्वज्ञानाश्रिता कथा विधानीया । सहजा स्वाभाविकी सरला च सम्पादनीया प्रस्तावना । दीर्घा प्रस्तावना न कर्तव्या । बालकानां कौतूहलं विकासयितुं सक्षमा स्यात् प्रस्तावना । आसक्ते: वर्धनं अनया सम्पादनीयम् । छात्राणाम् अधिगमसज्जीकरणाय सहकारिणी प्रस्तावना भवेत् । प्रदत्तं प्रस्तावनासम्बद्धं विवरणं वा इति चिन्तनं विधेयम् । उद्देश्यकथनावसरे निरूपितमुद्देश्यं पाठनीयविषयं समग्ररूपेण प्रतिबिम्बयति वा इति परिशीलनीयम् । उद्देश्यं सुस्पष्टं निरूपितं भवेत् । समये उद्देश्यं निरूपणीयम् । बालकानाम् उद्देश्यनिरूपणं अवगतं भवेत् । प्रस्तावनया उद्देश्यस्य सम्बन्ध: भवेत् । अत्र उद्देश्यनिरूपणस्य भाषा समीचीना स्यात् । उद्देश्यनिरूपणं नाति दीर्घं भवेत् । पाठप्रवर्धने तु अवधेया: अंशा: अनेके भवन्ति । क्रमबद्धतया बोधनांशा: वर्णनीया: । विषयविवरणं सुस्पष्टं भवेत् । पाठप्रवर्धने चितानि उदाहरणानि स्पष्टानि स्यु: । प्रश्ना: सरला: स्पष्टा: भाषादोषरहिताश्च भवेयु: । नाति दीर्घ: प्रश्न: स्यात् । प्रश्नकरणं सामूहिकं भवेत् समाधानन्तु एकेन प्राप्तव्यम् । सामूहिकमुत्तरं न स्वीकुर्यात् । समाधानप्राप्त्यनन्तरं प्रशंसा करणीया । बालकानां चिन्तनशक्ते: अवसर: प्रदेय: । शिक्षकस्य शारीरिकभाषा अपि प्रमुखा: भवन्ति ।

पुनरावृत्तिप्रश्नान् कृत्वा पाठितविषय: छात्रैरवगतो वा इति शिक्षकस्य मूल्याङ्कनं स्वयं स: सम्पादयेत् । समये कक्षाबोधनं सम्पादयेत् । अनिवार्यरूपेण गृहकार्यप्रश्ना: प्रदेया: । अनेन पाठितपाठ: दृढीयान् भवति ।

इत्थं पाठयोजनां विलिख्य निर्मिताया: योजनाया: असकृत् परिशीलनं विधाय कक्षाबोधनाय शिक्षक: कक्षां प्रविशेत् ।

******

1. ಮಾತೃಭಾಷಾ ಬೋಧನೆ ಕನ್ನಡ ತತ್ವ ಮತ್ತು ಬೋಧನಾ ಮಾರ್ಗ - ಅನಸೂಯಾ ವಿ ಪರಗಿ, ವಿವೇಕ ಪ್ರಕಾಶನ, ಚಿಕ್ಕಬಳ್ಳಾಪುರ
2. संस्कृतशिक्षणं नवीनप्रविधयश्च – डा.च.ल.ना. शर्मा & डा. फतेहसिंह:, आदित्यप्रकाशनम्, जयपुरम्
3. संस्कृतशिक्षण – डा.रघुनाथ सफाया, हरियाणा साहित्य अकादमी, अकादमी भवन, पी- 16, सेक्टर् 14, पंचकूला - १३४११३

# अभ्यासवशगं मनः

**डा.नारायण वैद्य**
शिक्षाविभागः
रा.सं.सं. राजीवगान्धीपरिसरः, श्रृङ्गेरी

कोऽर्थः अस्य शीर्षकस्य ?

मनः चञ्चलं भवति । चञ्चलमपि मनः निरन्तराभ्यासेन वशीकर्तुं शक्यते । पुनः पुनः क्रियमाणः प्रयत्नः अभ्यासः इत्युच्यते । सांसारिकभोगाः नश्वराः भवन्ति । अतः एतेषां पुनः पुनः चिन्तनेन तेषु विरक्तिः जायते । एषा विरक्तिः अथवा वैराग्यम् एव मनः वशीकर्तुं प्रभवति । सततम् अभ्यासेन सांसारिकभोगान् प्रति वैराग्येण च मनः वशीकर्तुं शक्यते ।

मनः अरूपिद्रव्यमित्यतः मनसः सत्तां नाद्रियन्ते व्यवहारवादिनः । अन्ये केचन मनोविज्ञानिनः मनसः अध्ययनं कृत्वा मनसः स्वरूपं स्वभावं च वर्णयितुमसमर्थाः अभवन् । मनसः विज्ञानं मनोविज्ञानम् इति मनोविज्ञानस्य लक्षणमपि अस्वीकार्यमभवत् । अद्यत्वे मनोविज्ञानं व्यवहारस्य विज्ञानमिति व्यवह्रियते ।

पाश्चात्येषु सिग्मण्ड फ्राइड इत्याख्यः मनोविज्ञानी मनसः विश्लेषणं कृत्वा मनः त्रेधा अवर्णयत् । यथा - चेतनमनः, अर्धचेतनमनः, अचेतनमनः इति । अस्यैव मनोविश्लेषणं कुर्वन् यूङ्गमहोदयः त्रिविधमनसः कार्यकरणेऽपि त्रैविध्यं स्वीचकार । यथा - इद्मतिः, अहं मतिः, विशिष्टाहं मतिरिति । अत्र इद्मतिः सुखमात्रपरोभूत्वा नैतिकविषये श्रद्धां नैव प्रदर्शयति । अहं मतिः इद् इत्यनेन उत्पादितान् भावान् इयमेव मतिः विवेचनं करोति । इयं मतिः परिवेशे सम्यक् व्यवहर्तुम् अभिप्रेरयति । विशिष्टाहं मतिः धर्माधर्मविचारान् विचिन्त्य सदाचारे प्रवर्तयति । एवं रीत्या आधुनिकाः मनोविज्ञानिनः मनसः अस्तित्वमभ्युगच्छन्ति । अथापि एतेषां मनोविश्लेषणेन मनसः दुःखानां संवेगानां च वारणोपायाः नैव स्पष्टाः सञ्जाताः । मनः कथं व्यवहरति इत्यपि अस्पष्टमेव वर्तते । मनसः निर्वचनं वक्तुमपि असमर्थाः सञ्जाताः । मनसः लक्षणं, स्वरूपं च भारतीयदर्शनेषु स्पष्टतया उपलभ्यते । उक्तं च मनो लक्षणं तर्कसङ्ग्रहे "सुखदुःखाद्युपलब्धिसाधनम् इन्द्रियं मनः" इति । सुखदुःखयोरनुभवः येन इन्द्रियेण भवति तन्मनः इति तदर्थः । अतः देहे मनः अस्तीत्यत्र नास्ति संशयः ।

एवं देहे मनः अस्तीति अस्माकम् अनुभवानाम् आधारेण अपि अवगन्तुं शक्यते । यतः अवयवान् अनुपयुज्य चिन्तायामः, सन्तोषमनुभवामः, दुःखं च

प्रकाशयामः । यदि एते क्रियाकलापाः सहजतया जायन्ते तर्हि अन्तः विशिष्टम् इन्द्रियम् कार्यं कुर्वादस्तीत्यर्थः । तस्य नाम किमिति चेत् मनः इति वक्तव्यं भवति । बृहदारण्यकोपनिषदि मनसः अस्तित्त्वं प्रतिपाद्यते -

मनो वाचं प्राणं तान्यात्मनेऽकुरुतान्यत्रमना अभूवं नादर्शमन्यत्रमना अभूवं नाश्रौषमिति मनसा ह्येव पश्यति मनसा श्रुणोति । कामः संकल्पो विचिकित्सा श्रद्धाश्रद्धा धृतिरधृतिः ह्रीः धीर्भिरित्येतत्सर्वं मन एव तस्मादपि पृष्ठत उपस्पृष्टो मनसा विजानाति यः कश्च शब्दो वागेव सैषा ह्यन्तमायत्तैषा हि न प्राणोऽपानो व्यान उदानः समानोऽन इत्येत्सर्वं प्राण एवैतन्मयो वा अयमात्मा वाङ्मयो मनोमयः प्राणमयः ।

बृहदारण्यकोपनिषत् 1.5.3

मम मनः अन्यत्र आसीत् । नाहं दृष्टवान्, नाहं श्रुतवान् । सर्वेऽपि मनसा पश्यन्ति मनसा श्रुण्वन्ति । कामः,सङ्कल्पः, सन्देहः, श्रद्धा, अश्रद्धा, धृतिः, अधृतिः, भीतिः त्यादयः मनः एव अस्ति । अस्यावगमः मनसः एव जायते । अतः सर्वं मनः एव अस्तीति निश्चप्रचं वक्तुं शक्यते इति अस्य मन्त्रस्य तात्पर्यम् ।

मनसः अन्तर्निरीक्षणसामर्थ्यं वर्तते । मनसा एव किं कार्यं प्रवर्तते इति विश्लेशणं कृत्वा अवगन्तुं शक्यते इति उपर्युक्तमन्त्रेण ज्ञायते ।

कुतो वा मनः स्थिरः न भवति ? इति ज्ञातुं भारतीयदर्शनेषु मनोविश्लेषणं कथं कृतमिति अवलोकनीयम् । तत्रापि वेदान्तशास्त्रं अध्येतव्यम् । वेदान्तशास्त्रे मनसः त्रेधाविभागः प्रदर्शितो विद्यते । मनः सत्वरजस्तमोगुणैः आच्छादितो भवति । एते गुणाः एव मनः नियन्त्रयति प्रेरयति च । अत्र सत्वगुणः शास्त्रोक्तकर्मसु व्यवस्थापयति । रजोगुणः दुःखं जनयति । तमोगुणः मोहं उत्पादयति । एवं त्रिगुणोपेतानि तत्त्वानि विद्यारण्यमुनिभिः सम्यक् निरूपितम् अस्ति । तदुक्तम् -

मनो देहेन्द्रियाध्यक्षं हृत्पद्मगोलके स्थितम् ।
तच्चान्तःकरणं बाह्येष्वस्वातन्त्र्याद्विनेन्द्रियैः ॥
अक्षेष्वर्थार्पितेष्वेतद् गुणदोषविचारकम् ।
सत्वं रजस्तमश्चास्य गुणा विक्रियते हि तैः ॥
वैराग्यं क्षान्तिरौदार्यमित्याद्याः सत्वसंभवाः ।
कामक्रोधौ लोभयत्नावित्याद्या रजसोत्थिताः ।।
आलस्यभ्रान्तितन्द्राद्या विकारास्तमसोत्थिताः ।
सात्विकैः पुण्यनिष्पत्तिः पापोत्पत्तिश्चराजसैः ॥
तामसैर्नोभयं किन्तु वृथायुः क्षपणं भवेत् ।

अत्राहं प्रतययी कर्तेत्येवं लोकव्यवस्थितिः ॥

पञ्चदशी -12 - 16

आकाशादि पञ्चभूतानां सात्विकांशैः क्रमशः श्रोत्रत्वक्चक्षुरसनघ्राणेन्द्रियाणि उत्पन्नानि । तत्भूतानां रजसः अंशैः वक्पाणिपादपायूपस्थानि क्रमशः उत्पन्नानि । एतेषां सर्वेषां पञ्चभूतानां सात्विकांशैः मनः उत्पन्नम् । अतः शब्दस्पर्शरूपरसगन्धाः मनसा ज्ञायन्ते । अत्र मनसः तत्तदिन्द्रिय सम्बन्धेन शब्दादिज्ञानानि अनुभूयन्ते । यदि मनसः सन्निकर्षः न भवति तदा तत्तदिन्द्रियाणां ज्ञानं नोदेति । अतः मनः देहेन्द्रियाणामध्यक्षमिति तात्पर्यम् । अत एव मनः चञ्चलं भवति । तत्र कारणं बाह्येन्द्रियसन्निकर्षेण रूपादिज्ञानानि भवन्ति । तत्तदिन्द्रियविषयेषु मनः आकृष्टं सत् चाञ्चाल्यं भजते । अत एव उक्तं गीतायाम् -

चञ्चलं हि मनः कृष्ण प्रमाथि बलवद्धृढम् ।
तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम् ।

भगवद्गीता – 6.34

अत्र अर्जुनः कृष्णं पृच्छति मनः चञ्चलं भवति । तस्य निग्रहः सर्वदा गमनशीलस्य वायोः निग्रहः यथा क्लेशावहः तथा मनसोऽपि निग्रहः सुदुष्करः भवति इति । मनोव्यापारं शङ्कराचार्याः इत्थं निरूपयन्ति -

मनो नाम महाव्याघ्रो विषयारण्यभूमिषु ।
चरत्यत्र न गच्छन्तु साधवो ये मुमुक्षवः ॥ इति

विवेकचूडामणिः - 178

एवं भूतस्य मनसः चाञ्चल्यमभ्युपगम्य निग्रहोपायं दर्शयति श्रीकृष्णः -

असंशयं महाबाहो मनोदुर्निग्रहं चलम् ।
अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते ॥

भगवद्गीता – 6.35

अभ्यसेन वैराग्येण च मनसः निग्रहः सुलभसाध्यः । अत्र अभ्यासो नाम असकृदावृत्तिः । एवं अभ्यासेन मनः वशीकर्तुं शक्यते इति भगवान् श्रीकृष्णः अभिप्रैति । अस्य अभ्यासस्य क्रमः योगसूत्रे निरूप्यते -

स तु दीर्घकालनैरन्तर्यसत्कारासेवितो दृढभूमिः ।

पातञ्जलयोगदर्शनम् – 1.14

अयमभ्यास: अथवा असकृदावृत्ति: दिर्घकालपर्यन्तम् निरन्तरम् अनुष्ठेयम् । अपिच तपसा ब्रह्मचर्येण श्रद्धया च सम्पादनीयम् । यद्येवं अनुष्ठीयते तदा दृढो भवति । साफल्यं च प्राप्यते । एतदेव उपदिशति श्रीकृष्ण:

सङ्कल्पप्रभवान्कामांस्त्यक्त्वा सर्वानशेषत: ।
मनसैवेन्द्रियग्रामं विनियम्य समन्तत: ॥
शनै: शनैरुपरमेद्बुद्ध्या धृतिगृहितया ।
आत्मसंस्थं मन: कृत्वा न किञ्चिदपि चिन्तयेत् ॥

भगवद्गीता – 6.24, 25

सङ्कल्पेनोत्पद्यमाना: कामना: परित्यज्य मनसा इन्द्रियाणि बध्वा क्रमश: अभ्यासं कृत्वा स्वाधीनं कर्तव्यम् । धैर्येण बुद्ध्या मन: परमात्मनि संस्थाप्य अन्यत्किमपि नैव चिन्तयेत् ।

मनो निग्रह: व्याख्यानलेखनादिवत् न सुलभ: । यथा गुढस्य माधुर्यं गुढं भुक्त्वा ज्ञातुं शक्यते तथा इन्द्रियाणां नियन्त्रणं कृत्वा अनुभवेन अवगन्तव्यम् । नियन्त्रितमना: शुद्धा: भवन्ति । शुद्धमना: श्रेष्ठं पदं प्राप्नुवन्ति । किं तत् श्रेष्ठं पदम् इति जिज्ञासायाम् उच्यते -

**विज्ञानसारथिर्यस्तु मन: प्रग्रहवान्नर: ।**
**सोऽध्वन: पारमाप्नोति तद्विष्णो: परमं पदम् ॥**

कठोपनिषत् - 1.3.9

संसारस्यास्य सारथिरस्ति बुद्धि: । सा विवेचनशीला नियन्त्रितमनोयुक्ता शुद्धा च भवेत् । असौ सारथि: उत्तमं पदं प्राप्नोति । रागद्वेषमोहादिषु संसारेषु पुनरुत्पत्ति: न भवति इत्यलं विस्तरेण ।

*****

सन्दर्भग्रन्था:

1. शिक्षामनोविज्ञानम् – डा. फतेहसिंह:, आदित्यप्रकाशनम्, जयपुरम्
2. शिक्षामनोविज्ञानम् – वि. एस. वेङ्कटराघवन्, रा.सं. विद्यापीठम्, तिरुपति:
3. भगवद्गीता – गीताप्रेस गोरखपुर
4. बृहदारण्यकोपनिषत् - गीताप्रेस गोरखपुर
5. पञ्चदशी – चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली
6. विवेकचूडामणि - गीताप्रेस गोरखपुर
7. भारतीय मनोविज्ञान – डा. श्रीमती लक्ष्मी शुक्ला, ईस्टर्न बुक लिंकर्स दिल्ली
8. पातञ्जलयोगदर्शनम् – भारतीयविद्याप्रकाशन, वारणासी

# रचनाशिक्षणम्

**डा. पि. अरविन्दकुमार सोमदत्तः**
शिक्षाविभागः
रा.सं.सं. राजीवगान्धीपरिसरः, श्रृङ्गेरी

मानवः सर्जनशीलो भवति। स्व सर्जनशक्ते वशात् स अद्वीतीयां रचनां करोति। रचनात्मकयोग्यतायाः संवर्धनाय भाषाशिक्षकैः छात्रेभ्यः प्रारम्भादेव विशिष्टसहयोगः दातव्यः । येन छात्राः मौलिकरचानालेखने समर्थाः स्युः। "रचना" इत्यस्य शब्दस्य व्युत्पत्तिः "रच्" धातो युच् प्रत्ययेन सञ्जाता। अस्य शाब्दिकार्थोऽस्ति – सज्जीकरणम्, लेखनं निर्माणं वा। रचनायां मानवः स्वीयभावान् क्रमबद्धरूपेण एकस्मिन् सूत्रे गुम्फित्वा परेषां समक्षं प्रस्तौति। मानवः स्वविचाराणामभिव्यक्तिं मुख्यतः भाषणेन लेखनेन च करोति, अतः रचना अपि द्विधा भवति – मौखिकरचना, लिखितरचना च। बेकनमहाभागेनोक्तम्- "सम्भाषणकला विचक्षणमतिं प्रसाधयति, लेखनकला मानवस्य विचाराभिव्यक्तये निश्चितदिशां ददाति।"

"रचना" शब्दोयं आङ्लभाषायाः "composition" इत्यस्य शब्दस्य पर्यायोऽस्ति। अयं केवलं निबन्धलेखनायैव प्रयुक्तो न भवति, अपितु कथा – उपन्यास - कविता – पत्र – संस्मरण – प्रतिवेदन – आत्मकथादिविषयेषु सह व्यापकत्वेन प्रयुक्तो भवति यथा – रिक्तस्थानानां पूर्तिः, चित्रवर्णनं, वार्तालापः, वर्णनात्मक-विवरणात्मक-विचारात्मकलेखाः, पुस्तकानां समालोचना, सारांशलेखनं, शब्दानुवादः, शब्दवाक्यांश-लोकोक्तीनाञ्च शुद्धप्रयोगः रचनायामन्तर्भवन्ति समानार्थकशब्दविपरीतार्थकशब्दानां च अर्थज्ञापनमादयः। एतेषु निबन्धस्य स्थानं प्रमुखमस्ति। मौखिकरचनायाः तुलनायां लिखितरचनायाः कृते अधिकावधानस्य आवश्यकता भवति। यतो हि इयं स्थायिनी भवति।

मौखिकरचनाशिक्षणम् – मौखिकात्मप्रकाशनं तु एका स्वतन्त्रप्रक्रिया वर्तते। मौखिकाभिव्यक्तेः सम्बद्धबिन्दूनां चर्चा पुस्तकेऽस्मिन् "संस्कृते ध्वनितत्वम्", "उच्चारणशिक्षणम्" इत्यनयोः पाठयोः वर्तते। प्राचीनकाले आश्रमेषु मौखिकरूपेणैव शिक्षा प्रदीयते स्म। कण्ठस्थीकरणस्य महत्वमपि तस्मिन् काले आसीत् शनैः शनैः मुद्रणकलायाः विकासः सञ्जातः। परिणामतः लेखनपद्धतेः विकासोऽभवत्। तथापि मौखिकाभिव्यक्तेः महत्व वर्तते। मौखिकरचनाशिक्षणस्योद्देश्यानि –

छात्राणां शब्दकोशे वृद्धिकरणम्। नवशब्दानाम् उचितप्रयोगे सामर्थ्यवर्धनम्।

छात्रेषु संस्कृतध्वनीनां शुद्धोच्चारणस्य योग्यतोत्पादनम्।

छात्रेषु संस्कृते सम्भाषणस्य ज्ञानसम्पादनम्।

तथ्यानां यथाक्रमं यथाऽवसरं च विस्पष्टप्रस्तुतेः क्षमतोत्पादनम्।

सरलसंस्कृते मौखिकरचनानैपुण्यसम्पादनम्।

भाषणे प्रादेशिकभाषायाः प्रभावस्य न्यूनीकरणम्।

विरामादिचिह्नानि सम्यगवधाय अभिव्यक्तिकरणम्।

लघुवाक्यैः क्षमतोत्पादनम्।

छात्राणामन्तः शक्तीनां प्रकटीकरणम् ।

मौखिकरचनाप्रक्रिया –

शिक्षकः नवीनध्वनीनां, शब्दानाञ्च उच्चारणं करोति। छात्राः तेषाम् अनुवाचनं कुर्वन्ति।

छात्राः तान् श्रुण्वन्ति, अवगच्छन्ति, स्मरन्ति च।

ते नवीनशब्दान् अवगच्छन्ति तेषां साहाय्येन रचनाकार्यं कुर्वन्ति।

सरल – लघुवाक्येषु ते स्वकीयानां भावानां विचारणाञ्च अभिव्यक्तिं कुर्वन्ति।

मौखिककार्यस्य रूपाणि – संस्कृतशिक्षकः कक्षायाम् अनेकानि मौखिककार्याणि कारयितुं शक्नोति, यथा-

सरलवाक्यानां रचना – संज्ञा–सर्वनाम-विशेषणपदानां क्रियापदानां च प्रयोगं कृत्वा सरलवाक्यानां रचनायाः कृते तं ग्रन्थनोपागमेन अभ्यासः कारणीयः। प्रथमवाक्यसम्बद्धस्य द्वितीयवाक्यस्य रचनायाः कृते छात्रेभ्यः अवसरः प्रदेयः। यथा- "अद्य रविवासरः अस्ति। अतः अहं विद्यालयं न गच्छामि।" प्रत्येकं छात्रः प्रथमवाक्यम् उच्चार्य तदाधारेण तत्सदृशानि वाक्यान्युच्चरेत्। ततश्च शिक्षकः किञ्चित् वाक्यम् अवलम्ब्य तत्सदृशमन्यद् वाक्यं वदति। तस्यपार्श्वे उपविष्टः छात्रः शिक्षकस्य वाक्यम् उच्चैः उच्चार्य स्वयमपि तादृशम् एकं वाक्यं वदेत्। ततः अग्रिमः तद् वाक्यद्वयमपि उच्चार्य तादाधारेण स्वयं तादृशम् एकं वाक्यं वदेत्। सर्वे छात्राः यावत् अवसरं न प्राप्नुवन्ति तावत् अभ्यासोऽयम् अनुवर्तताम्।

प्रश्नोत्तराणि – किम्, किमर्थम्, कथम्, कदा, कुत्र इत्यादीनां प्रश्नवाचकशब्दानां प्रयोगं कृत्वा शिक्षकः छात्रान् सरलप्रश्नानामुत्तरप्रदानाय प्रेरयति। एतदर्थं छात्राणां गणाः बहूनि युगलानि करणीयानि। ततः शिक्षकः तानि उद्दिश्य सूचनां दद्यात्- "अहम् इदानीं भवत्सु एकैकस्य विषयोऽपि अधिकं विवरणं ज्ञातुं इच्छामि। तदर्थं प्रश्नान् पृच्छामि। परन्तु अहं यस्य विषये ज्ञातुं इच्छामि तस्य विषये अन्यद् युगलमेव परिज्ञानं कारयिष्यति न तदेव।

अन्यद् युगलमेव सर्वस्यापि प्रश्नस्य उत्तरं वदेत्। तच्च ज्ञानं परस्परं प्रश्नोत्तरेण प्राप्तव्यम्। तदर्थम् इदानीं पञ्चनिमेषात्मक: काल: दीयते। तदभ्यन्तरे एकैक: अपि बहून् प्रश्नान् पृष्ट्वा अन्यस्य विषये सर्वविधं विवरणं संगृहणीयात्" इति। यथा-

बाल: कुत्र गच्छति?

विद्यालये कति अध्यापका: सन्ति?

स: कान् कान् विषयान् पठति?

कथाकथनम् – भाषाशिक्षणे कथानां महत् स्थानमस्ति। अनया छात्राणां मौखिकाभिव्यक्ति: सशक्ता भवति। यतो हि श्रवणाभ्यासनिमित्तं शिक्षक: कथा: श्रावयेत् तथा भाषणाभ्यासनिमित्तं तेन बालानां मुखात् कथा: वाचनीया:। संस्कृताभ्यासात् पूर्वमपि छात्रै: अन्यभाषासु अनेका: कथा: श्रुता: पठिताश्च भवन्ति। ता: कथा: कथयितुं शिक्षकेण अवसर: कल्पनीय:। संस्कृते कथाचित्राणां साहाय्येन कथावाचनस्य अभ्यासोपि शिक्षकेण कारयितुं शक्यते।

अभिनय: - संस्कृतशिक्षणे मौखिककार्यस्य कृते अभिनयस्य विशिष्टं स्थानं वर्तते। वाचिकाभिनयेन छात्राणामुच्चरणं शुद्धं भवति, मौखिकभिव्यक्ते आत्मविश्वास: आगच्छति। रङ्गमञ्चीयाभिनयार्थं कञ्चित् प्रसङ्गं छात्राणां पुरत: विवृत्य तं प्रसङ्गम् अभिनयेन यथा प्रदर्शयेयु: तथा छात्रा: प्रोत्साहनीया:। क: छात्र: किं पात्रं निर्वहेत् इति निश्चित्य तत्सम्बद्धं सम्भाषणमपि यदि सकृत् पाठ्यते तर्हि छात्रा उत्साहेन नाटकाभिनये प्रवृत्ता: भवन्ति।

सम्भाषणम् – भाषाशिक्षणे सम्भाषणस्य विशिष्टं महत्वं वर्तते। संस्कृतभाषावातावरणम् अद्यत्ये पाय: छात्रेभ्य: स्वगृहे परिसरे वा नोपलभ्यते इत्यत: सर्वेषामपि संस्कृतच्छात्राणां संस्कृतविषयकश्रवणभाषणकौशलयो: शिक्षणस्य आरम्भ: विद्यालये एव भवति इति वक्तुं शक्यते। अत: संस्कृतशिक्षकस्य भूमिका सन्दर्भेऽस्मिन् महत्वपूर्णा अस्ति। छात्रा: अधिकाधिकं प्रतिपादनीय:। छात्रा: मध्ये मध्ये दोषान् अपि अवश्यं करिष्यन्ति तथापि प्रेरिता: चेत् ते सम्भाषणे दक्षा भविष्यन्ति। शिक्षक: किमपि चित्रं प्रदर्श्य तत्सम्बद्धप्रश्नान् पृच्छन् छात्राणां भाषणस्य अभ्यासं कारयितुमर्हति।

सस्वरवाचनम् – सस्वरवाचनस्य मौखिककार्ये सहायकं भवति। शिक्षक: उचितस्वरेण, गति-यति-लयनुसारेण श्लोकस्योच्चारणं करोति। छात्रा: ध्यानेन श्रुण्वन्ति। निर्दिष्टा: छात्रा: तथैव पठन्ति। अनुवाचनसमये छात्राणामुच्चारणे अनुभूतत्रुटिम् अन्येषां छात्राणां श्यामपट्टस्य च साहाय्येन शिक्षक: दूरीकरोति। अनया प्रक्रियया श्लोकोच्चारणे छात्रेषु आत्मविश्वासस्य विकासो भवति।

सरलवर्णनम् – शिक्षक: छात्राणां समक्षं कमपि एकं विषयं प्रस्तुत्य तस्य संस्कृते वर्णनाय कथयति यथा – वर्षावर्णनम्, अविस्मरणीयघटनाया वर्णनमित्यादीनि। शिक्षक: मध्ये मध्ये छात्राणां साहाय्यं करोति। तान् प्रेरयति च।

साहित्यकगतिविधीनामायोजनम् – भाषण-वादविवाद-प्रश्नोत्तरी-अन्त्याक्षरी-प्रहेलिका-भाषाक्रीडादीनामायोजनेन अपि छात्राणां मौखिकाभिव्यक्ति: सशक्ता भवति। वादविवाद: - एकस्या: कक्षाया: छात्राणां मध्ये अथवा विभिन्नकक्षाया: छात्राणां मध्ये अन्तविश्वविद्यालयस्तरे अन्तर्जनपदस्तरे अन्ताराज्यस्तरे च वादविवादप्रतियोगिता समायोजनीया। विषयचयनं समसामयिकं, छात्राणां स्तरानुकूलमेव भवितव्यम्। वादविवादङ्कर्तुं छात्रा: पूर्वमेव प्रेरणीया:। तेषु एतादृशी क्षमतोत्पादनीया यत् तै: सरलसंस्कृतेन प्रतिप्रश्नानाम् उत्तरं प्रस्तोतुं शक्यते। तथा च छात्रेषु एतादृशी योग्यताऽपि समुत्पादनीया यत् रटनापेक्षया ते विषयमवगम्य स्वविचारन् प्रकटयन्तु।

ध्वनियन्त्राणां प्रयोग: - एकविंशशताब्द्यां यत्र प्रतिकक्षे आधुनिक प्रौद्योगिकयन्त्राणि सन्ति, तत्र शिक्षकेण स्वकीयशिक्षणे तेषां समेषां यन्त्राणाम् उपयोग: अवश्यमेव कर्तव्य:। आकाशवाण्या-दूरदर्शने- प्रसारितसंस्कृतकार्यक्रमेषु छात्रै: अवश्यमेव भाग: ग्राह्य: इत्यपि अध्यापकेन छात्रा: सर्वदा प्रेरणीया: यतो हि तत्कार्यक्रम-माध्यमेन छात्राणां ज्ञानवृद्धिरवश्यमेव भविष्यति। लिखितरचनाशिक्षणस्योद्देश्यानि छत्रेषु शोभनाक्षरै: लेखनं स्यात् अत: तादृशलेखनं लेखयितुं ते प्रेरणीया:। संस्कृतभाषायां स्वविचारान् क्रमबद्धरूपेण प्रकटयितुं लेखनकौशलोत्पादनम् । मातृभाषाया संस्कृतभाषायां, संस्कृतभाषाया मातृभाषायाञ्च अनुवादकरणस्य योग्यतोत्पादनम् । संस्कृतानुच्छेदस्य सुलेखं श्रुतलेखञ्च शुद्धं लेखितुमपि ते प्रेरणीया:। स्वतन्त्रात्मप्रकाशनाय सज्जीकरणम्। निरीक्षणस्य चिन्तनशक्तेश्च विकास: कर्तव्य:। छात्रेषु संस्कृतवाक्यखण्डानां लोकोक्तीनां सुभाषितानामुद्धरणानाञ्च प्रयोगं कर्तुं बृहद्परिच्छेदस्य सारांश: स्वशब्देषु लेखितुं, सरलानुच्छेदस्य टीकां लेखितुं तथा विभिन्नविषयोपरि निबन्धं लेखितुमपि ते प्रेरणीया: दक्षाश्च कर्तव्या:। विरामचिह्न-अनुस्वार-चन्द्रबिन्दु-विसर्गादिप्रयोगं प्रति जागरूका: कर्तव्या:। छात्रेषु मौलिकतासर्जनात्मकक्षमतयो: विकास: कर्तव्य:। प्रश्नेत्तरलेखनस्य योग्यता विकासयितव्या।

**लिखितरचनाशिक्षणस्य विधयः-**

चित्रविधिः - छात्राणां समक्षं चित्राणि प्रस्तुत्य तेषां चित्राणां विविधपक्षाणामुपरि प्रश्नाः पृच्छ्यन्ते उत्तराणि च प्राप्यन्ते। तेषूत्तरेषु संशोधनं कृत्वा श्यामपट्टे छात्रैः स्वयमध्यापकैश्च लिख्यते। तथा छात्रैः स्वकीयोत्तरपुस्तिकायां लिख्यते। प्रारम्भिकस्तरस्य छात्राणां कृते अधिकोपयोगि अस्ति।

उद्बोदनविधिः - अस्मिन् विधौ शिक्षकः कमपि विषयं प्रदाय तैः सह चर्चाङ्कृत्वा तज्जिज्ञासां वर्धयति। तदनन्तरं कल्पनाशक्तिमाधारीकृत्य छात्रेभ्यः लेखतुं शिक्षकेण अवसरः प्रदेयः।

सूत्रविधिः - अस्मिन् विधौ शिक्षकः श्यामपट्टे क्रमेण वर्ण्यविषयाणां सूत्राणि लिखति। तथा छात्रैः सह मौखिकरूपेण बन्दूनामुपरि चर्चां विधाय तेभ्यः स्वतन्त्ररूपेण लेखनस्य स्वातत्र्यं शिक्षकेण अवसरः प्रदेयः।

प्रश्नोत्तरविधिः - यदा बालकः कतिपयशब्दैः सह परिवितो भवति तदा तदनुभूतविषये शब्दविषयकप्रश्नान् शिक्षकः छात्रान् पृच्छति। प्राप्तोत्तराणामाधारेण संम्पूर्णानुच्छेदं लिखितुं छात्रान् प्रेरयति।